अर्हम् ॥
श्रीनेमि-विज्ञान-कस्तूर-यशोभद्रसूरिसद्‌गुरुवरेभ्यो नमः ॥

### कलिकालसर्वज्ञ-श्रीहेमचन्द्राचार्यविरचितस्य

# त्रिषष्टिशलाकापुरुषचरितस्य-गद्यात्मकसारोद्धारः

६

## दशमं पर्व

कर्ता - आ. श्रीविजयशुभङ्करसूरिः

सम्पादकः - मुनिधर्मकीर्तिविजयः



: प्रकाशक :
कलिकालसर्वज्ञ-श्रीहेमचन्द्राचार्यनवमजन्मशताब्दी-
स्मृति-शिक्षणसंस्कारनिधिः
अमदावाद

कलिकालसर्वज्ञ–श्रीहेमचन्द्राचार्यविरचितस्य
**त्रिषष्टिशलाकापुरुषचरितस्य**
**गद्यात्मकसारोद्धारः ६**
**( दशमं पर्व )**
Trishashti-Shalakaa-Purusha-Charitam

© **सर्वेऽधिकाराः स्वायत्ताः**

**कर्ता : आ. श्रीविजयशुभङ्करसूरिः**
**सम्पादक : मुनिधर्मकीर्तिविजयः**
**प्रकाशकम् : कलिकालसर्वज्ञ–श्रीहेमचन्द्राचार्यनवमजन्मशताब्दी–स्मृति–शिक्षणसंस्कारनिधिः – अमदावाद**

**द्वितीय संस्करणम् : वि.सं. २०६८ ई०सं० २०१२**
**प्रतयः : ५००**
**मूल्यम् : रु. १२५–००**
**पृष्ठानि : २४ + २६४ = २८८**

**प्राप्तिस्थानम् : १ श्रीविजयनेमिसूरीश्वरजी जैन स्वाध्याय मन्दिर**
१२, भगतबाग,
आणन्दजी कल्याणजीनी पेढी समीपे,
नवा शारदामन्दिर रोड, पालडी, अमदावाद – ३८०००७.
फोन : २६६२२४६५
दूरभाष : ०९८०८६३७७१४

**२ सरस्वती पुस्तक भण्डार**
११२, हाथीखाना, रतनपोल, अमदावाद–३८०००१.
फोन : २५३५६६९२

**मुद्रणम् : किरीट ग्राफीक्स**
४१६, वृन्दावन शोपींग सेन्टर, रतनपोळ, अमदावाद.
दूरभाष : ०९८९८४९००९१



# समर्पणम्

बालानामिव माता च सरितामिव सागरः ।
दुर्बलानामनाथानां कृते चैकाश्रयास्पद ! ॥ १ ॥

निगूढमन्त्र-तन्त्रज्ञ ! ज्योतिर्विज्ञानकोविद ! ।
मुनिसंमेलनस्तम्भ ! शासनोद्योततत्पर ! ॥ २ ॥

प्रबलसत्त्वसंपन्न ! शिष्योत्थाने कृतोद्यम ! ।
लब्धनन्दनसूर्याशीः ! प्रवचनकलाधर ! ॥ ३ ॥

शुद्धचारित्रसंनिष्ठ ! सर्वसूरिशिरोमणे ! ।
तथा वात्सल्यपाथोधे ! निर्मलब्रह्मपालक ! ॥ ४ ॥

सूर्यसदृशतेजस्विन् ! मृगेशोपमनिर्भय ! ।
चन्द्रसंकाशसंदीप्त ! रत्नाकरगभीर ! च ॥ ५ ॥

सदाग्रह्यपि सत्ये हि सदा निराग्रहिन् ! मुदा ।
स्व-परमोहदुर्भेद-ग्रन्थिविच्छेदकृत् ! खलु ॥ ६ ॥

नेमि- विज्ञान- कस्तूर- यशोभद्र- शुभङ्कराः ।
सूरीशा गुरवो यस्य प्रबलमहिमान्विताः ॥ ७ ॥

पठन-पाठनप्राण ! सेवातत्पर ! साधुराट् ! ।
औदार्यादिगुणोपेत ! **सूर्योदयगुरो** ! अहो ॥ ८ ॥

ज्ञानादिकं मयाऽवाप्तं प्रभावेण प्रभो ! तव ।
सर्वं पुण्यस्मृतौ तत्ते त्वदीयं तुभ्यमर्पये ॥ ९ ॥

**– धर्मकीर्तिविजयः**

# प्रकाशकीय निवेदन

कलिकालसर्वज्ञ श्रीहेमचन्द्राचार्यनी नवमी जन्मशताब्दी (वि.सं. ११४५-२०४५)ना मंगल अवसरे पूज्य आचार्यश्रीविजय-सूर्योदयसूरीश्वरजी तथा पूज्य आचार्यश्रीविजयशीलचन्द्रसूरीश्वरजीनी शुभप्रेरणाथी अमारा आ ट्रस्टनी स्थापना थई हती. प्राचीन ग्रन्थोनुं संशोधन-सम्पादनपूर्वक प्रकाशन, अनेक विद्वज्जनोनुं सन्मान, 'अनुसंधान'नामनी शोधपत्रिकानुं प्रकाशन-इत्यादि साहित्यिक प्रवृत्तिओ आ ट्रस्टनो मुख्य उद्देश छे.

ते अनुसार कलिकालसर्वज्ञ श्रीहेमचन्द्राचार्यनी नवमी सूरिपद शताब्दी (वि.सं. ११६६-२०६६)ना उपलक्ष्यमां तेओना द्वारा विरचित त्रिषष्टिशलाकापुरुषचरितनो पूज्य आ.श्रीविजयशुभंकरसूरिजी रचित गद्यात्मकसारोद्धार प्रगट करतां अमो आनन्द अनुभवीए छीए.

आ गद्यात्मकसारोद्धारनी रचना पूज्य आ.श्रीविजयशुभंकरसूरिजीए पूर्वे वि.सं. २०१६ना वर्षे करी हती. आजे ५० वर्ष पछी पूज्यश्री विजयसूर्योदयसूरीश्वरजीना शिष्य मुनिश्रीधर्मकीर्तिविजयजी द्वारा पुनः सम्पादित-संशोधित करेल आ ग्रन्थना प्रकाशननो लाभ अमारा ट्रस्टने मल्यो, ते बदल अमो तेओना ऋणी छीए.

लि.

वि. सं. २०६७

**कलिकालसर्वज्ञ-श्रीहेमचन्द्राचार्य**
**नवमजन्मशताब्दीस्मृति-**
**शिक्षणसंस्कारनिधिः**
**अमदावाद.**



# किञ्चित् प्रास्ताविकम्

सुविदितमेवेदं विदुषां यत् कलिकालसर्वज्ञेतिबिरुदधारिणा परमविदुषा जैनाचार्येण श्रीमता हेमचन्द्राचार्येण भगवता गूर्जरनरेशद्वयं सिद्धराजजयसिंह-कुमारपालचौलुक्येति संज्ञं प्रतिबोधितं; गूर्जरराष्ट्रे सुविशालेऽमारिः प्रवर्तिता; अनेकशतसङ्ख्या जिनालया निर्मापिताः; सोमनाथमहादेवाभिधशिव-तीर्थस्योद्धारकार्ये राजा प्रेरितस्तत्तीर्थपुनःस्थापनावसरे स्वयमुपस्थितं च। युगप्रभावकेनाऽनेन सूरिपादेन सर्वजनताया हितकराणि मूक-पशूनामभयदानि जैनधर्मस्योद्योतकारीणि च नैकानि महान्ति कार्याणि यथा कृतानि, तथैव तेन भगवता नानाविधशास्त्रनिर्माणकार्यमपि विद्वच्चेतश्चमत्कृतिकारकं विहितमेव ।

तद्विरचितेषु ग्रन्थेषु सिद्धहेमचन्द्राभिधं शब्दानुशासनं, काव्यानुशासनं, छन्दोनुशासनं, लिङ्गानुशासनं, वादानुशासनं, शब्दकोषद्वयं, संस्कृतद्व्याश्रय-महाकाव्यं प्राकृतद्व्याश्रयकाव्यं, स्तुतिकाव्यानि, योगशास्त्रम्-इत्यादयो ग्रन्थाः प्रमुखाः प्रसिद्धाश्च विद्याक्षेत्रे ।

तद्विरचित एको महान् ग्रन्थोऽयमप्यस्ति-त्रिषष्टिशलाकापुरुषचरितमहा-काव्यम् । प्रायः ३६०००श्लोकमितो ग्रन्थोऽयं जैनपुराणप्रबन्धसन्निभो महाकाव्यलक्षणोपेतश्च । ग्रन्थेऽत्र जैनधर्मस्वीकृततीर्थङ्कर-चक्रवर्ति-वासुदेव-बलदेव-नारदादीनां शलाकापुरुषाणां चरितवर्णनं विशदं विहितमस्ति । जैनसंघे एतदध्ययनाध्यापनप्रचारोऽविरतं बहुशतवर्षेभ्यः प्रचलति ।

संस्कृताध्ययनकर्तॄणां विद्यार्थिनां बोधवैशद्यार्थमेतस्य काव्यग्रन्थस्या-ऽध्ययनं नितरामावश्यकम् । जैनसिद्धान्तानां सुखबोधार्थं जैनेतिहासस्य च ज्ञानार्थमप्येतदध्ययनमतीवोपयोगि । परन्तु महाकाव्यस्याऽस्याऽध्ययने सर्वे जना न समर्था भवेयुः । मन्दबोधानां सारल्योत्सुकानां चाऽभ्यासिनामेतस्या-ऽध्ययनं बहुधा दुरूहमपि स्यादेव । एतादृग्जनान् मनसि निधाय आचार्य-पादश्रीविजयशुभङ्करसूरिवर्येण ग्रन्थस्यैतस्य सरलीकरणाय तदर्थं चाऽस्य

पद्यात्मकं महाकाव्यप्रौढिसमलङ्कृतं च स्वरूपं गद्यात्मकं वर्णनादिबाहुल्य-मुक्तं च निर्मितं कृपापरीतचेतसाऽस्मत्प्रगुरुवरेण ।

ग्रन्थोऽयं पञ्चाशद्वर्षेभ्यः पूर्वं मुद्रित आसीत् । परमस्य न सञ्जातस्तादृक् प्रचारो येन सर्वेऽभ्यासोत्सुका जना लाभान्विताः स्युः । सम्प्रति चाऽप्राप्योऽयं ग्रन्थः । अतः श्रीहेमचन्द्राचार्यपादानां सूरिपदनवमशताब्द्या वर्षे वि.सं. २०६६तमं यदाऽऽगतं तदा तेषां स्मरणाञ्जलिरूपेण ग्रन्थोऽयं पुनः सम्पादन-विषयीकृत्य मुद्रापणीय इति सङ्कल्प उदितोऽस्मश्चित्ते । साधवः प्रेरिता एतदर्थम् । पूज्यपादश्रीगुरुभगवद्भिः श्रीविजयसूर्योदयसूरिभिरपि सानन्द-मनुज्ञातमेतदर्थे । ततो मुनिश्रीधर्मकीर्तिविजयेन सम्भालितमेतत्कार्यम् । तस्य भक्तिभावितमानसस्य परिश्रम इदानीं फलान्यावहतीति महानानन्दविषयः ।

ग्रन्थोऽयं संस्कृताभ्यासिनां यथोपकारकः, तथैव जैनधर्मविषयकं सम्यग् ज्ञानं प्राप्तुमिच्छुकानां जिनादिमहापुरुषचरितानां जिज्ञासूनां च कृतेऽपि नितान्त-मुपयोगी स्यादेवेति निश्चप्रचम् ।

ग्रन्थसम्पादनकार्ये यदि काऽपि स्खलनाऽस्ति तदर्थमस्माकं प्रमाद एवोपालम्भार्हः । श्रीहेमचन्द्राचार्यभगवतां गद्यात्मकसारोद्धारकर्तृणां चाऽऽशयतो विपरीतं चेत् किमप्यागतं स्यादत्र, तदर्थं मिथ्यादुष्कृतं दत्त्वा क्षमाप्रार्थिनो वयमिति शम् ।

सं. २०६७

आश्विन शुदि-१, सुरेन्द्रनगरे — **शीलचन्द्रविजयः**

• • •



# विषयानुक्रमः

## दशमं पर्व

### प्रथमः सर्गः


| विषयः | पृ. |
| --- | --- |
| मङ्गलम् | १ |
| नयसारस्य सम्यक्त्वलाभो देवलोकगमनं च | २ |
| मरीचेः सम्यक्त्वव्रतप्रतिपत्तिः | ३ |
| मरीचेः क्लेशभयात् त्रिदण्डधारणम् | ३ |
| भरतस्य मरीचिवन्दनम् | ४ |
| मरीचेर्नीचगोत्राख्यकर्मोपार्जनम् | ४ |
| मरीचेर्व्याधिः शिष्यार्थं चिन्ता च | ४ |
| कपिलस्य मरीचिशिष्यता, मरीचेः साङ्ख्यदर्शनप्रचारश्च | ५ |
| मरीचेर्देवादिभवभ्रमणम् | ५ |
| विश्वभूतेर्व्रतग्रहणम् | ७ |
| विश्वभूतेर्विशाखनन्दिमारणनिदानकारणम् | ७ |
| रिपुप्रतिशत्रुनृपस्य स्वकन्यया परिणयः | ८ |
| त्रिपृष्ठजन्म | ८ |
| त्रिपृष्ठेन हयग्रीवदूतघर्षणम् | ९ |
| त्रिपृष्ठेन तुङ्गगिरिसिंहवधः | ९ |
| हयग्रीववधः, त्रिपृष्ठस्याऽर्धचक्रित्वं च | १० |
| त्रिपृष्ठस्य नरकगमनमचलस्य परमपदप्राप्तिश्च | ११ |
| प्रियमित्रस्य जन्म | १२ |
| प्रियमित्रस्य चक्रित्वम् | १२ |
| प्रियमित्रस्य देवत्वम् | १३ |
| नन्दननृपस्य तीर्थकृन्नामकर्मोपार्जनं देवभवश्च | १४ |

विषयः पृ.

## द्वितीयः सर्गः

वीरजिनस्य देवानन्दागर्भावतारः ........ १५
शक्रचिन्ता ........ १५
देवानन्दा-त्रिशलयोर्गर्भपरिवर्त्तनम् ........ १६
प्रभुणाऽङ्गुलीचालनेन मातुश्चिन्तापनोदः ........ १७
वीरजिनस्य गर्भेऽभिग्रहग्रहणम् ........ १७
वीरजिनस्य जन्म, सूतिकर्म, देवेन्द्रस्नपनं, शक्रशङ्कानिरासश्च ........ १७
प्रभोर्नामकरणम् ........ १८
वीरप्रभोः स्वधीरतया देवजयः ........ १९
वीरप्रभोर्व्याकरणोपदेशः ........ १९
वीरप्रभोस्तारुण्यं यशोदया विवाहश्च ........ २०
वीरजिनस्य कन्याजन्म, तद्विवाहः, पित्रोर्मरणं च ........ २१
प्रभोर्नन्दिवर्द्धनबोधनं भावयतित्वं च ........ २१
वीरजिनस्य दीक्षाग्रहणं ........ २३

## तृतीयः सर्गः

वीरविभोर्विप्राय वस्त्रार्धदानम् ........ २४
विप्रस्य द्वितीयार्धार्थं प्रभोरनुगमनम् ........ २४
शक्रेण प्रभोर्गोपकृतोपसर्गनिवारणं,
मृत्यूपसर्गनिवारणाय सिद्धार्थव्यन्तरप्रेरणं च ........ २५
प्रभोः षष्ठपारणं, मासचतुष्टयं यावदुपसर्गसहनं च ........ २६
प्रभोर्मोराकसन्निवेशे वर्षाकालगमनमुटजनाशात्
कुलपतेस्तदुपालम्भश्च ........ २६
वीरप्रभोरस्थिकग्रामगमनं शूलपाणियक्षकथा च ........ २८
वीरप्रभोः शूलपाणियक्षकृतोपसर्गः, प्रभोश्चाऽक्षोभः,



विषयः पृ.

सिद्धार्थस्य शूलपाणिप्रबोधनम् ........ २९
प्रभोर्दशस्वप्नदर्शनमुत्पलमुनेस्तत्फलकथनं,
प्रभोरन्यत्र विहारश्च ........ ३१
मोराके सिद्धार्थदेवकृताऽच्छन्दकस्याऽप्रतिष्ठाऽच्छन्दकेन
प्रभोः प्रार्थना च ........ ३३
सोमद्विजस्य प्रभोर्देवदूष्यद्वितीयार्धप्राप्तिः ........ ३५
दृग्विषसर्पस्य पूर्वभववृत्तान्तः ........ ३५
प्रभोः सर्पकृत उपसर्गः, प्रभुणा प्रबोधितस्य सर्पस्य
शान्तस्याऽनशनेन स्वर्गमनं च ........ ३७
प्रभोरुत्तरवाचाले नागसेनगृहे पारणं, नद्यां नावमारुढस्य
तस्य नागकुमारकृत उपसर्गश्च ........ ३८
जिनदास-साधुदास्योः कम्बल-शम्बलाख्यवृषभद्वयपोषणम् ........ ३९
कम्बल-शम्बलयोर्नागकुमारता ........ ४१
नैमित्तिकस्य प्रभुं भिक्षुकं दृष्ट्वा शास्त्रनिन्दनं, शक्रस्य
नैमित्तिकतोषणं च ........ ४१
प्रभोर्नालन्दायां वर्षानिवासः ........ ४२
गोशालस्य जन्मवृत्तान्तः, प्रभोर्विजयानन्द-सुनन्दगृहे पारणं,
गोशालस्य प्रभोः शिष्यत्वप्रतिपत्तिस्तत्सेवनं च ........ ४२
गोशालस्य नियतिवादग्रहः ........ ४४
प्रभोः कोल्लाकग्रामे बहुलविप्रगृहे पारणम् ........ ४४
प्रभोर्गोशालस्य शिष्यत्वेन स्वीकारः ........ ४४
गोशालस्य पायसालाभाद् नियतिवाददाढ्यम् ........ ४५
भिक्षाया अलाभेनाऽपमानितगोशालशापादुपनन्दगृहदाहः,
प्रभोर्नन्दगृहे पारणं च ........ ४५

**विषयः** **पृ.**


प्रभोश्चम्पायां वर्षाकालगमनं, कोल्लाके रात्रौ प्रतिमया स्थितिः ............. ४५
गोशालस्य सिंहेन ग्रामणीपुत्रेण कुट्टनं, प्रभोः पत्रकालग्रामे
प्रतिमया स्थितिश्च ................................................................ ४६
कूपनयेन मुनिचन्द्रसूरिवधो, गोशालस्य पार्श्वशिष्यैर्विवादश्च ............... ४७
सगोशालस्य प्रभोरारक्षैः पीडनम् ............................................... ४९
पार्श्वशिष्याभ्यां मोक्षणं चम्पापुर्यां वर्षावासश्च ................................ ४९
गोशालस्य दरिद्रस्थविरैर्विडम्बनम् ............................................. ४९
प्रभोः श्रावस्तीगमनं च ........................................................... ५०
गोशालस्य मनुष्यमांसभक्षणं, व्यन्तरेण तत्प्रदेशदाहश्च ....................... ५०
प्रभोरग्निना पाददाहः ............................................................ ५१
गोशालस्य ग्राम्यैस्ताडनम् ....................................................... ५१
प्रभोर्ग्राम्यैः क्षमणम् ............................................................. ५२
गोशालस्य ग्राम्यैः कुट्टनं, व्यन्तरैर्मण्डपदाहश्च ............................... ५२
प्रभोः कालहस्तिना बन्धनं, मेघेन मोक्षणं च ................................... ५२
प्रभोरनार्यदेशे कर्मक्षपणम् ...................................................... ५३
शक्रेण चौरवधः ................................................................... ५३
गोशालस्य सदाव्रतान्नभोजनेन तृप्तिः, प्रभोर्जम्बूखण्डग्रामे
प्रतिमया स्थितिः ................................................................. ५४
नन्दिषेणमुनेः स्वर्गप्राप्तिः ....................................................... ५४
प्रभोरारक्षैस्ताडनं, मोक्षणं, क्षमणा च .......................................... ५४
गोशालस्य प्रभुसङ्गत्यागो, राजगृहं प्रतिगमनं,
प्रभोर्वैशालीगमनं च ............................................................. ५४
गोशालस्य चौरैण विडम्बनम् ..................................................... ५५
गोशालस्य प्रभोरन्वेषणम् ........................................................ ५५




**विषयः** **पृ.**


शक्रेण प्रभोर्जिघांसोः कर्मारस्य वधः ......................................... ५६
शालिशीर्षग्रामे प्रभोः कटपूतनाकृतोपसर्गः, परमावधिज्ञानं,
गोशालसङ्गमो भद्रिकापुर्यां चतुर्मासयापनं च ................................. ५६


## चतुर्थः सर्गः


कुण्डकग्रामे गोशालस्य ग्राम्यैः कुट्टनम् ....................................... ५८
मर्दनग्रामे ग्राम्यैर्गोशालस्य कुट्टनं, प्रभोर्व्यन्तरीकृतोपसर्गश्च ................. ५८
उत्पलेन नृपात् प्रभोर्मोचनं च ................................................... ५९
वागुरभद्रावृत्तान्तः .............................................................. ५९
गोशालस्य जनैः कुट्टनम् ......................................................... ६०
म्लेच्छदेशेषु प्रभोरुपसर्गसहनम् ................................................ ६०
वैशिकायनस्य तन्मातुर्वैशिकायाश्च वृत्तान्तः .................................. ६२
गोशाले वैशिकायनप्रयुक्ततेजोलेश्यायाः प्रभुणा शीतलेश्यया
निवारणं, वैशिकायनस्य प्रभुक्षमापना, प्रभुणा गोशालस्य
तेजोलेश्यालाभोपायकथनं च .................................................... ६४
गोशालस्य प्रभुभाषिता तिलविषयभविष्यत्प्रतीतिः .............................. ६४
गोशालस्य तेजोलेश्यासाधनं, पार्श्वशिष्येभ्योऽष्टाङ्गनिमित्त-
ज्ञानलाभश्च ...................................................................... ६५
प्रभोर्नाविककृतोपसर्गः .......................................................... ६५
प्रभोरानन्दकृता भक्तिः .......................................................... ६५
प्रभोः प्रतिमात्रयकरणं, पर्युषितान्नेन पारणं, बहुकाया
दासीभावाद् मुक्तिश्च ............................................................ ६६
सङ्गमसुरस्य प्रभोः प्रतिकूलोपसर्गकरणम् ...................................... ६७
सङ्गमसुरस्य प्रभोरनुकूलोपसर्गकरणम् ......................................... ६९
पराजितस्य देवस्य पश्चात्तापः, प्रभोः क्षमापनं च ............................ ७१

| विषयः | पृ. |
|---|---|
| प्रभोर्गोपालिकादत्तोषितपरमान्नेन पारणं, विद्युत्कुमारेण प्रभोरचिरादेव केवललाभनिवेदनं च | ७२ |
| प्रभोः श्वेतवीपुर्यां हरिसिंहेन वन्दनादिकं, शक्रप्रेरणया लोकैर्महिमकरणं च | ७२ |
| वीरप्रभोः कौशाम्बी-वाराणसी-राजगृह-मिथिलापुर्यां विहारः सूर्यादिभिर्वन्दनं च | ७३ |
| वैशाल्यां प्रभोश्चतुर्मासक्षपणपारणं, जीर्णश्रेष्ठ्यभिनवश्रेष्ठिवृत्तान्तश्च | ७३ |
| वीरप्रभोः सुंसुमारपुरोद्याने प्रतिमाधारणं, बिभेलग्रामे पूरणस्य संन्यासो, बालतपश्चरणं, चमरेन्द्रत्वं च | ७५ |
| चमरस्य शक्रात् पराजयः, वीरप्रभुं प्रति पलायनं च | ७७ |
| वीरप्रभावाच्चमरेन्द्रस्य वज्रात् त्राणं, सपरिवारस्य तस्य वीरभक्तिश्च | ७७ |
| वीरप्रभोर्भोगपुरगमनं, माहेन्द्रक्षत्रियस्य सनत्कुमारेण भर्त्सनं च | ७८ |
| वीरप्रभोः कौशाम्ब्यां दुष्कराभिग्रहेण चतुर्मासीयापनम् | ७९ |
| प्रभोरभिग्रहापूर्त्तेर्भिक्षानादानं, तेन मृगावती-शतानीक-नन्दा-सुगुप्तादीनां चिन्ता च | ७९ |
| शतानीकेन चम्पापुरीभङ्गो, दधिवाहनस्य पलायनमौष्ट्रि-केणाऽपहृताया धारिण्या मरणं, वसुमत्या धनावहेन क्रयणं मूलायाः समर्पणं च | ८० |
| चन्दनाया मूलया सेर्ष्यया निगडबन्धः | ८२ |
| धनवाहनस्य चन्दनायाः पृच्छा, दासीवचनेन ज्ञात्वा तस्यै कुल्माषदानं तन्निगडबन्धोच्छेदोद्यमश्च | ८२ |
| चन्दनायाः प्रभोः कुल्माषप्रतिलम्भनं, श्रेष्ठिगृहे दिव्यपञ्चकं च | ८३ |





| विषयः | पृ. |
|---|---|
| चन्दनायाः इन्द्रकृतं सन्मानं, लोकानां तत्परिचयः, प्रभोः पारणं, इन्द्रेण तस्याः प्रभोः शिष्यत्वकथनं, मूलाया नरकगतिश्च | ८३ |
| प्रभोः समुद्‌गलादिग्रामेषु विहारो, भायालवणिजः सिद्धार्थ-प्रेरणया स्वयं वधः, स्वातिदत्तद्विजस्य प्रतिबोधः, शक्रादि-कृतवन्दनादिकं च | ८४ |
| प्रभोर्गोपालेन कर्णयोः शलाकारोपोपसर्गः, सिद्धार्थ-खरकाभ्यां शलाकाकर्षणं च | ८५ |


**पञ्चमः सर्गः**


| | |
|---|---|
| श्रीवीरजिनस्य केवलोत्पत्तिः, शासनदेवतासन्निधानं च | ८८ |
| वीरप्रभोरपापापुर्यां गमनं, तत्र समवसरणे देशना च | ८८ |
| इन्द्रभूत्यादीनां परिचयः | ८९ |
| इन्द्रभूतेः गर्वः | ९० |
| इन्द्रभूतेः प्रव्रज्या, धर्मोपकरणग्रहण-समर्थनं च, वीरजिनेन जीवसाधनं च | ९१ |
| वीरजिनेन कर्मसाधनमग्निभूतेः प्रव्रज्या च | ९२ |
| श्रीवीरेण जीव-देहयोरभेदखण्डनं, वायुभूतेः प्रव्रज्या च | ९३ |
| वीरप्रभोः शून्यवादखण्डनं, व्यक्तस्य प्रव्रज्या च | ९३ |
| श्रीवीरेणेहभव-परभवयोः सादृश्यखण्डनं, सुधर्मणः प्रव्रज्या च | ९३ |
| प्रभुणा बन्ध-मोक्षसमर्थनं, मण्डिकस्य व्रतग्रहणं च | ९४ |
| प्रभुणा देवसाधनं, मौर्यपुत्रस्य प्रव्रज्या च | ९४ |
| प्रभुणा नारकसाधनमकम्पितस्य दीक्षाग्रहणं च | ९४ |
| प्रभुणा पुण्य-पापसमर्थनमचलभ्रातुर्दीक्षाग्रहणं च | ९४ |
| प्रभुणा परलोकसाधनं, मेतार्यस्य प्रव्रज्या च | ९४ |
| प्रभुणा मोक्षसमर्थनं, प्रभासस्य प्रव्रज्या च | ९५ |

**विषयः** **पृ.**


चन्दनायाः प्रव्रज्याग्रहणम् ........ ९५

द्वादशाङ्गादिनिर्माणवृत्तान्तः ........ ९५


**षष्ठः सर्गः**


प्रसेनजिन्नृपपरिचयः ........ ९७

सुमङ्गलस्य राज्याभिषेकः, सेनकस्य पुरान्निर्गमनं च ........ ९७

सेनकस्य तापसव्रतग्रहणं, सुमङ्गलस्य तन्निमन्त्रणं,
सेनकस्य कोपान्निदानकारणं, सेनक-सुमङ्गलयोर्वानमन्तरत्वं च ........ ९७

श्रेणिकजन्म, नागस्य पुत्रचिन्ता, तत्पत्न्याः सुलसायाः
पुत्रार्थमर्हदाराधनं च ........ ९९

सुलसायै देवेन पुत्रार्थं गुटिकादानम् ........ १००

सुलसाया द्वात्रिंशत्पुत्रजन्म, तेषां श्रेणिकस्य सख्यं च ........ १००

नृपेण कुमारपरीक्षणं, श्रेणिकस्य तदुत्तीर्णता च ........ १०१

श्रेणिकस्य भंभासार इत्यपरनामकरणं, प्रसेनजिन्नृपेण
राजगृहनगरनिर्माणं च ........ १०२

वेणातटपुरे श्रेणिकस्य वणिक्कन्यया नन्दया विवाहः ........ १०२

प्रसेनजिन्नृपस्य मृत्युः, श्रेणिकस्य राज्याभिषेकोऽभय-
कुमारस्य जन्म च ........ १०३

अभयकुमारस्य पितुरन्वेषणार्थं राजगृहनगरगमनं च ........ १०४

अभयकुमारस्य श्रेणिकसङ्गो, मन्त्रिमुख्यत्वादिकं,
नन्दायाः श्रेणिकमहिषीत्वं च ........ १०५

चेटकनृपस्य सप्तानां कन्यकानां वृत्तान्ते सुज्येष्ठायाः
श्रेणिके प्रीतिरभयबुद्ध्या श्रेणिकेन चिल्लणापहरणं,
सुज्येष्ठाया दीक्षाग्रहणं च ........ १०५

श्रेणिकस्य चिल्लणया विवाहः ........ १०९




**विषयः** **पृ.**


अभयेन सुतमरणसन्तप्तसुलसा-नागबोधनम् ........ १०९

चिल्लणाया दुर्दोहदपूरणम् ........ १०९

कूणिकस्य हल्ल-विहल्लयोश्च जन्म, कूणिकस्य पद्मावत्या
परिणयश्च ........ ११०

मेघकुमारजन्म ........ ११०

नन्दिषेणस्य जन्म ........ १११

सेचनकहस्तिवृत्तान्तः ........ १११

वीरजिनस्य राजगृहे समवसरणं, श्रेणिकादीनां सम्यक्त्वादि-
प्रपत्तिश्च ........ ११३

वीरजिनेन मेघकुमारस्य व्रतग्रहणम् ........ ११३

वीरजिनेन मेघकुमारस्य स्थिरीकरणं, तस्य देवत्वं च ........ ११३

नन्दिषेणस्य दीक्षाग्रह-त्यागौ, वेश्यया सहवासश्च ........ ११४

नन्दिषेणस्य पुनर्दीक्षाग्रहो देवत्वं च ........ ११५


**सप्तमः सर्गः**


श्रेणिकस्य चेल्लणाशीलसंशयोऽभयकुमारेण बुद्ध्याऽन्तः-
पुरदाहनिवारणं च ........ ११६

श्रेणिकेनाऽभयकुमारबुद्धिप्रशंसनम् ........ ११७

व्यन्तरेण चिल्लणार्थमेकस्तम्भप्रासादनिर्माणम् ........ ११८

मातङ्गपतेरुद्यानाम्रफलग्रहणम् ........ ११८

अभयस्य चौरान्वेषणे श्रेष्ठिकन्याकथावर्णनम् ........ ११८

अभयेन चौरोपलक्षणे नृपेण मातङ्गपतेर्विद्याग्रहणम् ........ १२०

श्रेणिकपृष्टेन प्रभुणा दुर्गन्धाया बालिकायाः पूर्वभववर्णनम् ........ १२१

दुर्गन्धबालिकायाः श्रेणिकेन विवाहः ........ १२२

दुर्गन्धबालिकाया व्रतग्रहणम् ........ १२२

**विषयः** **पृ.**

श्रेणिकस्याऽऽर्द्रकनृपं प्रत्युपायनप्रेषणम् ...................................... १२३
आर्द्रककुमारस्याऽभयकुमारमैत्रीच्छयोपायनप्रेषणम्........................... १२३
अभयस्याऽऽर्द्रककुमारप्रतिबोधेच्छयाऽर्हत्प्रतिमाप्रेषणम् .................... १२४
आर्द्रककुमारस्य जातिस्मरणात् पूर्वभवस्मरणं जिनभक्तिश्च ................ १२४
आर्द्रककुमारस्याऽऽर्यदेशं गत्वा मुनिलिङ्गग्रहणं,
वसन्तपुरे प्रतिमाग्रहणं च ...................................................... १२६
श्रीमत्या वरोपलक्षणार्थं मुनिपादवन्दनम् ..................................... १२७
आर्द्रककुमारमुनेः श्रीमतीस्वीकारस्तयोः पुत्रोत्पत्तिः,
तत्स्नेहाद् मुनेर्गृहवासश्च .......................................................... १२८
आर्द्रककुमारमुनेर्गृहत्यागः ...................................................... १२८
विवादे आर्द्रककुमाराद् गोशालस्य पराजयः ................................. १२९
आर्द्रककुमारेण हस्तिमोक्षणं, तापसप्रबोधनं च............................. १३०
आर्द्रककुमारेण श्रेणिकस्य एव तर्कुतन्तुपाशमोक्षण-
वृत्तान्तकथनम् .................................................................... १३१
आर्द्रककुमारमुनेरभयाय कृतज्ञताज्ञापनं वीरसेवया मुक्तिश्च ............... १३१


**अष्टमः सर्गः**


ब्राह्मणकुण्डग्रामे वीरप्रभोः समवसरणं, देवानन्दर्षभदत्तयोः
स्वपितृत्वेन ख्यापनं च........................................................ १३२
वीरप्रभोर्देशना, देवानन्दर्षभदत्तयोर्दीक्षाग्रहणं मोक्षश्च ....................... १३२
जमालि-प्रियदर्शनयोर्दीक्षाग्रहणम् ............................................. १३३
जमालेः प्रभोः पृथग्भूय विहारः............................................... १३४
जमालेः स्थविरेण सह क्रियमाणं कृतमिति जिनवचनविषये
पूर्वपक्षोत्तरपक्षौ, जमालेर्दुर्मताग्रहश्च........................................... १३४
जमालेर्निह्नववादित्वात् सङ्घबहिष्कारः ........................................ १३६





**विषयः** **पृ.**

ढङ्केन प्रियदर्शनाया बोधनं, जमालेर्मरणं च ................................ १३७
प्रभुणा जमालेर्गत्यादिकथनम्.................................................... १३७
साकेतपुरे चित्रकरेण यक्षतोषणं, वरग्रहणं च ................................ १३८
शतानीकेन चित्रकरस्यांऽगुष्ठछेदनं, तेन प्रतिकारेच्छया
प्रतिज्ञाकरणम् ...................................................................... १३९
चित्रकरेण मृगावत्यर्थं चण्डप्रद्योतस्य प्रेरणं, चण्डप्रद्योतस्य
शतानीकं प्रत्यभियानं, भयात् शतानीकस्य मरणं च .................... १४०
मृगावत्याः कपटेन प्रद्योतेन स्वपुरप्राकारनिर्माणादिकं
प्रद्योतस्य पुरीरोधश्च ............................................................. १४१
स्वर्णकारस्य स्त्रीपञ्चशतीपरिणयः, सर्वेषां मृत्युश्च ........................ १४२
स्वर्णकारादिपराभववृत्तान्ते चौरपञ्चशतीकथा, चौराणां
प्रव्रज्याग्रहणं च.................................................................... १४२
मृगावत्यादीनां प्रव्रज्या ......................................................... १४४
आनन्दश्रेष्ठिनः सपत्नीकस्य गृहिधर्मप्रपत्तिः .............................. १४४
आनन्दस्य भाविभवकथनम्..................................................... १४५
कामदेवश्रेष्ठिनो गृहिधर्मप्रपत्तिः ............................................... १४५
चुलुनीपितुस्तत्पत्न्याश्च श्रावकधर्मग्रहणम्.................................... १४६
सुरादेवस्य सपत्नीकस्य श्रावकधर्मादिग्रहणम्............................... १४६
चुल्लशतिकस्य सभार्यस्य श्रावकधर्मादिग्रहणम् ............................ १४६
शब्दालपुत्रस्य श्रावकधर्मग्रहणम्............................................... १४७
गोशालस्य शब्दालपुत्रेणाऽसत्कारः ........................................... १४८
महाशतकस्य श्रावकधर्मादिप्रपत्तिः ........................................... १४८
नन्दिनीपितुर्लान्तकापितुश्च श्रावकधर्मादिग्रहणम् ........................... १४८
मृगावत्याश्चन्दनायाश्च केवलोत्पत्तिः.......................................... १४९

**विषयः** **पृ.**


प्रभुणा दशाश्चर्यवर्णनम् ........ १४९
वीरप्रभोर्गोशालस्य च श्रावस्तीगमनं, गोशालस्य कोपः ........ १४९
गोशालस्याऽऽनन्दभर्त्सनम् ........ १५०
लोभिवणिक्पञ्चककथा ........ १५०
प्रभुणा स्वशिष्यस्य गोशालप्रेरणनिषेधः, तेजोलेश्यया सर्वानुभूतिमुनिमृत्युः ........ १५२
गोशालस्य प्रभौ तेजोलेश्यया प्रतिनिवृत्तया सन्तापश्च ........ १५२
गोशालस्य विचेष्टितमयंपुलसंशयच्छेदश्च ........ १५३
गोशालस्य पश्चात्तापो मृत्युश्च ........ १५४
वीरेण गोशालस्य भाविभवकथनं, महापद्मनृप-सुमङ्गल-मुनिकथा च ........ १५५
गोशालस्य पूर्वभववर्णनम् ........ १५७
प्रभोर्गोशालतेजोलेश्याजनितातिसारादिरोगशान्तिः ........ १५८


**नवमः सर्गः**


हालिकस्य गौतमोपदेशाद्दीक्षाग्राहणं, प्रभोर्दर्शनाद्दीक्षात्यागश्च ........ १६०
प्रभोर्गौतमप्रश्नोत्तरदानम् ........ १६०
प्रसन्नचन्द्रस्य दीक्षाग्रहणम् ........ १६१
प्रसन्नचन्द्रस्याऽध्यवसायान्तरं केवलोत्पत्तिश्च ........ १६२
प्रभुणा विद्युन्मालिदेवस्य भाविजम्बूभववर्णनं, केवलोच्छेदकथनं च ........ १६२
कुष्ठिकस्य वीरप्रभुसेवनं, श्रेणिकप्रश्नश्च ........ १६३
सेडुकस्य शतानीकनृपप्रसादलाभः ........ १६३
सेडुकस्य कुष्ठरोगः, पुत्रादिनाऽपमानं च ........ १६५
सेडुकेन पुत्राणां कुष्ठरोगकरणं, स्वस्य नीरोगता च ........ १६५




**विषयः** **पृ.**


सेडुकस्य भेकभवो, देवत्वं, श्रेणिकपरीक्षणं च ........ १६६
प्रभुणा श्रेणिकादेः क्षुते देवोक्तिफलकथनम् ........ १६७
प्रभुणा श्रेणिकस्य नरकोद्धारोपायकथनम् ........ १६७
श्रेणिकस्य देवेन परीक्षा हार-गोलकदानादि च ........ १६७
श्रेणिकस्य कपिलया साधवे भिक्षां दापयितुं, कालसौकरिकेण हिंसां त्याजयितुं च निष्फलप्रयासः ........ १६८
साल-महासालयोः प्रव्रज्या ........ १६९
गागलेर्दीक्षा, सालादीनां पञ्चानां केवललाभश्च ........ १६९
गौतमस्याऽष्टापदगमनम् ........ १७०
गौतमस्याऽष्टापदे सुरादिभ्यो धर्मदेशना, तपस्विनां मेखलावस्थानं च ........ १७०
पुण्डरीकस्य राज्यकरणं, कण्डरीकस्य प्रव्रज्या च ........ १७१
कण्डरीकस्य दीक्षात्यागो, राज्यग्रहणं, पुण्डरीकस्य व्रतग्रहणं च ........ १७२
कण्डरीकस्य मृत्युः ........ १७२
पुण्डरीकस्य देवत्वम् ........ १७३
कुबेरसामानिकदेवस्य पुण्डरीकाध्ययनग्रहणम् ........ १७३
तापसानां गौतमपार्श्वे दीक्षाग्रहणं, केवलोत्पत्तिश्च, दत्तादीनां कौण्डिन्यादीनां च केवलोत्पत्तिः ........ १७३
प्रभोर्गौतमप्रबोधनं, द्रुमपुत्रीयाध्ययनव्याख्यानं च ........ १७४
प्रभोः सुलसायाः सन्देशोऽम्बडस्य तत्परीक्षणं च ........ १७४


**दशमः सर्गः**


दशार्णभद्रस्य शक्रसमृद्धिदर्शनेनाऽभिमानभङ्गो, दीक्षाग्रहणं च ........ १७७
धन्यापुत्रवृत्तान्ते तन्मरण-शालिभद्रजन्म-विवाहवृत्तान्तः ........ १७८

**विषयः** **पृ.**


शालिभद्रस्यैहिकसुखवर्णने श्रेणिकस्य तद्गृहागमनं,
शालिभद्रस्य संवेगश्च ........ १७९
शालिभद्रस्य व्रतेच्छा ........ १८१
धन्य-शालिभद्रयोर्व्रतग्रहणम् ........ १८२
धन्य-शालिभद्रयोः प्राग्जन्ममात्रा दधिपारणं,
अनशनप्रतिपत्तिश्च ........ १८३
धन्य-शालिभद्रयोर्देवत्वम् ........ १८४


**एकादशः सर्गः**


लौहखुरचौरवृत्तान्तः ........ १८५
रौहिणेयचौरस्याऽनिच्छतोऽपि वीरवचनैकदेशश्रवणम् ........ १८६
रौहिणेयचौरस्याऽभयकुमारबुद्ध्या सैन्यैर्ग्रहणम् ........ १८७
नृपेण रौहिणेयस्य गुप्तिप्रेषणं, तत्प्रवृत्त्यन्वेषणं च ........ १८७
रौहिणेयस्य स्वर्गसुखप्रपञ्चनेनाऽपि चौर्यप्रवृत्त्यनु-
पलम्भो, मोक्षणं च ........ १८८
रौहिणेयस्य प्रबोधः, प्रव्रज्या, देवत्वं च ........ १८९
अभयबुद्ध्या प्रद्योतस्य पराजयः ........ १९०
गणिकायाः प्रद्योतसभायामभयं बद्ध्वाऽऽनयनप्रतिज्ञा,
राजगृहगमनमभयेन वार्तालापश्च ........ १९१
गणिकया छलेनाऽभयं बद्ध्वाऽवन्त्यानयनं,
प्रद्योतेन तस्य काष्ठपञ्जरे क्षेपश्च ........ १९२
अभयबुद्ध्या लोहजङ्घस्य मृत्युनिवारणं, प्रद्योतेनाऽभयस्य
वरप्रदानं च ........ १९३
प्रद्योतेन वासवदत्ताध्यापनार्थं छलेनोदयनग्रहणमुदयनस्य
वासवदत्ताध्यापनं च ........ १९४




**विषयः** **पृ.**


वासवदत्तोदयनयोः प्रेम, दाम्पत्यं च ........ १९५
वत्सराजस्य वासवदत्तामपहृत्य पलायनम् ........ १९६
प्रद्योतसैन्यानामुदयनमनलगिरिजेनाऽनुधावनं, वत्सराजस्य
स्वबुद्ध्या कौशाम्बीगमनं च ........ १९७
प्रद्योतस्योदयनस्य जामातृत्वेन स्वीकारश्च ........ १९७
अवन्त्यामभयकुमारबुद्ध्या वह्नेरमङ्गलस्य चोपशान्तिः ........ १९७
प्रद्योतेनाऽभयस्य मोक्षणम् ........ १९८
अभयेन बुद्ध्या प्रद्योतं बद्ध्वा राजगृहनयनं, श्रेणिकेन
ससत्कारं तन्मोक्षणं च ........ १९९
अभयेन बुद्ध्या साधूपद्रावकलोकप्रबोधनम् ........ १९९
नागिलदेवप्रतिबोधितस्य विद्युन्मालिदेवस्य
वीरप्रतिमानिर्माणम् ........ २००
देवनिर्मितप्रतिमायाः प्रभावतीकृता पूजा ........ २०३
नृपस्य दुर्निमित्तदर्शनं, प्रभावत्या दीक्षाभावना च ........ २०४
प्रभावत्या व्रतग्रहणं देवत्वं च ........ २०५
उदायनस्य देवबुद्ध्या सम्यक्त्वलाभः ........ २०५
गान्धारस्य गुटिकाप्राप्तिः, प्रव्रज्या च ........ २०६
कुब्जाया गुटिकाप्रभावात् सुरूपता, प्रद्योतेन विवाहश्च,
प्रद्योतस्य जिनप्रतिमानिर्मापणं च ........ २०६
कश्यपमृत्युः, कपिलस्य विद्याग्रहणं, दास्यामनुरागश्च ........ २०७
कपिलस्य दासीप्रयोजनव्यावृत्तस्य भवस्वरूपचिन्ता-
वैराग्य-दीक्षा-कैवल्यानि ........ २०९
कपिलेन चौरपञ्चशतीबोधनम् ........ २१०
कपिलेन प्रतिमाप्रतिष्ठा, प्रद्योतेन तत्प्रतिमाया

| विषयः | पृ. |
|---|---|
| वीतभयपुरनयनं, दास्या अवन्त्यागमनं च | २१० |
| भायलस्य प्रतिमाप्राप्त्यादिकथा | २११ |
| उदायेन प्रद्योतनिग्रहः, प्रतिमया वीतभयपुरनाशकथनं च, दशपुरनगरख्यातिश्च | २१२ |
| प्रद्योतस्य मुक्तिः | २१४ |
| भायलपुरख्यातिः | २१४ |
| उदायनस्य देवोपदेशः | २१४ |
| उदायनस्य शुभध्यानम् | २१५ |
| केशिनो राज्याप्तिरुदायनस्य व्रतग्रहणं च | २१५ |
| **द्वादशः सर्गः** | |
| उदायनस्य विषभक्षणाद्रोगः, कैवल्यं, मृत्युर्वीतभयनगरस्य पांशुवृष्ट्या नाशः, कुम्भकारकृतनगरोत्पत्तिश्च | २१६ |
| अभीचेरसुरत्वं भाविमुक्तिश्च | २१७ |
| देवाधिदेवप्रतिमाप्रकटनप्रस्ताव-भाविकुमारपालराज्यवर्णनम् | २१८ |
| कुमारपालस्य धर्मपालनं शासनं च | २१९ |
| कुमारपालस्य देवाधिदेवप्रतिमाखाननप्राप्तिप्रतिष्ठाः | २१९ |
| अभयकुमारस्य प्रव्रज्या देवत्वं च, नन्दायाः प्रव्रज्या च | २२० |
| कूणिकेन बलाद्राज्यग्रहणं, श्रेणिकस्य कारावासदुःखं च | २२१ |
| कूणिकस्य पुत्रजन्म, तद्वात्सल्यं च | २२२ |
| बाल्ये पितुः स्वस्मिन् वात्सल्यं मातुः सकाशाज्ज्ञात्वा कूणिकस्य पितृवात्सल्योदयः, श्रेणिकस्य मृत्युश्च | २२३ |
| कूणिकस्य पितृशोकनिराकरणार्थं चम्पापुरीनिर्माणम् | २२५ |
| हल्ल-विहल्लयो रत्नापहारादिभिया वैशालीपलायनम् | २२६ |
| चेटकसमीपे दूतप्रेषणम् | २२६ |





| विषयः | पृ. |
|---|---|
| कूणिक-चेटकयोर्युद्धे कालकुमारवधः | २२७ |
| कूणिकस्य देवाराधनं, देवेन तस्य वरप्रदानं च, वरुण-तन्मित्रस्य चाऽऽराधनापूर्वकं मरणम् | २२८ |
| चेटकबाणमोघता, तस्य दुर्गाश्रयणं, सेचनकगजमरणं, हल्ल-विहल्लयोर्दीक्षा च | २३० |
| कूणिकस्य प्रतिज्ञा, मागधिकाद्यन्वेषणं च | २३२ |
| कूलवालकमुनिकथा | २३२ |
| मागधिकया कूलवालकमुनिवशीकरणम् | २३४ |
| कूलवालकमुनिप्रपञ्चेन वैशालीभङ्गः | २३६ |
| कूणिकाच्चेटकयाचनम् | २३६ |
| चेटकस्य मृत्युः, कूणिकस्य प्रतिज्ञापूर्त्तिश्च | २३६ |
| प्रभोः कूणिकस्य स्वनरकगतिप्रश्नो, दिग्विजयार्थं निर्गतस्य च तस्य चक्रिमन्यस्य मृत्युः | २३७ |
| उदायिनो राज्यशासनं, धर्मपालनं च | २३८ |
| प्रभोः परीवारेयत्तावर्णनम् | २३८ |
| **त्रयोदशः सर्गः** | |
| वीरप्रभोः पुण्यपालस्य स्वप्नादृष्टफलकथनम् | २४० |
| पूर्णनृपकथा | २४२ |
| श्रीवीरप्रभोर्भविष्यकथने कल्किचरिते साधुपीडन-देवताकोप-नगरप्लावन-सुभिक्षवर्णनम् | २४४ |
| कल्किनो मृत्युर्दत्तस्य प्रजापालनं च | २४६ |
| अर्हत्काले भरतक्षेत्रसौभाग्यवर्णनम् | २४७ |
| पञ्चमारके भविष्यत्प्रजास्थितिवर्णनम् | २४७ |
| षष्ठारादि-दूषमाकालवर्णनं, दुष्प्रसहाद्याचार्यादिवर्णनं च | २४८ |

**विषयः** **पृ.**

एकान्तदूषमाकालप्रजास्थितिवर्णनम्............................................ २४९
उत्सर्पिणीप्रारम्भवर्णनम्........................................................ २५०
दुषमान्ते भाविकुलकर-जिन-चक्र्यादिवर्णनम्............................ २५०
केवलादुच्छेदकथनम्............................................................ २५२
प्रभोर्गौतममोहभङ्गव्यवसायः .................................................... २५२
वीरप्रभोर्निर्वाणम्................................................................ २५३
देवैः प्रभोर्निर्वाणमहिमा-दंष्ट्रादिग्रहणं, प्रभोरायुःकालकथनं च .......... २५५
गौतमस्य कैवल्यम् ............................................................. २५६
सुधर्मणो मुक्तिश्च................................................................ २५६
जम्बूस्वामिनो मुक्तिर्ग्रन्थस्य सम्प्रदायशुद्धिश्च ................................ २५७
कठिनशब्दार्थः .................................................................. २५८

• • •

॥ अर्हम् ॥

॥ श्रीनेमि-विज्ञान-कस्तूर-यशोभद्रसूरिसद्गुरुवरेभ्यो नमः ॥

# त्रिषष्टिशलाकापुरुषचरितम्-

## गद्यात्मकसारोद्धारः

## श्रीमहावीरचरितम्

## दशमं पर्व

## प्रथमः सर्गः

**समवाप्य यस्य शरणं शक्रादपि नो बिभेति चमरेन्द्रः ।**
**स त्रिभुवनजननाथो वीरजिनो मे भवतु शरणम् ॥**

अथाऽस्मिन्नेव **जम्बूद्वीपे प्रत्यग्विदेहे महावप्रे** विजये **जयन्ती** नाम पूर्यस्ति। तत्र च महैश्वर्यसम्पन्नः **शत्रुमर्दनो** नाम राजा बभूव। तस्य **पृथिवीप्रतिष्ठाना**ख्ये ग्रामे स्वामिभक्तो **नयसारो** नाम ग्रामणीरासीत्। स च साधुसङ्गतिमप्राप्याऽपि कृत्यकर्मणे गुणग्राहको बभूव । स एकदा काष्ठार्थं नृपाज्ञया शकटान् गृहीत्वा पाथेयमादाय महाटवीं गतवान्। तस्मिंस्तत्र वृक्षांश्छेदयति मध्याह्नो जातः। गगनेऽग्निरिव सूर्यः प्रदीप्तवान् । तदानीं च कालज्ञैस्तस्य भृत्यैर्मण्डपाकारवृक्षतले रसवत्युपनीता ।

ततो **नयसारः** 'क्षुत्-तृषार्त्तोऽतिथिर्भोजनीय' इतीतस्ततोऽवलोकयामास । तदानीमेव च क्षुधा-तृष्णाकुलाः क्लान्ताः सार्थान्वेषयन्तो धर्मप्रतिमूर्त्तय इव साधवः समाययुः । ततो ग्रामणीः स 'साध्विमेऽतिथयोऽत्र मे समागता' इति तान् प्रणम्याऽब्रवीत्- 'तत्रभवन्तो भगवन्तः कथमत्र गहने वने प्राप्ताः, शस्त्रिणोऽप्येकाकिनोऽत्र न भ्रमन्ति' । ततस्ते ऊचुः-'वयं स्थानात् सार्थेन सह प्रस्थिताः । किन्त्वस्मासु भिक्षार्थं ग्रामे प्रविष्टेषु सार्थो जगाम । तस्माद् वयं भिक्षामगृहीत्वैव सार्थस्याऽनुपदं प्रस्थिता अस्मिन् कान्तारे संनिपतिताः' । ततो **नयसारः** पुनरब्रवीत्-'अहो ! सार्थोऽतिनिर्दयो यत् सह प्रस्थितान् सार्थविश्वस्ताननागमय्यैव निजकार्यातुरो जगाम । यूयं मत्सुकृतैरिहाऽऽगता ममाऽतिथयः' ।

एवमाभाष्य स तान् भोजनस्थानमुपनीय स्वार्थं कल्पितैरन्न-पानाद्यैः प्रत्यलाभयत् । ते मुनयश्चाऽप्यन्यत्र गत्वा विधिपूर्वकम-भुञ्जन्त । ग्रामरक्षकश्चाऽपि स्वयं भुक्त्वा तानुपगम्य प्रणम्योवाच-भवन्तः प्रतिष्ठन्तु, युष्माकं ग्राममार्गं दर्शयिष्यामि ।

ततस्ते तेन सह प्रस्थिताः पूर्मार्गं प्राप्य वृक्षतले समुपविश्य तस्य **नयसार**स्य धर्मं जगुः । स च तेन सम्यक्त्वं प्रतिपद्य कृतकृत्यं मन्यस्तान् नत्वा वलित्वा नृपाय काष्ठानि प्रेष्य स्वयं ग्राममगात् । तत्र च तदारभ्य स मनस्वी **नयसारो** धर्ममाचरन् सप्त तत्त्वानि चिन्तयन् सम्यक्त्वं पालयन् कालं गमयामास । अन्ते च पञ्चनमस्कारं स्मरन् विपद्य **सौधर्मे** कल्पे पल्योपमायुः सुरो बभूव ।

❀ ❀ ❀

इतश्चाऽत्रैव **भरते** पुरा सुरै**र्युगादिनाथ**स्य कृतायां **विनीता**यां नगर्यां श्री**ऋषभ**स्वामिपुत्रस्य नवनिधीश्वरस्य चक्रिणो **भरत**स्य स



**नयसार**जीवः **सौधर्मा**च्च्युत्वा मरीचिविकरणाद् **मरीचि**रिति ख्यातः पुत्रो बभूव । स च **ऋषभ**स्वामिन आद्ये समवसरणे पितृ-भ्रात्रादिभिः सह गतः । तत्र सुरैः प्रभोः क्रियमाणं महिमानं प्रेक्ष्य धर्मं श्रुत्वा सम्यक्त्वं प्रपद्य व्रतं ललौ । ततः प्राप्तमुनिधर्मः, स्वदेहेऽपि निःस्पृहः, पञ्चसमितस्त्रिगुप्त, एकादशाङ्गानि पठन् प्रभुणा सह चिरं विजहार ।

अथाऽन्यदा स ग्रीष्मर्त्तौ तीव्रातपे तप्तधूलिके स्वेदार्द्रमलिन-वस्त्रयुगस्तृषार्त्तश्चारित्रमोहनीयोदयाद् दुर्मतिश्चिन्तयामास-"भवाभिनन्दी दुर्गुणोऽहं दुर्वहान् साध्वाचारान् वोढुं न शक्तः, व्रतत्यागे च लोकलज्जा । अथवाऽयमुपायो येन खेदो न स्यात्-अमी श्रमणास्त्रिदण्डविरताः, मम दण्डग्लानस्य त्रिदण्डलाञ्छनमस्तु, अमी केशलुञ्चनाद् मुण्डा अहं क्षुरमुण्डः शिखावान् स्याम्, अमी महाव्रतधरा ममाऽणुव्रतमस्तु, अमी निष्परिग्रहा मम मुद्रादिकं परिग्रहमस्तु, अमी निर्मोहा मोहावृतस्य मम छत्रमावरणमस्तु, अमी विनोपानहं चरन्ति मम पादत्राणार्थमुपानहौ स्ताम्, अमी शीलेन सुगन्धयः शीलेन दुर्गन्धस्य मे सौगन्ध्याय श्रीखण्डतिलकाद्यस्तु, अमी शुक्लवस्त्रा निष्कषाया मम कषायवशस्य काषायाणि वासांसि भवन्तु, अमी जीवहिंसानिवृत्ता जलारम्भं त्यजन्ति मम चाऽल्पेन जलेन स्नानाद्यस्तु" ।

एवं मुनिलिङ्गनिर्वाहाय स स्वबुद्ध्या बहु विकल्प्य क्लेशभीरुः साधुभावं प्रपन्नवान् । तं च तथालिङ्गं दृष्ट्वा सर्वो जनो धर्ममपृच्छत् । सोऽपि जिनोदितं धर्ममुपादिदेश । 'स्वयं किमेतद् नाऽऽचरसी'ति लोकैः पृष्टश्च **मेरु**भारतुल्यमिमं धर्मं वोढुमशक्तोऽस्मी'ति जगाद । तथा धर्मोपदेशप्राप्तप्रतिबोधान् भव्यान् शिष्यान्

स्वामिने नाभिपुत्राय समर्पयामास । एवमुक्तप्रकाराचारः स **मरीचिः** प्रभुणा सह विजहार । प्रभुश्च पुन**र्विनीता**यां पुरि समवासार्षीत् ।

अथ तत्र समवसरणे **भरत**चक्रवर्तिना स नतिपृष्टः प्रभु**रादिनाथो** भविष्यतो जिनान् चक्रिणो वासुदेवान् प्रतिवासुदेवान् बलभद्रांश्च समाख्यत् । ततो **भरतः** पुनः पप्रच्छ-''प्रभो ! किमत्र समवसरणे वर्त्तमानः कश्चिदिह **भरत**क्षेत्रे भवानिव जिनो भावी ?'' ततः प्रभु**र्मरीचिं** दर्शयन्नुवाच-''अयं तव पुत्रोऽन्तिमो **वीर**नामा जिनो भावी । स **मरीचिः पोतन**पुरे **त्रिपृष्ठा**ख्यो वासुदेवो, **विदेहे**षु **मूका**पुर्यां **प्रियमित्र**नामा चक्री च भविष्यति । ततो **भरतः** प्रभुमापृच्छ्य **मरीचिं** त्रिः प्रदक्षिणीकृत्य वन्दित्वा 'यद्यपि ते साधुत्वं न वन्दनीयं तथाऽपि वासुदेवश्चक्र्यर्हंश्च त्वं भावीति वन्द्यसे' इत्युक्त्वाऽऽ**दिनाथं** प्रणम्य मुदितः स्वां पुरीं प्रविवेश ।

अथ **मरीचिः** स्वामिनोक्तं श्रुत्वा मोदात् त्रिपदीं त्रिरास्फोटयन्नुवाच-'यद्यहं भावी वासुदेवश्चक्री जिनश्च, अलमन्येन । अहं विष्णूनां, मम पिता चक्रिणां, पितामहश्चाऽर्हतामाद्य इत्यहो ममोत्तमं कुलम्' । एवं जातिमदं कुर्वन् भुजावास्फोटयन् स **मरीचि**र्नीचगोत्राख्यं कर्मोपार्जितवान् । स **ऋषभ**प्रभुनिर्वाणानन्तरं मुनिभिः सह विहरन् भव्यान् प्रबोध्य साधुसमीपं प्रेषितवान् ।

अन्यदा च स **मरीचि**र्व्याधिभिराक्रान्तोऽनाचारीति साधुभिररक्ष्यमाणः खिन्नोऽचिन्तयत्-अहो ! अमी मुनयो निर्दयाः, स्वार्थपरायणा, लोकाचारविमुखा, दाक्षिण्यशून्याश्च । यतो मां गुरुभ्रातरं विनीतं स्निग्धं परिचितं चाऽपि नाऽवलोकन्ते तदा पालनस्य कथा तु दूरापास्ता । अथवा ममेदं दुर्ध्यानं, यतोऽमी स्वदेहेऽपि निर्मोहाः,



तन्मम दुश्चारित्रस्य पालनं कथं कुर्वन्तु ? तस्माद् व्याधिमुक्तः स्वसेवकं कञ्चित् स्वलिङ्गेनाऽनेनैव शिष्यं करिष्यामि । एवं चिन्तयन् स कर्मवशाल्लब्धस्वास्थ्योऽभवत् ।

अथाऽन्यदा तस्य **मरीचे**र्धर्मार्थी **कपिला**ख्यः कुलपुत्रको मिलितः । स च **मरीचि**नाऽऽर्हतं धर्मं ज्ञापितः । ततः स्वयं किं न करोषीति पृष्टो **मरीचि**रवदत्-''अहमेनं धर्मं चरितुं न शक्तः'' । ततः **कपिलः** पुनः पप्रच्छ-''किं त्वन्मार्गे धर्मो न विद्यते ?'' ततो **मरीचि**स्तं जिनधर्मे मन्दादरं ज्ञात्वा शिष्यं कर्तुमिच्छन्नुवाच-जैने मम मार्गेऽपि च धर्मो विद्यते' । ततः **कपिल**स्तच्छिष्योऽभूत् ।

**मरीचि**श्च मिथ्याधर्मोपदेशहेतुकमब्धिकोटिकोटीभवमुपार्जितवान् । तदनालोच्यैव कृतानशनो **मरीचि**र्विपद्य **ब्रह्मलोके** दश सागरोपमायुर्देवोऽभवत् । **कपिल**श्चाऽ**प्यासुरि**प्रभृतीन् शिष्यान् विधाय निजाचारानुपदिश्य च विपद्य **ब्रह्मलोके** सुरोऽभूत् । स **मरीचि**श्चाऽवधेः प्राग्जन्म ज्ञात्वा मोहाद् भुवमागत्याऽऽ**सुर्या**दीन् स्वयं कृतं **साङ्ख्य**मतं प्रबोधितवान् । सुखसाध्यत्वाच्चाऽत्र लोके तदारभ्य **साङ्ख्यं** दर्शनं प्रावर्त्तत ।

अथ **मरीचि**जीवश्च्युत्वा **कोल्लाक**ग्रामे **कौशिक**नामा पूर्वलक्षाशीतिजीवितो द्विजोऽभूत् । तत्र स सर्वदा विषयी द्रव्योपार्जनपरायणो हिंसादिष्वनिवृत्तः कालं गमयामास । अन्ते च त्रिदण्डी भूत्वा विपद्य बहून् भवान् भ्रान्त्वा **स्थूणा**ख्ये ग्रामे **पुष्यमित्रा**ख्यो द्विजोऽभूत् । तत्राऽपि त्रिदण्डी भूत्वा पूर्वलक्षद्वासप्ततिप्रमाणमायुरतीत्य च स **सौधर्मे** मध्यमस्थितिः सुरोऽभवत् । ततश्च्युत्वा स **चैत्य**ग्रामेऽ**ग्न्युद्योता**ख्यः पूर्वलक्षचतुष्षष्ट्यायुष्को द्विजस्त्रिदण्डी

जातः । ततो विपद्यैशाने मध्यमायुर्देवो भूत्वा ततश्च्युत्वा **मन्दिर**ग्रामेऽ**ग्निभूति**नामा द्विजोऽभवत् । तत्राऽपि षट्पञ्चाशत्पूर्वलक्षायुष्कस्त्रिदण्डी भूत्वा विपद्य **सनत्कुमारे** मध्यमायुर्देवो बभूव । ततश्च्युत्वा **श्वेताम्बी**पुर्यां **भारद्वाज**नामा द्विजश्चतुश्चत्वारिंशत्पूर्वलक्षायुस्त्रिदण्डी भूत्वा विपद्य **माहेन्द्र**कल्पे मध्यमस्थितिर्देवो जातः । ततश्च्युत्वा भवं भ्रान्त्वा **राजगृहे स्थावरा**ख्यश्चतुस्त्रिंशत्पूर्वलक्षायुष्कस्त्रिदण्डी भूत्वा विपद्य **ब्रह्मलोके** मध्यमायुः सुरो भूत्वा च्युत्वा बहून् भवानाट ।

❀ ❀ ❀

इतश्च **राजगृहे विश्वनन्दी**नामा नृपो बभूव । तस्य **प्रियङ्गु**नाम्न्यां पत्न्यां **विशाखनन्दी** नाम पुत्रोऽभवत् । तस्य नृपस्याऽनुजो **विशाख**भूतिर्युवराजोऽभूत् । तस्य च युवराजस्य **धारिणी** नाम पत्नी बभूव। **मरीचि**जीवश्च प्राक्कृतसुकृतप्रभावात् तस्य युवराजस्य तस्यां पत्न्यां **विश्वभूति**नामा सुतोऽभूत् । स च प्राप्तयौवनो **विश्वभूतिः पुष्पकरण्डके** वने **नन्दने** सुरकुमार इव सान्तःपुरो रेमे । राजपुत्रो **विशाखनन्दी** च क्रीडेच्छया वनाद् बहिरस्थात् । दास्यश्च पुष्पाद्यर्थं तत्र गतास्तौ तथा स्थितौ ददृशुः । **प्रियङ्गु**श्च तद्वृत्तान्तं ताभ्यो दासीभ्यो ज्ञात्वा कुपिता कोपगृहं जगाम । तदिष्टार्थं साधयितुं नृपोऽपि यात्राभेरीमवादयत् । तथा **पुरुषसिंहः** सामन्त उद्धत इति तत्साधनाय यास्यामीति सभायां कपटेनोवाच । तच्छ्रुत्वा च **विश्वभूतिः** सरलमतिर्वनादेत्य नृपं प्रणम्य भक्त्या निवार्य स्वयं प्रयाणमकरोत्। गत्वा च **पुरुषसिंहं** निदेशवर्त्तिनं ज्ञात्वा बलित्वा **पुष्पकरण्डकं** वनं प्राप ।



तत्र द्वारपालेन '**विशाखनन्दी** वनमध्येऽस्ती'ति निवेदितोऽचिन्तयत्-'माययाऽहं **पुष्पकरण्डका**दाकृष्टः' । ततः क्रुद्धः समुष्ट्या कपित्थं हत्वा तत्फलैरावृतां महीं दर्शयन् द्वाःस्थं जगाद-'भवतां सर्वेषां शिरांसि पातयामि, यदि ज्येष्ठे ताते मम भक्तिर्न भवेत् । किन्त्वीदृग्वञ्चनाप्रधानैर्भोगैर्ममाऽलमि'ति ब्रुवन् स गत्वा **सम्भूति**मुनिपार्श्वे व्रतं गृहीतवान् । तं प्रव्रजितं श्रुत्वा नृपः सानुजो गत्वा नत्वा क्षमयित्वा च राज्याय प्रार्थयते स्म । किन्तु **विश्वभूतिं** निरीहं ज्ञात्वा च नृपो गृहं जगाम । स च गुरुणा सहाऽन्यत्र विजहार ।

अथ स तपःकृशो गुर्वनुज्ञयैकाकी विहरन् **मथुरां** नगरीं प्राप। तदानीं च **विशाखनन्दी मथुरा**नृपसुतां परिणेतुं तत्राऽऽययौ । **विश्वभूति**श्च मासान्तपारणाय नगरीं प्रविश्य शिबिरसमीपमागतः । **विशाखनन्दी** च तं द्विषमिव दृष्ट्वाऽकुप्यत् । तदानीमेव चैकया गवा प्रक्षिप्तो **विश्वभूति**रपतत् । तं तथाभूतं दृष्ट्वा च **विशाखनन्दी** 'क्व ते कपित्थपातनबलमि'त्युपजहास । ततः कोपाद् **विश्वभूति**र्गां शृङ्गयोर्गृहीत्वा भ्रमयन् 'अस्य मृत्यवे भवान्तरेऽनेन तपसा भूयिष्ठबलो भूयासमि'ति निदानमकरोत् । तदनालोच्यैव च कोटिवर्षायुरतीत्य विपद्य **महाशुक्रे** उत्तमायुः सुरोऽभवत् ।

❀ ❀ ❀

इतश्चाऽत्रैव **भरते पोतन**पुरे **रिपुप्रतिशत्रु**र्नाम नृपोऽभूत् । तस्य **भद्रा**ख्यायां पत्न्यां चतुःस्वप्नसूचितोऽ**चलो** नाम बलभद्रः पुत्रो **मृगावती** नाम पुत्री च बभूवतुः । सा प्राप्तयौवनाऽप्रतिमरूपा पितरं प्रणन्तुं गता । नृपश्च तामवलोक्य जातानुरागस्तां निजक्रोडे कृत्वा तत्पाणिग्रहणोपायं विचिन्त्य व्यसृजत् । ततो नगरवृद्धानाहूय नृपः

पप्रच्छ-'यदत्र रत्नं जायते तत् कस्येति निर्णयं कथय' । 'तवे'ति तैः कथिते स नृपस्तत्र **मृगावतीं** परिणेतुमानाययत् । ततस्ते सर्वे पौरा लज्जिताः स्वस्थानं जग्मुः । राजा च गान्धर्वविवाहरीत्या **मृगावतीं** स्वयं परिणिनाय ।

ततो **भद्रा**देवी लज्जया क्रोधेन च परीता नृपं मुक्त्वाऽ**चले**न सह **दक्षिणापथं** जगाम । तत्र चाऽ**चलो** नवां **माहेश्वरीं** पुरीं निर्माय मातरं च तत्र संस्थाप्य पितुरन्तिकं जगाम । तज्जनकश्च स्वप्रजायाः पुत्र्याः पतिरिति लोकैः **प्रजापति**नाम्ना कथितः ।

अथ **विश्वभूतिः शुक्रा**च्च्युत्वा **मृगावत्यां** कुक्षौ सप्तस्वप्न-सूचितवासुदेवभावोऽवातरत् । **मृगावती** च यथासमयं प्रथमं वासुदेवं सूनुं सुषुवे । स च पृष्ठे त्रिकरण्डकसद्भावात् **त्रिपृष्ठ** नाम्ना ख्यातः । अशीतिधनुरुत्तुङ्गः सोऽ**चले**न सह क्रीडन् सकलकला-कलापज्ञो यौवनं प्रपेदे ।

अथ **विशाखनन्दि**जीवो भवं भ्रान्त्वा **तुङ्ग**गिरौ सिंहभावमाप्य **शङ्खपुर**देशमुपाद्रवत् । तदानीमेव च प्रतिविष्णुनाऽ**श्वग्रीवे**ण नृपेण 'मम कुतो मृत्युरि'ति पृष्टो निमित्तज्ञः प्राह-यस्तव दूतं **चण्डवेगं** धर्षयिष्यति, **तुङ्ग**गिरिसिंहं च लीलया हनिष्यति, तत एव तव मृत्युः" । ततो **हयग्रीवः शङ्ख**पुरे शालीन् वापयित्वा तद्रक्षार्थं नृपानादिशत् । तदानीमेव च **प्रजापतेः** पुत्रौ महावीर्याविति श्रुत्वा तस्मै केनचिद् निमित्तेन दूतं **चण्डवेगं** प्रैषीत् । स च सङ्गीतं कारयतः **प्रजापतेः** सभां प्राविशत् । राज्ञा च गीतविघ्नभूतोऽपि सोऽभ्युत्थानादिना सत्कृतः । कुमारौ च मन्त्रिसकाशाद् **हयग्रीव**-स्याऽयं दूत इति ज्ञात्वा 'यदाऽयमितः प्रतिष्ठते, तदाऽऽवां निवेदनीयावि'ति स्वपुरुषमादिशताम् ।



स दूतश्चाऽन्यदा नृपेण सगौरवं सत्कृत्य विसृष्टः प्रस्थितवान् । कुमारौ च तन्निजपुरुषैर्ज्ञापितौ । ततः कुमारौ गत्वा मार्गार्धे निजभटैस्तं चारु ताडयामासतुः । दूतस्य सहायकाश्च काकनाशं नष्टाः । **प्रजापति**श्च तद्वृत्तान्तं ज्ञात्वा भीतस्तं दूतं पुनः स्वगृहमानाय्य सविशेषं सत्कृत्य चोवाच-"कुमारयोर्दुर्विनयं स्वामिनो **हयग्रीव**स्य न वाच्यम्" । स च तत् स्वीकृत्य ययौ । दूतसहायकाश्चाऽग्रतो गता **हयग्रीवा**य सर्वमाचख्युः । दूतोऽपि च नृपं ज्ञातवृत्तान्तं ज्ञात्वा भयात् सर्वं यथातथं कथयामास ।

ततो **हयग्रीवे**णाऽनुशिष्य प्रेषितो दूतो गत्वा 'सिंहाच्छालीन् रक्षे'ति नृपाज्ञां कथयामास । ततश्च शालिरक्षार्थं प्रस्थितं नृपं निषिध्य कुमारौ स्वयं सिंहयुद्धातुरौ **शङ्ख**पुरं जग्मतुः । तत्र च शालिरक्षकै-"र्वारक्रमेण चतुरङ्गसेनया वप्रं कृत्वा नृपाः शालीनगोपायन्नि"ति ज्ञात्वा तान् 'एवं शालिपाकपर्यन्तं कः स्थास्यति ? तत्सिंहं दर्शयत, येनाऽधुनैव तं निहन्मी'ति **त्रिपृष्ठो**ऽवोचत् । ततस्ते **तुङ्ग**गिरि-कन्दरलीनं तं सिंहं दर्शयामासुः । तौ चाऽ**चल-त्रिपृष्ठौ** रथारूढौ गुहां गत्वा लोकैः कोलाहलं कारयामासतुः । तच्छ्रुत्वा च जृम्भया व्यात्ताननः सिंहो गुहाया निर्गतवान् ।

तत**स्त्रिपृष्ठो** 'रथारूढेन मयाऽस्य पदातेः सिंहस्य युद्धं न सममि'ति खड्ग-चर्मधरो रथादवरुह्य शस्त्रिणाऽशस्त्रस्य युद्धमनुचितमिति शस्त्रं तत्याज । तद् दृष्ट्वा जातिस्मरणमाप्तः सिंहो गुहागमन-रथावरोहण-शस्त्रमोचनादिकं **त्रिपृष्ठ**स्य धार्ष्ट्यं ज्ञात्वा कुञ्जरमिवैनं हन्मीति विचिन्त्य विवृतमुखः फालां दत्त्वोत्पत्त्य **त्रिपृष्ठ**समीपं प्राप्तः । **त्रिपृष्ठ**श्चैकेन करेणोर्ध्वोष्ठमपरेणाऽधरोष्ठं च धृत्वा तं सिंहं जीर्णवस्त्रमिव विदारयामास । तदानीं च

सुरास्त्रिपृष्ठस्योपरि पुष्पाणि ववृषुः । लोकाश्च साधु साध्विति जगुः। सिंहश्च ''कथमहमद्याऽनेन कुमारेण हत'' इति क्रोधात् कम्पमानो विदारितोऽपि तस्थौ ।

ततस्त्रिपृष्ठस्य सारथिर्भाविनो गणधरस्य **गौतम**स्य जीवस्तं सिंहमवदत्-''त्वं पशुषु सिंहोऽयं च मनुष्येषु, तदनेन त्वं मारितः, तन्मनसि माऽवज्ञां कृथाः, न हीनेन हतोऽसि'' । ततस्तया वाण्या मुदितः स केसरी मृत्वा चतुर्थे नरके नारकोऽभवत् । तौ कुमारौ च तत्सिंहचर्म गृहीत्वा स्वनगरं प्रति प्रस्थितौ ग्राम्यान्-''**हयग्रीव**स्यैतद् वृत्तं निवेद्यतां, केसरीवधाच्च विश्वस्ताः तिष्ठन्तु, यथेष्टं शालीन् भुञ्जन्तु चे''त्युक्त्वा **पोतन**पुरं प्रापतुः । ग्राम्याश्च गत्वा **हयग्रीव**स्य सर्वं वृत्तान्तमाचख्युः ।

**हयग्रीव**श्च तज्ज्ञात्वा भीतस्तौ छलेनाऽपि जिघांसुर्दूतमनुशिष्य **प्रजापति**नृपं प्रति प्रेषितवान् । इतश्च गत्वा **प्रजापति**-नृपमवोचत्-''निजपुत्रौ स्वामिनोऽन्तिके प्रेषय, सोऽनयोः पृथक् पृथग् राज्यं दास्यति'' । ततः **प्रजापति**रुवाच-''स्वामिनमहं स्वयं यास्यामि, मम पुत्राभ्यां गताभ्यामलम्'' । ततो दूतोऽवोचत्-यदि त्वं पुत्रौ न प्रेषयिष्यसि, तर्हि युद्धाय सज्जीभव'' । ततः कुमारौ तं दूतं धर्षयित्वा निजपुराद् निरवासयत् । तेन च क्रुद्धो दूतो गत्वा **हयग्रीवा**य सर्वं वृत्तान्तं निवेदितवान् ।

ततः कोपादग्निरिव ज्वलितो **हयग्रीवः** ससैन्यः प्रस्थितवान् । **त्रिपृष्ठा-ऽचला**वपि युयुत्सू प्रस्थितौ **रथावर्त**गिरिं प्रापतुः । उभयोः सैन्यानि तत्र मिथो युयुधिरे । तत्र च सैन्येषु क्षीयमाणेषु तौ सैन्ययुद्धं निषिध्य **त्रिपृष्ठा-ऽश्वग्रीवौ** रथारूढौ स्वयमयुध्येताम् । तत्र विफलास्त्रोऽ**श्वग्रीव**स्त्रि**पृष्ठा**य चक्रं मुमोच । उरःस्थले



चक्रतुम्बेनाऽऽहतस्त्रि**पृष्ठ**श्च वेगोद्भ्रान्तशरभवत् पर्वतशिखरे पपात । क्षणेनैवोत्थाय च स तेन चक्रेणैव कमलनालवद् **हयग्रीव**स्य कण्ठं चकर्त्त ।

तदानीं च देवैर्दिवि पुष्पवर्षणपूर्वकम**चल-त्रिपृष्ठौ** प्रथमौ बलभद्र-वासुदेवावित्याघोषि । अन्ये च नृपास्तौ प्रणेमुः । तथा ताभ्यां **दक्षिणभरता**र्धं बलेन साधितम् । तथा **त्रिपृष्ठः** कोटिशिलां शिलामेकेन करेणोत्पाट्य मूर्ध्नि छत्रवल्लीलयैव धारयामास । ततः साधितभूमण्डलः स **पोतन**पुरं प्राप्तो देवैर्नृपैश्चाऽर्धचक्रिपदे-ऽभिषिक्तः ।

अथैकदा गायनश्रेष्ठास्तमुपाययुः । वात्रौ तेषु गायत्सु चैकदा **त्रिपृष्ठो** ''मयि शयाने इमे विस्रष्टव्या'' इति शय्यापालमुवाच। शय्यापालश्च **त्रिपृष्ठे** निद्रितेऽपि गीतलोभात् तान् न व्यसृजत् । **त्रिपृष्ठ**श्च गानशब्दाद् निद्राभङ्गात् कुपितः पृष्टाच्छय्यापालाद् मया गीतलोभाद् नेमे विसृष्टा इति ज्ञात्वा प्रभाते तस्य कर्णयोस्तप्तं त्रपु न्यक्षेपयत् । तेन च शय्यापालो मृतः । **त्रिपृष्ठ**श्च तेनोग्रकर्मणा वेदनीयं कर्म न्यकाचयत् । तथा सोऽन्यैरपि दुष्कर्मभिर्दुरदृष्टमबध्नात् । एवं महारम्भपरिग्रहरतो हिंसादिष्वविरतः स चतुरशीत्यब्दलक्षीं गमयामास । विपद्य च सप्तमनरकावनावुदपद्यत । **अचल**श्च तद्वियोगात् प्रव्रज्य विपद्य परमं पदं प्राप । **त्रिपृष्ठ**जीवः पुनर्नरकादुद्वृत्य केसरी भूत्वा विपद्य चतुर्थं नरकं प्राप्य तिर्यङ्-मनुष्यादिभवान् भ्रान्त्वा मानुषं जन्म प्राप्यैकदा शुभं कर्मोपार्जयत् ।

❀ ❀ ❀

अथ स **त्रिपृष्ठ**जीवोऽ**परविदेहे**षु **मूका**यां नगर्यां **धनञ्जय**-नृपस्य पत्न्या **धारिण्याः** कुक्षाववातरत् । सा च पूर्णे समये

चतुर्दशमहास्वप्नसूचितचक्रिभावं शुभलक्षणोपेतं पुत्रं सुषुवे । तस्य च बालस्य पितरौ **प्रियमित्र** इति नाम चक्रतुः । तथा स धात्रीभिर्लाल्यमानः क्रमेण वृद्धिमाप ।

अथ **धनञ्जय**नृपः संसाराद् निर्वेदमाप्य **प्रियमित्रं** राज्येऽभिषिच्य स्वयं व्रतं गृहीतवान् । प्रियामिव पृथिवीं पालयतः **प्रियमित्र**स्य च क्रमाच्चतुर्दशमहारत्नानि समजायन्त । ततः स षट्खण्डं **भरत**क्षेत्रं साधयितुं चक्रमनुसरन् पूर्वदिशं गत्वा **मागधं** तीर्थं प्राप्याऽष्टमतपः कृत्वा चतुर्थान्ते रथमारुरोह । ततस्स किञ्चिद् गत्वा धनुर्गृहीत्वा **मागधकुमार**मुद्दिश्य स्वनामाङ्कितं बाणं मुमोच । द्वादशयोजनान्यतिक्रम्य स बाणो **मागधेश**स्य पुरोऽपतत् । तेन कुपितोऽपि **मागधेश**स्तत्र बाणे चक्रिनामाङ्कितं विलोक्य शान्त उपहारानादाय **प्रियमित्र**मुपागम्य तवाऽऽदेशकरोऽस्मीति गगनस्थो ब्रुवन् पूजयामास । चक्री च तं सत्कृत्य विसृज्य च वलित्वा पारणं विधाय **मागधेश**स्याऽष्टाह्निकोत्सवं चकार ।

ततः प्रस्थाय दक्षिणस्यां **वरदामेशं** पूर्ववत् साधयित्वा प्रतीच्यां गत्वा **प्रभासतीर्थेशं** साधयित्वा **सिन्धुं** जगाम । तत्र तदष्टमतपसा **सिन्धुः** प्रत्यक्षीभूय तस्मै दिव्ये द्वे रत्न-भद्रासने भूषणानि च ददौ । ततः स **सिन्धुं** सत्कृत्य विसृज्य च चक्रमनुसरन् **वैताढ्यं** प्राप्याऽष्टमतपो विधाय **वैताढ्यकुमारं** वशगं विधाय ततः प्रस्थाय **तमिस्रां** गुहां गत्वाऽष्टमतपो व्यधात् सः । तत्र **कृतमालः** स्त्रीरत्नयोग्यमाभरणमुपायने चक्रिणे ददौ । चक्रिनिदेशाच्च सेनानीरत्नं चर्मरत्नेन **सिन्धुं** तीर्त्वा प्रथमनिष्कुटं साधयित्वाऽऽगत्य चक्रिशासनादष्टमतपो विधाय दण्डरत्नघातात् **तमिस्रा**गुहामुद्घाटयत् । ततश्चक्री गजरत्नमारुह्य तत्कुम्भे प्रकाशाय मणिरत्नं



स्थापयित्वा **तमिस्रां** प्रविश्य काकिणीरत्नेन पार्श्वयोर्गुहाप्रकाशाय मण्डलान्यालिखत् । ततो वार्धकिरत्नेन बद्धया पद्यया **चोन्मग्न-निमग्ना**ख्ये नद्यावुत्तीर्य स्वयमुद्घटितेनोत्तरद्वारेण ततो गुहातो निरीयाऽऽ**पात**नाम्नः किरातानजैषीत् । सेनानीरत्नेन च द्वितीयं **सिन्धु**निष्कुटमसाधयत् ।

ततो निवृत्य चक्रानुगश्चक्री **वैताढ्य**मागत्य द्वयोः श्रेण्योर्विद्याधरान् वशगान् विधाय सेनापतिनाऽष्टमतपः कृत्वा **गङ्गा**प्रथमनिष्कुटं चाऽसाधयत् । तथा स चक्री कृताष्टमतपो **गङ्गां** साधयित्वा सेनापतिनोद्घाटितकपाटया खण्डप्रपातगुहां कृत्वा **वैताढ्या**द्रेर्निर्गतवान् । तथा विहिताष्टमतपसस्तस्य चक्रिणो नैसर्पप्रमुखा नवाऽपि निधयो वशगा अभूवन् । तथा स सेनान्या **गङ्गा**या द्वितीयं निष्कुटं साधयित्वा वशीकृतषट्खण्ड**भरतो** निजां **मूकां** पुरीमागतवान् । ततस्तस्य देवैर्नरैश्च समहोत्सवं द्वादशवार्षिकश्चक्रित्वाभिषेकश्चक्रे । तथा स नीत्या प्रजाः पालयामास ।

अथैकदा **पोट्टिला**चार्य उद्याने समवासरत् । तत्समीपे च स चक्री धर्मं श्रुत्वा विरक्तो राज्ये सुतं न्यस्य प्रव्रज्य कोटिवर्षं यावद् दुष्करं तपस्तेपे । पूर्वलक्षचतुरशीत्यायुः स विपद्य **शुक्रे सर्वार्थसिद्ध**विमाने सुरोऽभवत् ।

❀ ❀ ❀

अथ ततश्च्युत्वा स **प्रियमित्र**जीवो **भरते छत्रा**यां नगर्यां **जितशत्रु**नृपस्य पत्न्या **भद्रा**देव्याः कुक्षितो **नन्दनो** नाम पुत्रो बभूव। **जितशत्रु**श्च प्राप्तयौवनं तं **नन्दनं** राज्ये न्यस्य विरक्तः प्राव्राजीत् । **नन्दन**श्च प्रजाः पालयन् जन्मतश्चतुरशीतिवर्षलक्षीमतीत्य

संसारनिर्विण्णः **पोट्टिला**चार्यसमीपे प्रव्रज्यामुपादाय मासोपवासैस्तप उत्कर्षयन् गुरुणा सह विजहार ।

अनतिचारं चारित्रं पालयंश्च स **नन्दन**मुनिर्वर्षलक्षं तपो विधायाऽर्हद्भक्त्यादिकैर्विंशतिस्थानकैस्तीर्थकृन्नामकर्मोपार्जयामास । अन्ते च कृतषोढाराधनः पञ्चनमस्कारं स्मरन् षष्टिं दिनान्यनशनं विधाय पूर्णपञ्चविंशतिवर्षलक्षायुर्विपद्य **प्राणते पुष्पोत्तर**नाम्नि विमाने उपपेदे । तत्र चाऽन्तर्मुहूर्त्ताद् देवो निष्पन्नः स देवदूष्यमपनीयोपविष्टो विमानं देवसमूहं देवर्द्धिं च विलोक्य विस्मितः 'केन तपसा मयेदं प्राप्तमि'त्यचिन्तयत् । अवधेश्च पूर्वभवं व्रतपालनं च ज्ञात्वाऽर्हद्धर्मस्यैव प्रभाव इति निश्चिकाय ।

अत्राऽवसरे च देवास्तं बद्धाञ्जलयः प्रोचुः-''स्वामिन् ! चिरं जय, त्वं नः स्वामी, इदं विमानं तव, वयं तवाऽऽदेशधराः, एता देवर्द्धीरुपभुङ्क्ष्व'' । ततः सकलशकरैर्देवैर्दिव्येन जलेनाऽभिषिक्तोऽलङ्कृतश्च व्यवसायसभां गत्वा पुस्तकं वाचयित्वा पुष्पादिकमादाय सिद्धायतनं जगाम । तत्राऽष्टोत्तरशतमर्हत्प्रतिमाः स्नपयित्वा पूजयित्वा वन्दित्वा समाहितः स्तुत्वा **सुधर्मां** गत्वा सङ्गीतमकारयत् । एवं तत्र विमाने भोगान् भुञ्जानो यथासुखं विजहार । स जिनकल्याणकेषु **विदेहा**दिषु गत्वा जिनान् ववन्दे । एवं स तत्र विंशतिसागरोपममायुःपर्यन्तेऽपि श्रिया दीप्यमानोऽपूरयत् ॥ १ ॥

*इति दशमे पर्वणि महावीरप्रभुपूर्वभववर्णनात्मकः*
*प्रथमः सर्गः ॥१॥*

## द्वितीयः सर्गः

अथाऽस्मिन् **जम्बूद्वीपे भरत**क्षेत्रे **ब्राह्मणकुण्ड**ग्रामाख्यो ब्राह्मणसन्निवेशोऽस्ति । तत्र कौडालसकुलोद्भव **ऋषभदत्त**नामा ब्राह्मणोऽभूत् । तस्य जालन्धरकुलोद्भवा **देवानन्दा**ख्या भार्याऽऽसीत् । **नन्दन**जीवश्च्युत्वाऽऽषाढशुक्लषष्ठ्यां चित्रास्थे चन्द्रे तत्कुक्षाववातरत् । सुखं शयाना **देवानन्दा** च तदानीं चतुर्दश महास्वप्नान् दृष्ट्वा प्रातः पत्ये समाख्यत् । ततः स विचार्याऽवोचत्-''वेदपारगः परमनैष्ठिकः पुत्रस्तव भविष्यतीतीमे स्वप्नाः सूचयन्ति''। ततो **देवानन्दा**कुक्षौ प्रभाववतीर्णे सति द्विजस्य महती समृद्धिर्जाता।

अथ तस्या गर्भे प्रभोर्द्व्यशीतिदिवसे जाते **सौधर्मेश**स्याऽऽसनमकम्पत । ततः सोऽवधिना प्रभुं **देवानन्दा**गर्भगतं ज्ञात्वा सिंहासनात् सद्य उत्थाय नत्वा शक्रो दध्यौ-''लोकगुरवो जिनास्तुच्छकुले दीनकुले भिक्षुककुले वा न जायन्ते, किन्तु मौक्तिकानि शुक्त्यादिष्विव तीर्थकरा इक्ष्वाकुप्रभृतिक्षत्रियवंशेष्वेवाऽवतरन्ति । तदिदं कर्मप्रभावादर्हतो नीचकुले जन्म । **मरीचि**भवे प्रभुणा कुलमदं कुर्वता नीचैर्गोत्राख्यं कर्मोपार्जितम् । कर्मप्रभावाद् नीचकुले जातानपि जिनानुत्तमकुले निवेशितुं मम सर्वदाऽधिकारोऽस्ति ।

अधुना **भरते** महीमहेलातिलकभूतं मत्पुरमिव **क्षत्रियकुण्ड**ग्रामाख्यं नगरं नानाचैत्यशोभितं, धर्माधारभूतमनाचारविहीनं, मुनिभिः

पवित्रितं, व्यसनिपौरैरस्पृष्टं तीर्थवत् पावनमस्ति । तत्र ज्ञातवंश्य इक्ष्वाकुसन्तानो धर्मपरायणः सप्ततत्त्वज्ञो न्यायपरः पितेव प्रजानां पालको दीनानामुद्धारकः शरणागतवत्सलः क्षत्रियश्रेष्ठः **सिद्धार्थो** नाम नृपोऽस्ति । तस्य च सतीशिरोमणिः पवित्राशयोत्तमगुणसम्पन्ना मायारहिता निसर्गसरला सुगृहीतनामधेया **त्रिशला** नामाऽग्रमहिषी वर्त्तते । सा चेदानीं गर्भवती वर्त्तते । तद्गर्भसञ्चारणाद् **देवानन्दा**या-**स्त्रिशला**याश्च गर्भपरिवर्त्तनं मया विधेयम्" । एवं विचार्य शक्रः शीघ्रं सेनापतिं **नैगमेषिण**माहूय गर्भपरिवर्त्तनं कर्तुमादिदेश । **नैगमेषी** च शक्राज्ञया तथा चकार ।

तदानीं च **देवानन्दा** शयाना पूर्वदृष्टान् चतुर्दश महास्वप्नान् मुखाद् निर्गच्छतो ददर्श । ततः सोत्थाय वक्षस्ताडयन्ती विवर्णा ज्वरपीडिता 'केनाऽपि मे गर्भो हृत' इति चिरं विललाप । आश्विन-कृष्णत्रयोदश्यां चित्रास्थे चन्द्रे च **नैगमेषी** प्रभुं **त्रिशला**गर्भस्थं चकार । तदानीं च **त्रिशला** चतुर्दशमहास्वप्नान् मुखे प्रविशतो ददर्श । प्रातश्चेन्द्रैः स्वपतिना निमित्तज्ञैश्च स्वप्नफलं ज्ञात्वा सा नितराममोदत ।

अथ तदारभ्य च प्रसन्ना **त्रिशला** लीलागृहेष्वपि सावधानं विहरमाणा दिव्यं गर्भं बभार । गर्भस्थे प्रभौ चेन्द्राज्ञया **जृम्भक**देवाः **सिद्धार्थ**नृपगृहे पुनः पुनर्निधानानि निदधुः । गर्भस्थप्रभुप्रभावात् सर्वमेव ज्ञातकुलं प्रचुरधन-धान्यादिसमृद्धं जातम् । **सिद्धार्थ**नृपस्या-ऽरिनृपाश्च स्वयमुपायनान्यादायाऽऽगत्य प्रणेमुः । प्रभुश्च मातुर्वेदना मा भूदिति गर्भे निष्परिस्पन्दमस्थात् । तथा प्रभोर्निर्व्यापारं गर्भेऽवस्थानाद् गर्भोऽस्ति न वेति माताऽपि निश्चेतुं न शशाक ।



तेन च **त्रिशला** चिन्तयामास-"मम गर्भो गलितः केना-ऽप्यपहृतो विनष्टः स्तम्भितो वा ? यद्येवं तर्हि जीवितेनाऽलम्" । एवमार्त्तध्यानवशात् सा विश्लथकेशाऽङ्गरागादिविरक्ता, करे कृतमुखपद्माऽऽभरणपरिहीणा, निःश्वासं मुञ्चन्ती, सखीष्वपि विरतवाग्व्यापारा, भोजनं शयनं च तत्याज । तदुदन्तं विज्ञाय **सिद्धार्थ**नृपस्तत्पुत्रो **नन्दिवर्धनः,** पुत्री **सुदर्शना** चाऽखिद्यन्त । ततः प्रभुः पित्रोस्तन्मनोदुःखं विज्ञाय गर्भज्ञानार्थमङ्गुलीं चालयामास । तत**स्त्रिशला** मद्गर्भोऽक्षत इति विज्ञाय मुदिता **सिद्धार्थ**नृपमपि गर्भस्पदनं निवेद्य मोदयामास ।

अथ गर्भस्थः प्रभुर्दध्यौ-"अदृष्टेऽपि मयि पित्रोर्महान् स्नेहः, तद्यद्यनयोर्जीवतोर्व्रतं ग्रहीष्यामि तदा नूनमेतौ स्नेहाख्यमोहादार्त्त-ध्यानमापन्नौ बह्वशुभं कर्मोपार्जयिष्यतः" । ततः सप्तमे मासि प्रभुः पित्रोर्जीवतोः प्रव्रज्यां न ग्रहीष्यामी'त्यभिग्रहं जग्राह ।

अथ **त्रिशला**देवी सार्धाष्टमदिनाधिकेषु नवमु मासेषु व्यतीतेषु दिक्षु प्रसन्नासु ग्रहेषूच्चस्थेषु पवनेऽनुकूलं वाति जगत्यानन्दमग्ने शुभशकुनेषु सत्सु चैत्रशुक्लत्रयोदश्यां चित्रागते चन्द्रे सिंहलाञ्छनं स्वर्णवर्णं पुत्रं जनयामास । तदानीं न **भोगङ्करा**दयः षट्पञ्चाशद्दि-क्कुमार्यः समागत्य प्रभोस्तन्मातुश्च सूतिकर्माणि सम्पादयामासुः । शक्रोऽप्यासनकम्पेन प्रभोर्जन्म विज्ञाय सद्यः सपरिच्छदः समाजगाम । जिनं तन्मातरं च दूरत एव प्रणम्य समीपमागत्य देव्या अवस्वाप-निकां दत्त्वा तत्पार्श्वे प्रभुबिम्बं निधाय पञ्चधाऽऽत्मानं विचक्रे । ततो यथा कल्पं भगवन्तमादाय **मेरौ** गत्वा**ऽतिपाण्डुकम्बला**यां शिलायां प्रभुमङ्के कृत्वा सिंहासनमधिष्ठितवान् । तथा तत्र प्रभुं स्नपयितुमन्येऽपीन्द्राः समागताः ।

आभियोगिकदेवैश्च तीर्थादिजलान्यानिन्यिरे । एतावज्जलराशिं प्रभुः कथं सहिष्यते ! इति शक्रशङ्कानिरासाय च प्रभुर्वामपादाङ्गुष्ठेन **मेरुं** लीलयाऽपीडयत् । तेन च **मेरोः** शिखराणि प्रभुं नन्तुमिवाऽनमन्, कुलपर्वताश्चाऽकम्पन्त, समुद्रा उच्चैरुच्छलन्ति स्म, पृथिवी च चकम्पे । ततश्च किमेतदिति चकितः शक्रः प्रभोर्लीलामवधिप्रयोगतो जानाति स्म । तेन च "प्रभो ! तवाऽसाधारणं माहात्म्यं मादृशः साधारणो जनः कथं जानातु, तन्मया यदन्यथा चिन्तितं तन्मिथ्यादुष्कृतं भूयादि"ति ब्रुवन् प्रभुं ननाम ।

अनन्तरं च देवेन्द्रैः पवित्रैस्तीर्थोदकैः प्रभोः समहोत्सवं स्नात्रं चक्रुः । **सौधर्मे**न्द्रोऽपि पश्चात् प्रभु**मीशाने**न्द्राङ्के निधाय स्नपयित्वा पूजयित्वाऽऽरात्रिकं विदधे । ततो भक्त्या स्तुत्वा च प्रभुमादाय मातुः पार्श्वे निधाय बिम्बमवस्वापनिकां च संहृत्य प्रभोरुपरि क्षौमं वासः कुण्डले श्रीदामगण्डकं च कृत्वा स्वस्थानं जगाम । शक्रादिष्टकुबेरप्रेरिता **जृम्भक**देवाश्च **सिद्धार्थ**नृपगृहे स्वर्णादिवसुधारा ववृषुः । नृपश्च पुत्रजन्मोत्सवे लोकान् कारागृहतोऽमोचयत् । तृतीये दिवसे च पितरौ पुत्रस्य चन्द्र-सूर्यबिम्बदर्शनं कारयामासतुः । षष्ठे दिवसे च सधवाभिः कुलाङ्गनाभिर्वेष-भाषारुचिराभिर्नृपो राज्ञी च रात्रिजागरणोत्सवं कारितौ ।

अथैकादशेऽह्नि राजा राज्ञी च जातकर्म कृत्वा द्वादशेऽह्नि सर्वान् ज्ञातिबान्धवानाहूय सत्कृतवन्तौ । ततः **सिद्धार्थ**नृपस्तानुवाच- "गर्भस्थेऽस्मिन् मम पुत्रे गृहे नगरे देशे च धन-धान्यादिसमृद्धिर्व्यवर्धत, तेनाऽस्य **वर्धमान** इति नामाऽस्तु । तेऽपि चैवमस्त्विति प्रत्यूचुः । शक्रश्च महोपसर्गैरप्यकम्प्योऽयमिति प्रभो**र्महावीर** इति नाम चकार ।

❀ ❀ ❀



अथ प्रभुर्भक्तैः सुरा-ऽसुरैः सेव्यमानोऽष्टोत्तरसहस्रलक्षणोपलक्षितः स्वभावतो गुणवृद्धः क्रमाद् वयसाऽपि वृद्धिमाप । एकदा चाऽपूर्णाष्टमवर्षः प्रभुर्वयस्यै राजपुत्रैः क्रीडितुं निर्गतः । तदानीं च शक्रोऽवधिना ज्ञात्वा धीरेषु **महावीरः** श्रेष्ठ इति प्रभुमवर्णयत् । तदसहिष्णुः कोऽपि सुरो **वीर**महं क्षोभयिष्यामीति ध्यात्वा प्रभुक्रीडास्थानमाजगाम ।

राजपुत्रैरामलकीं क्रीडां कुर्वाणे प्रभौ च सोऽमरो मायया सर्पीभूय तरोरधस्तात् तस्थौ । ततश्च राजपुत्रेषु त्रसित्वेतस्ततः पलायमानेषु प्रभुः स्मित्वा रज्जुमिव तं सर्पमुत्क्षिप्य भूमौ चिक्षेप । ततः कुमाराः सलज्जाः पुनस्तत्र क्रीडितुमाययुः । सोऽमरोऽपि कुमारीभूय तत्राऽऽययौ । सर्वे च तरुमारुरुहतुः । प्रभुश्चाऽन्यकुमारेभ्यः प्रागेव तरुशिखरं प्राप । तत्र च प्रभु**र्मेरु**शिखरे सूर्य इव शुशुभे । अन्यकुमाराश्च शाखासु लम्बमानाः कपय इव बभुः । तत्र च क्रीडायां प्रभुर्जितवान् । 'य इह जयेत् सोऽन्यान् पृष्ठमारुह्य वाहयेदि'ति पणवशाच्च प्रभुः कुमारान् पृष्ठमारुह्याऽवाहयत् । तथा प्रभुस्तस्य सुरस्याऽपि पृष्ठमारुरोह । ततः सोऽमरो भयङ्करं वेतालरूपं विकृत्य पर्वतमपि नीचैः कुर्वन्नवर्धिष्ट । तं च भयङ्करं वर्धनादविरमन्तं प्रभुर्मुष्टिना तत्पृष्टे हत्वा तं वामनमकरोत् । ततः सोऽमरः शक्रवर्णितां धीरतां परीक्ष्य स्वस्वरूपेण प्रभुं नत्वा निजं धाम जगाम ।

अथ पित्रा साधिकाष्टवर्षस्य प्रभोरध्यापने समारब्धे शक्रस्याऽऽसनमकम्पत । ततः शक्रोऽवधिज्ञानतस्तज्ज्ञात्वा जिनस्य शिष्यत्वमयुक्तमिति ध्यात्वा तत्राऽऽगत्योपाध्यायासने प्रभुमुपवेश्य प्रणनाम । प्रभुश्च शक्रप्रार्थनया शब्दपारायणं प्रोवाच । भगवतेन्द्राय

प्रोक्तं च तच्छब्दानुशासनमुपाध्यायः श्रुत्वा लोकेष्वैन्द्रमिदं शब्दानुशासनमिति कथयामास ।

अथ प्रभुः क्रमात् सप्तहस्तोन्नतशरीरो यौवनं प्राप । भगवतश्चाऽद्भुतं रूपं त्रिजगत्प्रभुत्वं नवं यौवनं चाऽपि विकाराय न प्राभवन्। इतश्च **समरवीरो** नृपो **वर्धमाना**य प्रदातुं निजां **यशोदां** नाम कन्यां मन्त्रिभिः सह प्रेषितवान् । मन्त्रिणश्चाऽऽगत्य नत्वा **सिद्धार्थ**नृपमूचुः-'**समरवीरो** नः स्वामी **वर्धमाना**य प्रदातुं निजां कन्यां प्राहिणोत्, मम स्वामी भवतो भृत्यः, तदनेन सम्बन्धेन तमनुगृहाण' । ततः **सिद्धार्थ**नृप उवाच-'कुमारोद्वाहाय मम **त्रिशला**याश्च भूयान् मनोरथोऽस्ति, परन्तु कुमारो जन्मतः संसारविरक्तो विवाहार्थं वक्तुमपि न शक्यते, तथाऽपि युष्माकमनुरोधात् तन्मित्रमुखेन विवाहार्थं कथयामि' । एवमुक्त्वा स **त्रिशला**देवीमापृच्छ्य **वर्धमानं** प्रतिबुद्धिशालिनस्तत्सुहृदः प्रेषयामास । ते च गत्वा नत्वा **वर्धमानाय सिद्धार्थ**नृपाज्ञां सविनयमूचुः ।

ततः प्रभुरुवाच-'यूयं मम सखायो विषयविरक्तं मम मनोभावं जानीथैव' । ततस्ते ऊचुः-'भवतो भवोद्विग्नं मनो जानीमः, तथा पित्रोराज्ञाऽलङ्घ्येत्यपि जानीमः, अस्माकं प्रार्थनया चाऽप्येतत् स्वीकुरु' । ततः प्रभुरुवाच-'अयमाग्रहो भवतो न युक्तः, यतो दारादिपरिग्रहो भवबाहुल्यहेतुः, पित्रोर्दुःखं मा भूदित्यधुनैव न प्रव्रजामि' । अत्राऽवसरे च नृपाज्ञया **त्रिशला**देवी स्वयं तत्राऽऽजगाम । प्रभुश्चाऽभ्युत्थाय स्वमातरं रत्नसिंहासन उपवेश्योवाच-'मातर्दिष्ट्या त्वमागमः, आगमनकारणं ब्रूहि, आहूतः सन्नहं स्वयमेव तवाऽन्तिकमायामि' । तत**स्त्रिशलो**वाच-'मम गृहे तवाऽवतारो



नोऽनल्पपुण्यादेव । त्वद्दर्शनं जगतां मुदे, किम्पुनरस्माकम् ? त्वं संसारविरक्तोऽप्यस्मास्वनुकम्पया गृहे तिष्ठसि, स्वमनोवृत्तिनिरोधात्मकं तवैतत् कर्म सुदुष्करं, न चैतावतैवाऽस्माकं तृप्तिः । त्वां वधूयुक्तं द्रष्टुमिच्छामि, तद्**यशोदां** परिणीय नो मनोरथान् पूरय, त्वत्पितुरप्येषोत्कण्ठा, ''तदावयोराग्रहादेतदनुमन्यस्व'' ।

ततः प्रभुर्दध्यौ-''अहो़ैतत् किं जातम् ? इतः पित्रोराग्रह इतश्च भवभ्रमणभयं, गर्भेऽपि मातुर्दुःखं मा भूदिति गृहवासे स्थास्यामीत्यभिग्रहोऽपि गृहीतः, भोगफलं कर्म चाऽवशिष्यते, पितरौ च मान्यौ'' । एवं विमृश्य प्रभुर्मातुराज्ञामनुमेने । तेन च प्रमुदिता **त्रिशला** सद्यो गत्वा नृपाय तद्वृत्तमाख्यत्। ततो नृपः समहोत्सवं शुभे दिने **यशोदा-महावीर**योर्विवाहं कारयामास। तद्वधू-वरं पश्यन्तौ च **त्रिशला-सिद्धार्थौ** नितरां मुमुदाते । प्रभुश्चाऽनासक्तो **यशोद**या सह वैषयिकं सुखमन्वभूत् ।

अथ कियत्यपि काले गते प्रभो**र्यशोदा**यां **प्रियदर्शना** नाम सुरूपा कन्या जाता । तां च प्राप्तयौवनां राजपुत्रो **जमालिः** परिणिनाय । प्रभोर्जन्मतोऽष्टाविंशे वर्षे पितरौ कृतानशनौ विपद्याऽ**च्युत**कल्पं जग्मतुः । तयोर्जीवौ च ततश्च्युत्वाऽ**परविदेहे** परमं पदं प्राप्स्यतः ।

❀ ❀ ❀

अथ पित्रोरौर्ध्वदैहिके कर्मणि जाते शोकमग्नं **नन्दिवर्धनं** प्रभुरुवाच-'मृत्युः सदा सन्निहितो, जीवितमस्थिरं, तदस्मिन्नवसरे शोकेनाऽलम् । इदानीं धैर्यमालम्ब्य धर्मानुष्ठानमेव युज्यते' । प्रभुणैवं बोधितो **नन्दिवर्धनः** स्वस्थो भूत्वा प्रभुं राज्यग्रहणाय

प्रार्थितवान् । प्रभुश्च भवोद्विग्नो न राज्यं स्वीचकार । तदा मन्त्रिभि**र्नन्दिवर्धनो** राजा चक्रे । ततः प्रभुश्चिरादभिलषितां प्रव्रज्यां ग्रहीतुं भ्रातरमापप्रच्छे ।

ततो **नन्दिवर्धन** उवाच–"पितरावद्याऽपि न विस्मृतौ, सर्वोऽपि जनोऽहमिव शोकाकुलः, तदिदानीं स्ववियोगेन किं कदर्थयसि" । ततः प्रभुर्ज्येष्ठस्य भ्रातुर्दुःखं मा भूदिति भावयतिः कायोत्सर्गधरो, ब्रह्मचर्यं परिपालयन् स्नानादिक्रियारहितो, विशुद्धध्यानमग्न, एषणीयप्रासुकान्नमात्रवृत्तिर्वर्षमेकं कथमपि गृहवासं चकार ।

अथ **लोकान्तिका**मरैस्तीर्थं प्रवर्त्तयेति प्रार्थितः प्रभुर्वार्षिकं दानं ददौ । ततो देवै**र्नन्दिवर्धना**दिनृपैश्च **वीर**प्रभोर्यथाविधि दीक्षाभिषेकः कृतः । तदानीं च **नन्दिवर्धनो** भ्रातुर्विरहदुःखेनाऽऽकुलः स्वपुरुषान् सुवर्णवेदिकास्तम्भादियुक्तां ध्वजादिविभूषितां पञ्चाशद्धनुर्दीर्घां षट्त्रिंशद्धनुरुन्नतां पञ्चविंशतिधनुर्विस्तृतां **चन्द्रप्रभा**ख्यां वीरासनयोग्यां शिबिकां विधेहीत्यादिशत् । ते च शीघ्रमेव तादृशीं शिबिकां कारयामासुः । शक्राश्चाऽपि तादृशीमेवैकामन्यां शिबिकामकारयत् । ततः प्रथमायां शिबिकायां द्वितीयाशिबिका नद्यां नदीव क्षणादन्तर्बभूव । ततः प्रभुः शिबिकां प्रदक्षिणीकृत्याऽधिरुह्य च प्राङ्मुखः सपादपीठं सिंहासनमलञ्चकार।

तदानीं च प्रभुः श्वेतवस्त्र–रत्नाभरणादिभूषितो नितरां शुशुभे। कुलमहत्तराश्च दक्षिणतः शुचिवस्त्राभरणभूषितास्तत्र निषेदुः । एका चाऽङ्गना विमलवस्त्रालङ्कारा प्रभोर्मूर्धनि छत्रं दधार । द्वे ललने च स्वर्णाभरणभूषिते प्रभोः पार्श्वयोश्चामरे धारयामासतुः । वायव्यदिशि चैका रूप्यभृङ्गारपाणिस्तस्थौ । अन्या च दक्षिणपूर्वदिशि व्यजनधरा



तस्थौ । देवेन्द्राश्च पृष्ठे वैडूर्यदण्डान्यष्टोत्तरसहस्रशलाकानि श्वेतच्छत्राणि दधुः । शिबिकायाः पार्श्वयोश्च **सौधर्मेशाने**न्द्रौ धृतचामरौ तस्थतुः । ततः सहस्रबाह्वां तां शिबिकामेकतो नरा अन्यतश्च शक्राद्या उद्दध्रुः। शक्रः शिबिकां दक्षिणेनेशानेशश्चोत्तरेणोपरिष्टाज्जग्राह । चमर–बली च दक्षिणोत्तरयोरधो दधतुः । अन्ये देवाश्चाऽपि यथोचितं शिबिकां दधुः ।

ततो देवाद्यैरुह्यमानया तया शिबिकया प्रभु**र्ज्ञातखण्डवनं** नामोपवनं प्राप । तदुद्यानं प्रविश्य शिबिकाया उत्तीर्य च प्रभुर्भूषणान्यत्यजत् । देवेन्द्रश्च प्रभोः स्कन्धे देवदूष्यं निदधे । ततः प्रभुः पञ्चभिर्मुष्टिभिः केशानुच्चखान । शक्रश्च देवदूष्ये तान् गृहीत्वा क्षीरोदधौ चिक्षेप । तत आगत्य तेन तुमुले निषिद्धे च प्रभुः सिद्धनमस्कारं कृत्वा चारित्रमग्रहीत् ।

जन्मतस्त्रिंशद्वर्षेऽतीते मार्गे मासि कृष्णपक्षे दशम्यां चित्रास्थे चन्द्रे दिवसस्याऽन्तिमे प्रहरे कृतषष्ठतपसः प्रभोश्चारित्रेण सह चतुर्थं मनःपर्ययज्ञानं समुदभवत् ॥ २ ॥

*इति दशमे पर्वणि श्रीमहावीरजन्म-प्रव्रज्यावर्णनात्मको*

*द्वितीयः सर्गः ॥२॥*

# तृतीयः सर्गः

अथ प्रभु**र्वीरो** भ्रातरं **नन्दिवर्धन**मन्यांश्च ज्ञातवंश्यानन्यतो गन्तुमापप्रच्छे । तदानीं गृहीतव्रतं विहारोत्सुकं प्रभुं नत्वा पितुर्मित्रं वृद्धो विप्रः **सोमो**ऽब्रवीत्–'स्वामिन् ! अयं स्वः परो वेत्यनपेक्ष्य वार्षिकदानमदाः, येन जगतो दारिद्र्यं विनष्टम् । परमेकोऽहमेव मन्दभाग्योऽवशिष्टोऽस्मि, अहं जन्मतो दारिद्र्यपीडितो ग्रामाद् ग्रामं भिक्षार्थं भ्रमामि । तत्र च निर्भर्त्सनादिना विविधापमानं सहे । तथाऽपि धनाशया भ्रमतो मेऽजानत एव तव वार्षिकं दानं गतम् । अद्याऽपि मयि कृपां कुरु, दानं देहि, पत्न्या निर्भर्त्स्य तवाऽन्तिकं प्रेषितोऽस्मि" ।

ततो **वीर**प्रभुरुवाच–'अहं सम्प्रति त्यक्तसङ्गोऽस्मि, तथाऽपि स्कन्धस्थितस्य ममाऽस्य वस्त्रस्याऽर्धं गृहाण' । ततो हृष्टो विप्रस्तद्वस्त्रार्धमादाय गृहं गत्वा तद्दशाबन्धनार्थं तद्वस्त्रं तुन्नवायस्याऽदर्शयत् । स च तुन्नवायो वस्त्रार्धमिदं **वीर**प्रभोराप्तमिति विप्रेण ज्ञात्वोवाच–वस्त्रस्य द्वितीयार्धमप्यानय, **वीर**प्रभोरनुपदं याहि । भ्रमतस्तस्य तद्वस्त्रार्धं कण्टकादिषु लगित्वा पतिष्यति, **वीर**प्रभुश्च निःस्पृहत्वात् पुनस्तद् न ग्रहीष्यति, त्वं च तदादायाऽत्राऽऽनयेः । ततोऽहं दलद्वयं सन्धाय पूर्णीकरिष्यामि, तेन चैतस्य वस्त्रस्य दीनारलक्षं मूल्यं भविष्यति, सोदरौ भ्रातराविवाऽऽवामर्धमर्धं ग्रहीष्याव" इति । विप्रश्च तथाऽस्त्वित्युक्त्वा प्रभोरनुपदं जगाम ।



अथ प्रभुरीर्यासमितः सायं **कूर्मार**ग्रामं प्राप्तवान् । तत्र च नासाग्रस्थिरदृष्टिः प्रलम्बितबाहुयुगलः प्रभुः स्थाणुरिव निश्चलः प्रतिमया तस्थौ । तदानीं च कोऽप्येको गोपो दिनं वृषभान् वाहयित्वा ग्रामसीमनि प्रभुसमीपं प्राप्तो दध्यौ–'मम वृषभा अत्र ग्रामसीम्न्येव चरन्तु, अहं पुनर्ग्राममध्ये गत्वा गवां दोहनं करिष्यामि" । एवं ध्यात्वा स ग्रामं प्रविवेश । वृषभाश्च गोपं विना काननं प्रविविशुः । गोपश्च ग्रामादागत्य स्वामिनं **वीरं** क्व मे वृषभा इति पप्रच्छ । स्वामी च न किमपि प्रत्युदतरत् ।

मौनिनि प्रभौ चाऽयं न वेत्तीति विचारयन् स गोपो वृषभानन्वेषयंस्तां रात्रिं गमयामास । वृषभाश्चाऽपि वनं भ्रान्त्वा प्रभुसमीपमागत्योपविश्य रोमन्थायमाना अव्यग्रास्तस्थुः । स गोपश्चाऽपि भ्रान्त्वा तत्राऽऽगत्य वृषभान् दृष्ट्वाऽचिन्तयत्–"प्रभाते हर्तुकामेनाऽनेन नूनं वृषभा हृताः" । एवं विचार्य स सहसा बन्धनरज्जुमुत्क्षिप्य सक्रोधः प्रभुं हन्तुमधावत । तदानीमेव च शक्रोऽचिन्तयत्–'प्रथमेऽह्नि प्रभुः किं करोति' । एवं चिन्तयंश्च शक्रस्तं हन्तुमुद्यतं गोपमपश्यत् । ततः शक्रस्तं सद्यः स्तम्भयित्वा तत्राऽऽगत्य 'रे पाप ! **सिद्धार्थ**नृपपुत्रममुं न जानासी'त्यतर्जयत् । पश्चाच्च त्रिः प्रदक्षिणीकृत्य प्रणम्य च शक्रः प्रभुं विज्ञपयामास–"द्वादशवर्षाणि यावदुपसर्गपरम्परा भविष्यति, तदहं पारिपार्श्वको भूत्वा निषेधितुमिच्छामि" ।

ततो **वीर**प्रभुः समाधिं पारयित्वेन्द्रमुवाच–"जिनाः क्वचिदपि परसाहाय्येच्छां न कृतवन्तः, एतत् कदाऽपि न भूतं भवति भविष्यति वा यज्जिनाः परसाहाय्यात् केवलं प्राप्नुवन्ति । ते स्ववीर्येणैव केवलं प्राप्य परमं पदं यान्ति" । ततः शक्रो बालतपसा

व्यन्तरेषु जातं प्रभोर्मातृष्वस्त्रीयं **सिद्धार्थ**मादिशत्-'यः प्रभोर्मारणात्मकमुपसर्गं करोति स त्वया प्रभोः पार्श्ववर्तिना निवारणीयः' । एवमुक्त्वा शक्रः स्वस्थानमगात्। **सिद्धार्था**मरश्च तत् प्रपन्नवान् ।

अथ प्रभुः षष्ठपारणार्थं **कोल्लाक**ग्राममगात् । तत्र च प्रभु**र्वीरो बहुला**ख्यस्य विप्रस्य गृहे शर्करादिमिश्रितेन परमान्नेन पारणं चकार । ततस्तद्विप्रगृहे देवैः कृतानि वसुधाराप्रभृतीनि पञ्च दिव्यान्युदभूवन् । ततः प्रभुर्निरीहः समदृष्टिर्भव्यजनान् प्रबोधयन् वायुरिवाऽप्रतिहतगतिर्महीं विजहार । तत्र च प्रभुं दीक्षावसरकृतदिव्यविलेपनसौरभ्याकृष्टा भ्रमरा उपदुद्रुवुः । ग्राम्या युवानश्च तादृशगन्धयोगं प्रार्थयामासुः । स्मराकुलास्तरुण्यश्चाऽङ्गसङ्गं प्रार्थयामासुः । दीक्षादिनात् प्रभृति साधिकं मासचतुष्टयं यावदेवं प्रकारानुपसर्गान् **वीर**प्रभुर्गिरिरिव स्थिरः सेहे ।

अथाऽन्यदा प्रभुर्विहरन् **मोराके** विषये **दूइज्जन्तका**ख्ये तापसग्रामे ययौ । तत्र च पितृमित्रं कुलपतिः प्रभोरुपस्थानमकरोत्। प्रभुरपि पूर्वाभ्यासवशात् तस्मिन् बाहुं प्रसारितवान् । कुलपतिना प्रार्थितश्च प्रभुस्तत्रैकां रात्रिमेकरात्रिक्या प्रतिमया तस्थौ । प्रभाते विहारोद्यतं प्रभुं कुलपतिरुवाच-"त्वयेहैकान्तस्थाने वर्षाकालो गमनीयः" । वीतरागोऽपि प्रभुस्तदाग्रहात् तत् स्वीकृत्याऽन्यतो ययौ । विहरन् ग्रीष्मकालमतीत्य च प्रभुः **सिद्धार्थ**मित्रस्य तस्य कुलपतेर्वचनं स्मरन् वर्षाकालमतिवाहयितुं **मोराक**मगात् । कुलपतिश्च प्रभोर्निवासाय तृणाच्छादितमेकं गृहमार्पयत् । प्रभुश्च तत्र योगमग्नः प्रतिमया तस्थौ।

तत्र च ग्रीष्मप्रभावाद् वने निस्तृणे वर्षाकालस्य नवत्वाद् नवे तृणे अप्ररोहति गावस्तापसानां तृणोटजान् खादितुमधावन् । तेन



तापसा निर्दयास्ता गा यष्टिभिरताडयन् । तैर्हन्यमाना गावस्तांस्तृणोटजान् विहाय स्वाम्यधिष्ठितं तृणोटजं प्रभौ प्रतिमया स्थिते निर्भयमखादन् । तद् दृष्ट्वा च तापसाः क्रुद्धा अब्रुवन्-"वयं निजोटजान् रक्षामः, अयं पुनः स्वमुटजं न रक्षति । अहो ! कुलपतेः कीदृशोऽयमतिथिः, यस्य पश्यत एव गाव उटजं चखादुः, स्वार्थपरायणतां धिक्, वयं किं कुर्महे, अयं कुलपतेः प्राणप्रियः, तद्भयात् किमपि परुषं वक्तुं न समर्थाः" ।

तदेवं प्रभौ जातमत्सरास्ते तापसा अन्यदा कुलपतेः पार्श्वं गत्वा सोपालम्भमवदन्-"त्वयाऽऽश्रमे कोऽयं निर्ममः श्रमण आनीतः ? यस्मिन्निह वसत्यप्युटजस्य नाशोऽभूत् । सोऽकृतज्ञोऽलस उदासीनो दाक्षिण्यविहीनश्चाऽस्ति । यतो भक्ष्यमाणं स्वौटजं गोभ्यो न रक्षति । अयं मुनिंमन्यः समताशीलत्वाद् वा न निवारयति, तर्हि गुरुदेवार्चनरता वयं किं मुनयो न स्मः" । ततः कुलपतिः प्रभुसमीपं गत्वा निस्तृणमुटजं दृष्ट्वा तापसाः "सत्यवचसो न मात्सर्यपरीता" इति चिन्तयन् प्रभुमुवाच-"तात ! त्वयाऽयमुटजो गोभ्यः किं न रक्षितः ? त्वत्पित्रा यावज्जीवं सर्वे आश्रमा रक्षिताः, तवाऽपि दुष्टशासनरूपं व्रतं युज्यते । पक्षिणोऽपि स्वं नीडमात्मानमिव रक्षन्ति, त्वया विवेकिना सता हन्त किमयमाश्रम उपेक्षितः" । एवं स कुलपतिः स्वयोग्यां शिक्षां दत्त्वा **सिद्धार्थ**मैत्रीं स्मरन् स्वमाश्रमं ययौ ।

अथ प्रभुश्चिन्तयामास-"मन्निमित्तमेषामप्रीतिः, तत्सर्वलोकहितेच्छोर्ममाऽत्र स्थितिर्नोचिता" । एवं विचार्य प्रभुर्नितरां विरक्तः पञ्चाऽभिग्रहान् जग्राह-"अप्रीतस्य गृहे कदाऽपि न वस्तव्यं, सर्वदा कायोत्सर्गेणैव स्थेयं, प्रायो मौनेन स्थेयं, पाणिपात्रे भोक्तव्यं,

गृहस्थस्य विनयो न कार्य" इति च । एवमिमानभिग्रहान् गृहीत्वा **वीर**प्रभुरर्धमासात् पश्चात् प्रावृष्यपि **अस्थिक**ग्रामाख्यं ग्रामं ययौ ।

❀ ❀ ❀

तत्र चैकस्य **शूलपाणि**यक्षस्य मन्दिरे वासं कर्त्तुं प्रभुर्ग्रामीणान् पप्रच्छ । ततो ग्राम्या ऊचुः-"अयं यक्षोऽत्र कस्याऽपि वासं न दत्ते । यक्षस्येयं कथा श्रूयताम्-'पूर्वमयं ग्रामो **वर्धमान**नाम्ना ख्यातोऽभूत् । अत्र च **वेगवत्या**ख्या पङ्किलतटा नद्यस्ति । तत्र **धनदेवा**ख्यो वणिक् भाण्डपूर्णैः शकटानां पञ्चभिः शतैः' सह समागतः । तस्य चैको महावृषभ आसीत् । तमग्रे कृत्वा स शकटानि विषमाया अपि नद्या उत्तारयामास । स महोक्षश्चाऽतिभाराकर्षणेन हेतुना मुखेन रुधिरं वमन् भूमौ पपात । ततः स वणिग् ग्राम्यानेकत्र कृत्वा तद्वृषभसमक्षमुवाच-"अयं वृषभो मम जीवितमिव भवद्भिः पालनीयः" । ततः स वणिक् तस्य वृषभस्य तृणाद्यर्थं बहु धनं ग्राम्याणां ददौ । स वणिक् स्वयमपि च तृण-पानीयदानेन महोक्षं परितोष्याऽन्यतो ययौ ।

अथ ग्राम्याः तद्धनमादायाऽपि तृणादिना वृषभं न पालयामासुः । ततः क्षुत्-पिपासादिपीडितः कृशाङ्गः स वृषभो दध्यौ-इमे ग्राम्या अतिनिष्ठुरा धूर्त्ताः क्रूराश्च । यतो दयया स्वयं मम पालनं दूरेऽस्तु, मत्स्वामिदत्तं तृणादिमूल्यमप्येभिः स्वयं जग्धम्"। एवं चिन्तयन् स वृषभः क्रुद्धोऽकामनिर्जरापरो मृत्वाऽत्रैव ग्रामे **शूलपाण्या**ख्यो व्यन्तरो जातः । ततः स विभङ्गेन स्वं पूर्वं जन्म ज्ञात्वा तद्गोशवं च दृष्ट्वाऽस्मै ग्रामाय क्रुद्धो मारिं विकृत्य बहून् ग्राम्यानमारयत् । ततो ग्राम्या निमित्तज्ञं पृष्ट्वा शान्तिकं कर्म चक्रुः, गृहदेवीनां विविधां पूजां च चक्रुः । तथाऽपि मारिर्नोपशान्ता । ततो ग्रामान्तरं पलायमाना अपि ग्राम्याः क्रुद्धेन तेन मारिताः ।



ततो ग्राम्या दध्युः-"अस्माभिः कोऽपि देवादिर्विराधितः, तत्तत्रैव ग्रामे तत्प्रसादनाय यामः" । एवं ध्यात्वा ते पुनर्मिलित्वा चाऽत्र समागत्य स्नानपूर्वकं वस्त्रादिकं परिधाय चत्वरादिषु भूतगृहेषु च सर्वतो बलिं क्षिपन्त ऊर्ध्वमुखा दीना ऊचुः-"भोः सुरा ! प्रमादाद् मत्कृतानपराधान् क्षाम्यन्तु, भवद्भ्यो नमोऽस्तु" । ततो गगनस्थः स व्यन्तरोऽवोचत्-"अरे निष्करुणाः पापाः ! अधुना क्षमां याचध्वे किन्तु तदानीं क्षुत्-पिपासादिपीडितस्य वृषभस्य वणिजा धने दत्तेऽपि किं न तृण-पानीयादिकं दत्तम् ? स एव मृत्वाऽहं **शूलपाणि**नामा व्यन्तरो जातोऽस्मि, तेन वैरेण युष्मान् मारयामि" ।

तच्छ्रुत्वा च ते ग्राम्यास्तस्मै धूपादिकं ददाना भूतले लुठन्तो दीनमुखाः पुनरूचुः-"अस्माभिरवश्यमपराद्धं, तथाऽपि क्षमां कुरु, अनन्यशरणा वयं त्वां शरणं प्रपन्नाः स्मः" । ततस्तद्वचसा किञ्चिच्छान्तो व्यन्तरोऽवोचत्-"अमूनि मनुष्यास्थीनि सम्प्रति राशीकृत्य तस्योपरि निकेतनं विधाय तन्मध्ये मम वृषभरूपानुगतां मूर्त्तिं स्थापयत । यद्येवं कुरुथ तदा वो जीवनदानं करिष्ये नाऽन्यथा" ।

ततस्ते ग्राम्यास्तथा चक्रुः । तत्पूजार्थं च ग्राम्या **इन्द्रशर्मा**ख्यं विप्रं सवेतनदानं समादिदिशुः । तत्प्रभृति च लोकेऽत्राऽस्थिसञ्चयोऽस्तीति कृत्वा **वर्धमाना**ख्योऽपि स ग्रामोऽ**स्थिका**ख्यया ख्यातः । अत्र ये श्रान्ताः कार्पटिका रात्रौ वसन्ति तान् **शूलपाणि**स्तद्रात्रावेव हन्ति । तदत्र लोको दिन एव तिष्ठति, पूजक **इन्द्रशर्मा**ऽपि सायं स्वगृहं याति । तस्माद् भवतोऽत्र वासो नोचितः । एवमुक्त्वा ते पृथगेव वासं ददुः । प्रभुस्तु तदगृहीत्वा यक्षगृह एव वस्तुमयाचत ।

ततो ग्राम्यानुज्ञया व्यन्तरं बोधयोग्यं जानन् प्रभुस्तन्निकेतनैककोणे प्रतिमया तस्थौ ।

अथेन्द्र**शर्मा** सायं धूपादिकं कृत्वा सर्वान् पथिकान् ततो निःसार्य च प्रभुमवोचत्-"इत आयतनात् त्वमपि निर्याहि, अयं हि क्रूरो व्यन्तरो रात्रौ तव मृत्युप्रदो भावी" । प्रभुश्च तच्छ्रुत्वाऽपि मौनेन तस्थौ । ततः स व्यन्तरोऽचिन्तयत्-"अहो ! अयं कोऽपि मुमूर्षु-र्मदायतनमागतोऽस्ति, ग्राम्यैर्मत्पूजकेन चाऽपि निषिद्धोऽपि दर्पवशादत्र स्थितोऽस्ति, तदस्य दर्पमपहरामि" । ततो देवपूजके गते सूर्ये चाऽस्तमिते प्रभौ च कायोत्सर्गस्थे स व्यन्तरोऽट्टहासमकरोत् । तेनाऽतिभयानकेनाऽट्टहासेन नभोमण्डलं व्याप्तम् ।

ग्राम्याश्च मिथ ऊचुः-"स देवार्योऽद्य निश्चयं व्यन्तरेण हन्यते" । तत्र **पार्श्व**तीर्थसाधु**रुत्पला**ख्यो निमित्तज्ञानी लोकमुखाद् देवार्यवृत्तान्तं ज्ञात्वा चरमस्तीर्थकरो भवेदिति शङ्कयाऽऽकुलो जातः । प्रभुश्च यदाऽट्टहासरवैरपि न चकम्पे, तदा च महाभयङ्करं गजरूपं पिशाचरूपं च विकृतवान् । तेनाऽप्यकम्पिते प्रभौ स सर्परूपं विकृत्य भोगेन प्रभुमावेष्ट्य दशनैर्ददंश । तेनाऽप्यक्षुब्धे प्रभौ स प्रभोः शिरःप्रभृतिषु सप्तस्वङ्गेषु सप्त वेदनाश्चकार । प्रभुश्च युगपज्जाता अपि ता वेदना अधिसेहे । ततः श्रान्तो व्यन्तरः प्रभुं नत्वा कृताञ्जलिरुवाच-"तव शक्तिमजानता दुरात्मना मया बह्वपराद्धं तत् क्षमस्व" ।

तदानीमेव च **सिद्धार्थ**देवः स्वकार्याकुलचित्तः प्रभुसामीप्य-विषयकमिन्द्रनिदेशं स्मृत्वाऽऽगत्योवाच-"अरे ! सुराधम ! शूलपाणे ! एतत् त्वया किं कृतम् ? **सिद्धार्थ**नृपपुत्रं जगत्पूज्यं तीर्थकरं किं न



जानासि ? यदि प्रभुभक्तः शक्रस्त्वच्चरितं ज्ञास्यति तदा त्वं वज्रप्रहारपात्रं भविष्यसि" । ततो भया**च्छूलपाणिः** पश्चात्तापाकुलः पुनः प्रभुं क्षमयामास । ततः शान्तं तं व्यन्तरं **सिद्धार्थो**ऽवादीत्-"त्वं तत्त्वानभिज्ञोऽसि, तद् यथायथं तत्त्वं शृणु । वीतरागे देवमतिः, साधुषु गुरुबुद्धिर्जिनप्रणीते धर्मे धर्मबुद्धिरिति मनसि स्थापय । तदतः परं प्राणिपीडां त्यज, पूर्वदुष्कृतं च निन्देः, यत एकदा कृतस्य दुष्कर्मणः कोटिकोटिर्दुर्विपाकं प्राणी प्राप्नोति" ।

**शूलपाणि**श्च तच्छ्रुत्वा स्वयं कृतमनेकप्राणिवधं स्मरन् पश्चात्तापयुतः स्वं बहु निनिन्द । ततः सम्यक्त्वसम्पन्नो भवविरक्तः स प्रभोः पादान् पूजयित्वेन्द्रियमलमार्जनजलसङ्गीतमारेभे । ग्राम्याश्च तच्छ्रुत्वा दध्युः-"नूनं स व्यन्तरो देवार्यं हत्वा सम्प्रति रमते" । प्रभुरपि च किञ्चिद् न्यूनयामचतुष्टयं यावत् तेन कदर्थितः श्रान्तो निद्रितो दश स्वप्नान् ददर्श-"वर्धमानस्तालपिशाचः स्वयं मृतः, स्वसन्निधौ सेवमानौ श्वेतचित्रौ कोकिलौ, सुगन्धि दामद्वयं, सेवापरो गोवर्गः, पद्मव्याप्तं पद्मसरो, बाहुभ्यां तीर्णः सागर, ऊर्ध्वरश्मिकं सूर्यमण्डलं, **मानुषोत्तर**पर्वतो निजान्त्रैर्वेष्टितः स्वेनाऽऽरूढं **मेरु**शिखरं चेति दश स्वप्नान् दृष्ट्वा प्रभुर्गतनिद्रोऽभूत् । सूर्योदयश्च जातः ।

तदानीं **चेन्द्रशर्मोत्पलो**ऽन्ये च जनास्तत्राऽऽययुः । प्रभुं स्वस्थं पूजितं च दृष्ट्वा मुदितास्ते सविस्मयाः पुष्पाद्यैः पूजयित्वा जितयुद्धा वीरा इव सिंहनादं विधाय मिथ ऊचुः-"साम्प्रतं देवार्येण दिष्ट्या स व्यन्तर उपशमितः" । **उत्पलो**ऽपि प्रभुमुपलक्ष्य वन्दित्वा शिष्यवत् समीपे उपविवेश । पुनः कायोत्सर्गान्ते **उत्पलः** प्रभुं नत्वा ज्ञानसामर्थ्यात् प्रभुस्वप्नं ज्ञात्वोवाच-"स्वामिन् ! यद्यपि निशान्ते दृष्टानां स्वप्नानां फलं स्वयं जानासि तथाऽपि भक्त्या

कथयामि-हतस्तालपिशाचो भाविनं मोहनाशं सूचयति । शुक्लः कोकिलस्ते शुक्लध्यानावाप्तिमाह । चित्रः कोकिलो भवता द्वादशाङ्गीख्यातिं कथयति । गोवर्गश्च तव भाविनं चतुर्विधं सङ्घं व्यनक्ति । पद्मसरस्ते सेवको देववर्ग इत्याह । सागरोत्तरणं च तव भवोत्तरणसूचकम् । सूर्यश्च भावि केवलज्ञानं प्रथयति । त्वदन्त्रैर्वेष्टितो गिरिश्च तव प्रतापान्वितं यशो व्यनक्ति । तव **मेरु**शिखरारोहणं च सिंहासनस्थस्य तव भाविनीं धर्मदेशनामाह । दामद्वयफलमहं न वेद्मि" ।

ततो भगवानाह-"दामद्वयं मया प्रणेष्यमाणं गृहियतिधर्मद्वय-माह" । तत **उत्पलः** प्रभुं नत्वा स्वस्थानं जगाम । अपरे ग्राम्या अपि विस्मिताः प्रमुदिताश्च जग्मुः । प्रभुश्च तत्राऽर्धमासक्षपणैश्चतुर्मासीं गमयित्वाऽ**स्थिक**ग्रामादन्यतो विजहार । **शूलपाणि**यक्षश्च प्रभुमनु-सरन् नत्वाऽवदत्-"निरीहस्त्वमिह मय्यनुकम्पयैव समागमः, तव द्रोहाद् न मत्समः कोऽपि पापः, तथा मय्यपि हितबुद्धिस्त्वं सर्वपूज्यः यदि मम त्वत्कृतः प्रबोधो न स्यात् तदा मम नरकपातो ध्रुवः स्यात्" । एवमुक्त्वा स भक्त्या **वीर**प्रभुं प्रणम्य **शूलपाणि**र्न्यवृतत् ।

⁂ ⁂ ⁂

अथ प्रभुर्दीक्षादिनाद् वर्षे गते **मोराक**ग्रामं गत्वा तस्य बहिरुद्याने प्रतिमया तस्थौ । तत्र ग्रामे च मन्त्र-तन्त्रोपजीवी पाखण्डी नाम्नाऽ**च्छन्दक** आसीत् । **सिद्धार्थ**व्यन्तरश्च तन्माहात्म्यमसहमानः स्वामिमाहात्म्यख्यातये प्रभुशरीरे सङ्क्रमं कृत्वा गच्छन्तं गोपालक-माहूयोवाच-"भो ! गोपाल ! त्वं ससौवीरं कङ्गुभक्तं भुक्तवानसि, वृषभान् रक्षितुं च यासि, गृहादागच्छन् सर्वमद्राक्षीः स्वप्ने च



बह्वरोदीरि"त्येतद् मयोक्तं सत्यमस्ति किम् ?" ततस्तेन सत्यमित्युक्ते **सिद्धार्थ**स्तद्विश्वासाय पुनरन्यदपि बहु कथितवान् । तेन च विस्मितो गोपालो ग्रामे गत्वा जगौ-"बहिरुद्याने त्रिकालज्ञो देवार्योऽस्ति, तेन मम प्रत्ययः पूरितः" ।

तच्छ्रुत्वा ग्राम्यो लोकः कौतुकात् सत्वरमेव पुष्पाद्यादाय स्वामिसमीपमाजगाम । प्रभुशरीरे सङ्क्रान्तः **सिद्धार्थ**श्च ग्राम्यान-वदत्-"किं यूयं ममाऽतिशयं द्रष्टुमिहाऽऽगताः ?" ग्राम्यैश्च तथेति स्वीकृते तैर्यद् दृष्टं श्रुतं कृतं वा, यच्च प्राक्तदानीं वोक्तं तत्सर्वं कथयित्वा भावि वृत्तं चाऽकथयत् । लोकाश्च तच्छ्रुत्वा महोत्सव-पूर्वकं प्रभोर्वन्दनं पूजां च चक्रुः । एवं प्रतिदिनं लोकेषु गतागतं कुर्वत्सु **सिद्धार्थो** नितरां मुमुदे ।

लोकाश्च तत्राऽऽगत्योचुः-"प्रभो ! ग्रामेऽस्मिन् भवानिव ज्ञानी नाम्नाऽ**च्छन्दको** वसति" । ततः **सिद्धार्थ**स्तानुवाच-"स न किमपि जानाति, सरलमतीन् भवतो विप्रतार्य स स्वजीविकां करोति" । ततस्ते गत्वाऽ**च्छन्दक**मूचुः-"त्वं किमपि न जानासि, देवार्यस्त्रि-कालज्ञः" । ततः स्वप्रतिष्ठाभङ्गभियाऽ**च्छन्दक** उवाच-"अतत्त्वज्ञानां भवतामग्रे स सर्वज्ञः, यदि ममाऽग्रे ज्ञाता स्यात् तदा तं ज्ञानिनं मन्ये। अहमधुनैव गत्वा तस्याऽज्ञतां प्रकटयामि, यूयं पश्यत" । एवमुक्त्वा सोऽ**च्छन्दकः** क्रुद्धो ग्रामीणैः सकौतुकैः परिवेष्टितः कायोत्सर्गस्थं प्रभुं समुपाययौ । आगत्य चाऽङ्गुलीभिस्तृणं गृहीत्वा प्रभुं पप्रच्छ-"इदं तृणं मया च्छेत्स्यते न वा ?"

अत्र प्रश्ने तस्याऽयमभिप्रायोऽभवत् यदयं यथा वक्ष्यति तद्विपरीतमेवाऽहं करिष्यामि, तथा चाऽयं मिथ्यावादी स्यात् । ततः **सिद्धार्थ** उवाच-'त्वयेदं न च्छेत्स्यते' । **अच्छन्दक**श्च तच्छ्रुत्वा तत्

तृणं छेत्तुमारेभे । तदानीं शक्रो दध्यौ-"प्रभुरिदानीं कथं विहरति ?" उपयोगं दत्त्वा चाऽ**च्छन्दक**व्यापारं दृष्ट्वा प्रभुर्मिथ्यावाङ् मा भूदिति स वज्रेणाऽ**च्छन्दक**स्य दशाऽप्यङ्गुलीश्चिच्छेद । तृणस्याऽच्छेदाच्च विस्मितः सर्वैर्लोकैर्दृश्यमानः स उन्मत्त इवाऽन्यत्र ययौ ।

ततः **सिद्धार्थो** ग्राम्यानुवाच-"अयम**च्छन्दक**श्चौरः" । ततो ग्राम्या ऊचुः-'प्रभो ! कस्य किमनेन चोरितम्' । ततः **सिद्धार्थ** उवाच-'**वीरघोषः** कर्मकरोऽत्राऽस्ति ?' तच्छ्रुत्वा च प्रणम्य **वीरघोषः** स्वमदर्शयत् । ततः **सिद्धार्थ**स्तमुवाच-'तव गृहात् पुरा दशपलं भाजनं नष्टं किम् ?" तेन तत् स्वीकृते **सिद्धार्थः** पुनर्जगौ-"अनेन पाखण्डिनाऽ**च्छन्दके**न तद् गृहीतं, निरीक्ष्य प्रत्ययः क्रियताम् । स निजगृहात् पूर्वदिशि शिग्रुवृक्षस्याऽधो हस्तमात्रं खनित्वा तत् क्षिप्तवानस्ति, गत्वा तद् गृहाण" । तेन च जातकौतुकैर्ग्राम्यैः सहितो **वीरघोष**स्तद्गृहं गत्वा भाजनं लात्वाऽऽययौ ।

ततस्तुमुलं कुर्वतो ग्राम्यान् **सिद्धार्थ** उवाच-"भो ! श्रूयताम्, **इन्द्रशर्मा**ऽत्राऽस्ति किम् ?" अस्तीति लोकैः कथिते **इन्द्रशर्मा** तत्रोपस्थितः । ततः 'किं पुरा तवाऽजोऽपहृत' इति **सिद्धार्थेन** पृष्टः स सविस्मयस्तत् स्वीचकार । ततः **सिद्धार्थ** आह-'अनेनाऽ**च्छन्दके**न स भक्षितः । बदर्या दक्षिणदिशि तृणादिपुञ्जे तस्याऽस्थीनि पश्य" । ततो लोकाः कौतुकात् तत्र गत्वा तत् तथा ददृशुः । पुनः समागतांश्च तान् **सिद्धार्थः** प्राह-"तस्य पाखण्डिनस्तृतीयोऽपि पराक्रमोऽस्ति, किन्तु तदहं न कथयिष्यामि" । ततो लोकैः पुनः पुनस्तत्कथनाय प्रार्थितः **सिद्धार्थ** उवाच-'यदि वः कौतुकं तर्हि तद्गृहं गत्वा तद्भार्यामेव पृच्छत" । ततो लोकास्तद्गृहं जग्मुः । तद्दिने चाऽ**च्छन्दके**न ताडिता तद्भार्या सरोषा चिन्तयति



स्म-'यदेतस्य कराङ्गुलिच्छेदनं जातं तत् सुष्ठु । लोकैस्तिरस्कारोऽप्यस्योचित एव । यदि लोकोऽधुनाऽऽगच्छति तदाऽस्य सर्वं दुश्चरितमहं प्रकटयामि, यथाऽस्य मत्कुट्टनपापफलं लब्धं स्यात्" ।

तदानीमेव चाऽऽगतो लोकस्ताम**च्छन्दक**चेष्टितमपृच्छत् । ततः साऽवोचत्-"अस्य पापिष्ठस्य नामाऽपि को गृह्णीयात् । अयं हि स्वस्वस्रा वैषयिकं सुखं भुङ्क्ते, मां तु कदाऽपि नेच्छति" । एवं श्रुत्वा कोलाहलं कुर्वन्तो ग्राम्या **अच्छन्दकं** निन्दन्तो निजनिजगृहं जग्मुः । प्रतिष्ठाहीनश्च सोऽ**च्छन्दको** लोकैः पापेति निन्द्यमानो भिक्षामपि क्वाऽपि न लेभे । ततः सोऽ**च्छन्दको** रहसि प्रभुमुपगम्य नत्वा दीनो जगाद-"भगवन् ! अन्यत्र गम्यतां, पूज्यस्य भवतः सर्वत्रैव पूजा सुलभा । तथा मयाऽजानता यद् धाष्टर्यं कृतं तत्फलं प्राप्तम्, इदानीं मयि दयस्व" ।

अथ ततः प्रभुरप्रीतपरिहाराभिग्रहणात् तत **उत्तरवाचाल**-सन्निवेशं प्रति विजहार । दक्षिण उत्तरश्चेति द्वौ वाचालौ । तयोर्मध्ये **सुवर्णवालुका रूप्यवालुका** चेति द्वौ नद्यौ । तत्र दक्षिणवाचालादुत्तरवाचालं गच्छतः प्रभोर्देवदूष्यार्धं **सुवर्णवालुका**तटे कण्टके लग्नम् । किञ्चिद् गत्वा च प्रभुरदो देवदूष्यमस्थण्डिले मा पतदिति तद्विलोक्य ततो गन्तुं प्रावृतत् । पृष्ठलग्नस्तु स **सोमो** द्विजस्त्रयोदशमास्यन्ते तद्वस्त्रार्धं गृहीत्वा प्रभुं नत्वा स्वस्थानं ययौ । हृष्टश्च तस्य तुन्नवायस्याऽर्पयामास । स तुन्नवायश्च ते देवदूष्यार्धं अविकलवदयोजयत् । तन्मूल्यं दीनारलक्षं च तौ विप्र-तुन्नवायौ सोदराविव विभज्याऽर्धमर्धं जगृहतुः ।

अथ प्रभुर्विहारक्रमेण **श्वेतव्या** अभिमुखं गच्छन् गोपबालकैः 'प्रभो ! **श्वेतवी**मयं सरलो मार्ग उपतिष्ठते । किन्त्वस्य मध्ये

**कनकखला**ख्यतापसाश्रमो दृग्विषसर्पेणाऽधिष्ठितोऽस्ति । तत्रैको वायुरेव गच्छति । पक्षिणामपि सोऽगम्य आश्रमः । तदेनं मार्गं त्यक्त्वा वक्रेणाऽप्यनेन पथा गम्यताम्' इत्येवं कथितः । ततः प्रभुस्तं सर्पमज्ञासीत् । स हि पूर्वजन्मनि क्षपकः पारणार्थं वसतेर्गच्छन् मार्गे पादपाताद् मण्डूकीं विराधितवान् । सा च क्षुल्लकेनाऽऽलोचनार्थं तस्य क्षपकस्य दर्शिता । स तु परलोकमारिता मण्डूकीः क्षुल्लं दर्शयन् 'नीच ! किमेता अपि मया मारिता' इति क्रोधादुवाच ।

ततः क्षुल्लको मौनमालम्ब्याऽयं सम्यङ्मतिर्महानुभावश्चाऽयं क्षपकः सायमालोचयिष्यतीत्यमन्यत । किन्तु स क्षपक आवश्यकेऽपि तदनालोच्यैवोपाविशत् । ततः क्षुल्लको दध्यौ–'अस्य मण्डूकीविराधना विस्मृता स्यात्'' । ततः स क्षुल्लो भेकीं किं नाऽऽलोचयसीति क्षपकस्य स्मारितवान् । तेन च क्रुद्धः क्षपक उत्थाय क्षुल्लं हन्तुं धावमानः स्तम्भे प्रतिघातमाप्य विपद्य च ज्योतिष्केषूत्पद्य च्युत्वा च **कनकखले** तपस्विपञ्चाशत्सहस्री कुलपतेः कौशिकगोत्रस्य कौशिकाख्यः कौशिकेष्वत्यन्तामर्षणत्वा**च्चण्डकौशिक** इति ख्यातः पुत्रो बभूव ।

कुलपतौ विपन्ने चाऽसौ तापसानां कुलपतिर्बभूव । मोहाद् वनखण्डस्याऽन्तर्भ्रमन् स कस्याऽपि पुष्पादि ग्रहीतुं नाऽदात् । यः पतितमपि फलादिकमग्रहीत् तं स परशुं यष्ट्यादिकं वोत्क्षिप्य हन्ति स्म । ततः फलाद्यलाभेन पीडितास्तापसा अन्यत्र जग्मुः । एकदा च वनखण्डार्थं कौशिके बहिर्गतवति श्वेतव्या राजपुत्रा एत्य तद् वनमभाङ्क्षुः । आगच्छंश्च कौशिको गोपैर्वनं कैश्चिद् भज्यते इति ज्ञात्वा घृतेनाऽग्निरिव क्रुधा ज्वलन् शितधारं परशुमुत्पाट्याऽधावत। राजपुत्राश्च श्येनात् पक्षिण इव ततः पलायामासुः । कौशिकश्च



स्खलित्वाऽन्तकमुख इव गर्तायां स्वहस्तात् पतिते परशावेव पतितः । तेन च तस्य शिरश्छिन्नम् । विपद्य च सोऽत्रैव वने दृग्विषः सर्पोऽभूत् ।

अथ प्रभुः सोऽवश्य बोध्य इति बुद्ध्या स्वकष्टमविचार्यैव सरलेनैव पथा गत्वा तद् वनं प्रविश्य यक्षायतने नासाग्रन्यस्तनेत्रः प्रतिमया तस्थौ । स दृग्विषः सर्पश्चः बिलात् पर्यटितुं बहिर्निः-सृत्येतस्ततः सर्पन् प्रभुं तथा स्थितं दृष्ट्वा क्रुधा ज्वलन् फटाटोपं विधाय ज्वालामुद्गिरन्त्या लतादीन् दहत्या दृशा प्रभुमपश्यत् । तद्दृष्टिज्वालाश्चोल्का इव प्रभुतनौ पेतुः । प्रभोर्महाप्रभावत्वाच्च ता निष्प्रभावा आसन् । तेन चाऽतिक्रुद्धः स सर्पः पुनः पुनर्नेत्रज्वाला अमुचत् । तासु सर्वासु निष्प्रभावासु जातासु स सर्पः प्रभुं चरणकमले ददंश । एवं पुनः पुनर्दशतोऽपि तस्य प्रभुतनौ विषं न प्रबभूव । केवलं क्षीरधारासहोदरं रक्तं सुस्राव ।

ततोऽग्रे स्थित्वा किमेतदिति चिन्तयन् स सर्पः प्रभुं विलोकयामास । प्रभोरप्रतिमं रूपं दृष्ट्वा कान्तसौम्यतया च तस्य लोचने शीघ्रमेवोपशान्ते । ततः प्रभुस्तं समीपस्थं ज्ञात्वाऽब्रवीत् । ''**चण्डकौशिक** ! बुध्यस्व, मोहं मा गाः'' । प्रभुवाक्यं श्रुत्वा च तर्कयतस्तस्य सर्पस्य पूर्वजन्मस्मरणं जातम् । ततः स प्रभुं प्रदक्षिणीकृत्य कषायरहितो मनसाऽनशनं प्रपन्नवान् । प्रभुश्च तं कृतानशनं निष्क्रियं सर्पं प्राप्तशमं ज्ञात्वाऽनुज्ञां ददौ । स सर्पश्च मम विषदूषिता दृष्टिरन्यत्र मा गादिति मुखं बिले कृत्वा समतां प्राप । प्रभुरपि दयया तत्रैव प्रतिमया तस्थौ ।

गोपालाद्याश्च प्रभुं तथाऽवलोक्य विस्मितास्तत्रोपेत्य वृक्ष-मन्तरितं विधाय शिलाखण्डादिभिः सर्पमघ्नन् । तं सर्पमविचलं

दृष्ट्वा च विश्वस्तास्ते समीपमागत्य यष्टिभिः सर्पभोगं चालयामासुः । गोपैस्तद्वृत्तं ज्ञात्वा च तत्रोपेता जनाः प्रभुं नेमुः सर्पं च जघ्नुः । तेन मार्गेण यान्त्यो घृतविक्रयकारिण्यः स्त्रियश्च तं सर्पं घृतेनाऽम्रक्षयन् पस्पृशुश्च । घृतगन्धेनाऽऽगताः पिपीलिकाश्च सर्पस्य भोगं चखादुः । सर्पश्च प्रबुद्धत्वात् सर्वा वेदनाः सेहे । पक्षान्ते च स सर्पः प्रभुणा कृपादृष्ट्याऽवलोक्यमानो विपद्य **सहस्त्रारं** जगाम । एवं प्रभुः कौशिकसर्पायोपकृत्य तद्वनाद् निर्गत्यो**त्तरवाचाल**सन्निवेशं प्राप ।

❀ ❀ ❀

अथ तत्र पक्षान्ते पारणार्थं गोचरचर्यया भ्रमन् प्रभु**र्नागसेन**स्य गृहमेधिनो गृहं ययौ । तस्मिन्नेव दिने च तस्य **नागसेन**स्य पुत्रो द्वादशवर्षानन्तरमचिन्तित एव समागात् । तेन **नागसेनः** स्वगृहे उत्सवं चकार स्वजनमभोजयच्च । तदानीं चाऽऽगतं प्रभुं दूरादेवाऽवलोक्य मुदितो भक्त्या पयसा प्रत्यलाभयत् । ततो देवास्तद्दानं प्रशंसन्तो वसुधारादिकानि पञ्चदिव्यानि चक्रुः । प्रभुश्च पारणां कृत्वा जिनभक्तेन **प्रदेशिना** नृपेणाऽधिष्ठितां **श्वेतवीं** नगरीं ययौ । **प्रदेशी** च सचिवाद्यैः परिवारित उपागत्य प्रभुं प्रणम्य स्वपुरं जगाम ।

प्रभुश्च विहरन् क्रमात् **सुरभि**पुरं नाम नगरं गतवान् । ततश्च **गङ्गां** नदीं प्राप्य तां तितीर्षुश्च **सिद्धदत्त**नाविकेन सज्जितां नावमारुरोह, अपरेऽपि च पथिकास्तां नावमारुरुहुः । नौश्च नाविकेन चालिताभ्यां दण्डाभ्यां तरीतुमारेभे । तदानीं च तटे शृगालवाशितं श्रुत्वा शाकुनिकः **क्षेमिलो**"अशकुनमेतत्, सर्वे मरणान्तिकं कष्टं शीघ्रमेव प्राप्स्यन्ति, किन्त्वस्य महामुनेः प्रभावाद् मुक्ताः स्युरि"-त्युवाच । तदानीमेव चाऽगाधे जले गतायां नावि **सुदाढो** नागकुमारः



प्रभुं दृष्ट्वा प्राग्जन्मवैरं स्मृत्वा क्रुधाकुलो दध्यौ-"अयं स एव, येन **त्रिपृष्ठ**रूपेणाऽहं सिंहो हतः । तदानीं गिरौ वसता मयाऽस्य **त्रिपृष्ठ**स्य न किमप्यपराद्धं, किन्तु कुतूहलादेवाऽसौ निजभुजबलदर्पेण गुहास्थं मामवधीत् । तद्वैरमद्य साधयामि । यद्यपि मम मृत्युरासन्नस्तथाऽपि प्राग्वैरसाधनात् कृतार्थस्य मम स न खेदाय" । एवं ध्यात्वा क्रुद्धः **सुदाढः** प्रभुमुपेत्य गगनस्थः किलकिलाशब्दं कृत्वा 'रे कुत्र यासी'-त्युक्त्वा संवर्त्तकमहावातं विकृत्य **गङ्गा**या भीषणैरत्युच्चैस्तरङ्गैर्नावं क्षोभयामास । तस्याः कूपको भग्नः श्वेतपटः शीर्णश्च जातः । नाविकोऽपि भयाद् मूढो जातः । तत्स्थः सर्वो जनश्चाऽऽकुलः स्वं स्वं देवमस्मार्षीत् ।

इतश्च **मथुरा**नगर्यां पुरा **जिनदासो** वणिक् श्रावकोऽभूत् । तस्य भार्या च **साधुदासी**ति ख्याता । तौ च जायापती चतुष्पदपरिग्रहं प्रत्याख्यातवन्तावाभीरीसकाशाद् दध्यादिकं चिक्रियतुः । एकदा च कस्याश्चिदाभीर्या उत्तमं दधि क्रीत्वा **साधुदासी** तामुवाच-"त्वयाऽन्यत्र निजं दुग्धादिकं न नेयं किन्त्वत्रैवाऽऽनेयम् । अहमेव सर्वं ग्रहीष्यामीष्टं मूल्यं च दास्यामि" । तेन च मुदिता साऽऽभीरी प्रत्यहं दध्याद्यानैषीत् । **साधुदास्य**पि वस्त्रादिदानेन तां सच्चकार । एवं तयोर्द्वयोः स्वस्त्रोरिव महान् स्नेहः प्रावर्धत ।

एकदा चाऽऽभीर्या गृहे विवाहोत्सवोऽभूत् । तत्र निमन्त्रितौ च श्रेष्ठिनावूचतुः-"आवयोर्नाऽवकाश इत्यागन्तुं न शक्नुवः, तव च येन विवाहोपयोगिना वस्तुना प्रयोजनं तद् मद्गृहाद् गृहाण । एवमुक्त्वा च तौ वस्त्र-धान्याऽलङ्करणादिकं ददतुः" । ताभ्यां दत्तैर्वस्तुभिश्च तस्या विवाहः शुशुभे । तेन च प्रसन्ना गोपाः **कम्बल**-

**शम्बला**ख्यौ द्वौ वृषभौ श्रेष्ठ्यर्थमुपनिन्युः । अस्वीकुर्वतोऽपि श्रेष्ठिनो गृहे गोपाः प्रेम्णा बलादपि तौ वृषभौ बद्ध्वा स्वस्थानं ययुः ।

ततो **जिनदासो** दध्यौ-"यद्येतौ वृषभौ मुच्येते मया, तदेमौ कृषीवलैर्हले योजयिष्येते, अनुपकारित्वाच्च ममैतौ दुष्पालौ, तत्सङ्कटे पतितोऽस्मि, किं करोमि ?" एवं चिन्तयन् श्रेष्ठी दयया तौ वृषभौ पालयामास । अष्टम्यां चतुर्दश्यां च कृतोपवासः श्रेष्ठी पौषधं गृहीत्वा तयोर्वृषभयोः श्रृण्वतोरेव धर्मशास्त्रपुस्तकं वाचयामास । तेन च धर्मश्रवणेन तावुक्षाणौ भद्रकौ जातौ । श्रेष्ठी यद्दिने नाऽभुक्त तौ वृषभावपि तद्दिने नाऽभुञ्जताम् । ततः श्रेष्ठी दध्यौ-"मया कृपया पालिताविमौ वृषभावद्यप्रभृति साधर्मिकौ बन्धू इति पालनीयौ" । ततः स श्रेष्ठी तयोरुक्ष्णोर्दिने दिनेऽधिकाधिकं बहुमानं चक्रे ।

अन्यदा च **भाण्डीरवण**यक्षस्योत्सवे ग्राम्यैर्वाहनानां वाहकेली समुपक्रान्ता । **जिनदास**स्य मित्रं च श्रेष्ठिनमपृष्ट्वैव कौतुकात् तौ वृषभौ नीत्वा शकट्यां योजयामास । तथा तयोर्वृषभयोः सौकुमार्यमजानन् स श्रेष्ठिसुहृद् निर्दयो लोकान् विस्मापयंस्तौ प्राजनेनेरयन् वाहयामास । तथाऽप्रतिमवेगाभ्यां ताभ्यां स सत्वरमेव वाहकेलिकृतपणान् पौरान् जिगाय । प्राजनाराकृतच्छिद्रेण स्रवद्रक्तौ तौ वृषभौ श्रेष्ठिगृहे बद्ध्वा च स स्वं धाम जगाम । भोजनावसरे च श्रेष्ठी तृणपूलमादाय वृषभयोः पार्श्वे जगाम । तौ वृषभौ क्षताङ्गौ विकलौ कम्पमानौ च प्रेक्ष्य स उवाच-"प्राणेभ्योऽपि प्रियौ ममैतौ वृषभौ केन क्रूरेण मामपृष्ट्वैव नीतावीदृशीं दशां प्रापितौ ?" परिजनाश्च सर्वं मित्रवृत्तान्तं ज्ञात्वा स श्रेष्ठी भृशं खेदं प्राप । तौ वृषभौ चाऽनशनकामौ श्रेष्ठिदत्ते तृण-जले न मनागप्याघ्रातवन्तावपि



। अन्नपूर्णं श्रेष्ठिना दत्तं स्थालमपि तौ वृषावद्राष्टामपि न । ततः श्रेष्ठी वोर्भावं ज्ञात्वा भक्तप्रत्याख्यानमदत्त । तौ वृषभावपि तत् प्रतिपेदाते । श्रेष्ठी च तयोरनुकम्पयाऽन्यकार्याणि त्यक्त्वा तौ भवस्थितिं बोधयन् नमस्कारांश्च ददत् तस्थौ । तौ च वृषभौ भवस्थितिं भावयन्तौ नमस्कारान् शृण्वन्तौ समाधिना मृतौ नागकुमारेषूत्पन्नौ ।

अथ तौ **कम्बल-शम्बला**ववधिज्ञानात् **सुदाढे**न प्रभोः क्रियमाणमुपद्रवमपश्यताम् । अर्हत उपसर्गं निवारयाव इति विचार्य च तौ तत्राऽऽजग्मतुः । तयोरेकश्च **सुदाढेन** सर्पेण योद्धुं प्रावृतत् । द्वितीयश्च नावं पाणिनोद्धृत्य नदीतटे निनाय । महर्द्धिकोऽपि च **सुदाढ**स्ताभ्यां पराजितो नंष्ट्वा कुत्राऽपि जगाम । तौ च नागकुमारौ प्रभुं नत्वा मुदा पुष्प-गन्धोदके ववृषतुः । लोकाश्च नद्या इवाऽस्या आपदस्त्वत्प्रभावादुत्तीर्णा इति ब्रुवन्तो भक्त्या **वीर**प्रभुं ववन्दिरे । नागकुमारौ च प्रभुं नत्वा ययतुः । प्रभुश्च नाव उत्तीर्याऽन्यतो विजहार ।

अथ विहरतः प्रभो**र्गङ्गा**सैकते चक्रादिचिह्निता पदपद्धतिः स्फुटा जाता । **पुष्पो** नाम सामुद्रिकश्च तद् दृष्ट्वा दध्यौ-"कोऽपि चक्रवर्त्येकाक्येव गतोऽस्तीति मन्ये । सोऽद्याऽप्यप्राप्तराज्यो वा केनचिच्छलादपहृतराज्यो वा सम्प्रति याति । तमेनं सेवकमिच्छुं भजे । असौ ह्यस्यां दशायां सेवितः फलदो भावी । सेव्यसेवावसरो भाग्येनैव लभ्यते" । एवं विमृश्य सोऽनुपदं गच्छन् **स्थूणाकं** सन्निवेशं प्राप्य तत्राऽशोकतले प्रतिमया स्थितं प्रभुं लोकोत्तराणि श्रीवत्सादीनि तल्लक्षणानि च दृष्ट्वा चिन्तयामास-"यथाऽयं पादलक्षणैर्लोकोत्तरस्तथा-ऽन्यैर्लक्षणैश्चक्र्यपि सूच्यते, किन्त्वयं भिक्षुरस्ति, तन्मे शास्त्रश्रमं धिक्, येन भिक्षुकेऽपि ममाऽऽशा जाता"।

एवं विषण्णे **पुष्ये** शक्रः "प्रभुः कथं विहरती"ति दध्यौ । अवधिना च **स्थूणाके** प्रतिमास्थितं प्रभुं विषण्णं तं नैमित्तिकं **पुष्यं** च ज्ञात्वा शीघ्रमागत्य प्रभुं **पुष्य**स्य पश्यत एव प्रणम्य **पुष्य**मुवाच– "शास्त्रं किं निन्दसि ? न हि शास्त्रकृतो मिथ्या वाचः । त्वं बाह्यान्येव लक्षणानि जानासि नाऽन्तराणि । प्रभोर्हि रक्तमविस्रं क्षीरधवलं, निःश्वासः पङ्कजवदामोदी, वपुश्च निरामयं मलादिविर्जितं च । अयं जगत्पतिर्धर्मचक्री **वीराख्यः सिद्धार्थ**पुत्रः । चतुष्षष्टिरपीन्द्रा अस्य प्रभोः सेवकाः । तव फलाशाविषयचक्री प्रभोः पुरतः कः ? असौ वार्षिकदानं दत्त्वा भवच्छेदमिच्छू राज्यं विहाय परिव्रज्यैवं विहरति । तच्छास्त्राणि संवदन्त्येव, विषादं मा गाः, तवाऽभीष्टं ददामि । यतः स्वामिदर्शनं न मोघं कस्याऽपि" । एवमुक्त्वा तस्येष्टं दत्त्वा प्रभुं प्रणम्य च शक्रः स्वस्थानं ययौ ।

❀ ❀ ❀

अथ **वीर**प्रभुः कायोत्सर्गं पारयित्वा विहरन् **राजगृहं** पुरं प्राप । तस्य नगरस्य समीप एव **नालन्दायाः** पूर्वस्यां कस्यचित् तन्तुवायस्य विशालां शालां गत्वा प्रभुस्तं वर्षां वस्तुमनुज्ञाप्य तस्या एकदेशे मासक्षपणमाश्रितोऽस्थात् ।

इतश्च मङ्ख्यो **मङ्खलि**र्बभूव । तस्य भार्या च **भद्रा** । तौ च चित्रपट्टिकां दधानौ भुवं विजह्रतुः । एकदा च **शरवण**ग्रामं प्राप्य **भद्रा** गोबहुलस्य विप्रस्य गोशालायां सुतमसूत । गोशालाजातत्वाच्च स **गोशालाख्यः** प्राप्तयौवनो निजं मङ्खशिल्पं शिक्षितवान् । स्वभावतः कलही, पित्राज्ञाविराधको, दुर्लक्षणः, कूटपण्डितः स पितृभ्यां कलहं कृत्वा चित्रपट्टिकामादाय भ्रमन् भिक्षयोपजीवन्



**राजगृहं** प्राप स प्रभुणाऽलङ्कृते । शालाकोण एव तन्तुवायमनुज्ञाप्य सिंहसमीपे शृगाल इवाऽवात्सीत् ।

प्रभुरपि मासक्षपणपारणार्थं पाणिपात्रो **विजय**श्रेष्ठिनो गृहं प्राविशत् । सुमतिः श्रेष्ठी च परया भक्त्या स्वामिनं प्रत्यलाभयत् । तदानीं च देवा अहो दानं सुदानमित्याघोषयन्तस्तद्गृहे वसुधारादिकानि पञ्च दिव्यानि चक्रुः । **गोशाल**स्तु तच्छ्रुत्वा दध्यौ–"अयं मुनिरसामान्यः, यतोऽस्याऽन्नदातुर्गृहे पञ्च दिव्यानि जातानि । तच्चित्रफलकं त्यक्त्वाऽस्य शिष्यो भवामि, ईदृशो हि गुरुरवश्यं फलदः" । तस्मिन्नेवं चिन्तयत्येव प्रभुः पारयित्वा तत्र शालायामेत्य प्रतिमया तस्थौ ।

**गोशाल**श्च प्रभुं नत्वाऽवादीत्–"मौनिनस्तव प्रभावो मया नाऽज्ञायि, अहं तव शिष्यो भविष्यामि, त्वमेव मम शरणम्" । एवमुक्त्वा च स तथाचकार । प्रभुश्च मौनेनैवाऽस्थात् । **गोशाल**श्च भिक्षोपजीवी प्रभोः शिष्यतां गतः कदाचिदपि प्रभुपार्श्वं नाऽमुञ्चत् । प्रभुश्च द्वितीयमासक्षपणे **आनन्द**स्य गृहं गतस्तेन भक्त-पानाद्यैर्भक्त्या प्रतिलम्भितः । तृतीयमासक्षपणे च प्रभुः **सुनन्दे**न गृहमेधिना **सर्वकामगुणा**ख्येनाऽऽहारेण प्रतिलम्भितः । **गोशालको**ऽपि च भिक्षयोदरं पूरयन् सदा प्रभुमसेवत ।

अथ कार्तिकपूर्णिमायां प्राप्तायां **गोशालो** दध्यौ–"अयं ज्ञानी श्रूयते, तदस्य ज्ञानं परीक्षे" । एवं विचार्य स **वीर**प्रभुं पप्रच्छ–"स्वामिन् ! प्रतिगृहं वार्षिकोत्सवे प्रवृत्तेऽहं भिक्षायां किं प्राप्स्यामि, तत् कथय" । ततः स्वामिसङ्क्रान्तः **सिद्धार्थ** उवाच– "भद्र ! धान्याम्लकोद्रवकूरैर्भोजितो दक्षिणायामेकं कूटं रूपकं च प्राप्स्यसि" । तच्छ्रुत्वा च **गोशालो** दिनोदयादारभ्य विशिष्टभोजनाय

सारमेय इव प्रतिगृहं बभ्राम । कुत्राऽपि किञ्चिदप्राप्तः श्रान्तः सोऽपराह्णे केनाऽपि कर्मकरेण स्वगृहे नीत्वा धान्याम्लकोद्रवकूरैर्भोजितो दक्षिणायामेकं कूटं रूपकं च प्राप्तवान् । रूपकं परीक्ष्य कूटमिति ज्ञात्वा च लज्जितो यद् भावि तद् भवतीति नियतिवादमग्रहीत् ।

अथ प्रभुर्दीक्षातो द्वितीयं वर्षाकालमतीत्य **नालन्दा**या निर्गत्य **कोल्लाक**सन्निवेशनमगात् । तदा च **बहुलो** नाम विप्रः स्वगृहे महादरेण विप्रानभोजयत् । प्रभुश्चाऽपि भिक्षार्थं तत्राऽऽययौ । ततः स सशर्कराघृतपायसेन प्रभुं प्रत्यलाभयत् । तदा देवास्तद्गृहे वसुधारादीनि पञ्च दिव्यानि चक्रुः । एवं प्रभुश्चतुर्थमासक्षपणपारणं चकार ।

इतश्च **गोशालः** सन्ध्याकाले लज्जया शनैः प्रविशन् प्रभुं च तत्राऽनवलोक्य क्व प्रभुरिति लोकान् पप्रच्छ । कुतोऽपि च प्रभोर्वृत्तमलभमानः स तमन्वेष्टुं **नालन्दा**सन्निवेशने चिरं बभ्राम । पुनरेकाकी जातोऽस्मीति ध्यात्वा च स शिरो मुण्डयित्वा वस्त्रं च त्यक्त्वा ततो निरीय **कोल्लाकं** गतोऽश्रौषीत्-"धन्योऽयं **बहुलो** द्विजः, यस्य गृहे मुनये दानाद् देवै रत्नवृष्टिः कृता" । तच्छ्रुत्वा च स दध्यौ-"अयं प्रभावो मद्गुरोरेव, नाऽन्यस्य कस्यचित् । तस्मात् स नूनमत्रैवाऽस्ति" ।

एवं विचार्य स मृगयमाण एकत्र कायोत्सर्गस्थं प्रभुं दृष्ट्वा प्रणम्योवाच-"पुराऽहं दीक्षायोग्यो न भवामि, सम्प्रति च वस्त्रादित्यागादसङ्गो जातोऽस्मि, मां शिष्यं कुरु, मम यावज्जीवं गुरुर्भव, त्वां विना मनागपि स्थातुं न प्रभवामि । यद्यपि त्वं गतरागस्तथाऽपि



मम मानसं त्वामेवाऽऽश्रयति" । ततः प्रभुस्तस्य भव्यत्वाय तद्भावं च जानन् तद्वचोऽनुमेने । ततः प्रभु**र्गोशाले**न सह **स्वर्णखलं** प्रति चचाल ।

अथ मार्गे गोपैः पच्यमानं पायसं प्रेक्ष्य **गोशाल** उवाच-"अहं क्षुधितोऽस्मि, तदत्राऽऽवां पायसभोजनं कुर्वः" । ततः प्रभुसङ्क्रान्तः **सिद्धार्थ** आह-"इदं पायसं न निष्पत्स्यते" । ततो **गोशालो** मन्दमतिः समेत्य गोपालानुवाच-"अयं त्रिकालज्ञो देवार्यो वदति यदिदं पात्रमपक्वभाण्डवदर्धस्विन्नपायसमेव स्फुटिष्यति" । ततो भीता गोपालास्तां स्थालीं वंशपर्णैर्बबन्धुः । किन्तु भूयिष्ठेषु क्षिप्तेषु तण्डुलेषु विक्लिद्यमानेषु सा स्थाली पुस्फोट । ततो गोपाः कर्परेषु पायसमादाय स्वयं बुभुजिरे । **गोशाल**श्च तदलाभाद् दृढं नियतिवादमग्रहीत् ।

अथ प्रभुस्ततो **ब्राह्मण**ग्राममगात् । तत्र च द्वौ पाटकावास्ताम्। तयोश्च भ्रातरौ **नन्द उपनन्द**श्चाऽऽस्ताम् । तत्र षष्ठपारणार्थं **नन्द**पाटके प्रविष्टः प्रभु**र्नन्दे**न दधिकूरेण प्रतिलम्भितः । **गोशाल**श्चाऽन्यस्मिन् पाटके प्रविष्टो विशाल**मुपनन्द**स्य गृहं दृष्ट्वाऽऽदरात् तत्र भिक्षार्थं प्रविष्टवान् । **उपनन्द**स्य निदेशेन च दासी तस्योषितं कूरं ददौ । तदनादाय स दुष्टमति**रुपनन्दं** शशाप । तत **उपनन्द** उवाच-"यद्ययं भक्तं न गृह्णाति तदाऽस्य शिरसि तत् क्षिप" । साऽपि तथैव चकार। ततः कुपितो **गोशाल** उवाच-"यदि मद्गुरोस्तपस्तेजो वाऽस्ति तर्हि सद्य एवाऽस्य गृहं दह्यताम्" । ततो व्यन्तरास्तत्रस्थाः प्रभुनामग्रहणाच्छापो मोघो मा भूदिति तद्गृहं तृणपूलवदधाक्षुः ।

अथ प्रभुर्विहृत्य **चम्पां** प्राप्तवान् । तत्र च तृतीयं वर्षाकालं द्विमासक्षपणद्वयं प्रतिज्ञायोवास । तत्र च प्रभुः कायोत्सर्गेणो-

त्कटिकादिभिरासनैश्च समाधिस्थो मुक्त इवाऽस्थात् । पुर्या बहिश्च द्वितीयं द्विमासक्षपणपारणं कृत्वा प्रभु**र्गोशाले**न सह **कोल्लाक**-सन्निवेशनमगात् । तत्र च रात्रौ प्रभुः शून्ये गृहे प्रतिमया तस्थौ । **गोशाल**स्तु तद्द्वारे कपिरिव चञ्चलो विलीय तस्थौ ।

तदानीं च तत्र नवयौवनो ग्रामणीपुत्रः **सिंहो विद्युन्मत्या** दास्या सह रिरंसुरागत्याऽवोचत्-''योऽत्र श्रमणो द्विजो वा पान्थो वाऽस्ति, स वक्तु, येन वयमन्यत्र यामः'' । किन्तु प्रभुः कायोत्सर्ग-स्थितत्वाद् मौन्येवाऽभूत् । **गोशाल**श्च तच्छ्रुत्वाऽपि च्छलादुत्तरं न ददौ । **सिंह**श्च प्रतिवचोऽप्राप्य तत्र तया दास्या सह चिरं रन्त्वा क्षणं स्थित्वा च तद्गृहाद् निर्गन्तुं प्रावृतत् । द्वारदेशस्थो **गोशाल**श्च स्वभावतो दुष्टधीश्चञ्चलश्च निर्गच्छन्तीं **विद्युन्मतीं** दासीं पाणिना-ऽस्पृशत् । ततस्तया 'स्वामिन् केनाऽपि स्पृष्टाऽस्मी'त्युक्तः **सिंहो गोशालं** धृत्वोवाच-'रे ! त्वं किं छद्मना प्रच्छन्नो भूत्वा-ऽऽवयोश्चरित्रमद्राक्षीः, भाषितोऽपि चोत्तरं नाऽदाः' । एवमुक्त्वा तं कुट्टयित्वा **सिंहः** स्वस्थानं ययौ ।

**गोशाल**श्च प्रभुमाह-''तव पश्यत एवाऽहं हतोऽस्मि' । ततः प्रभुसङ्क्रान्तः **सिद्धार्थो**ऽवादीत्-''शीलं किं न ममेव पालयसि ? एवं द्वारस्थश्चाञ्चल्यमाश्रयन् किं न कुट्टितः स्याः'' । ततः प्रभुस्ततो निर्गत्य **पत्रकाला**ख्यं ग्रामं गत्वा तत्र रात्रौ शून्यगृहे प्रतिमयाऽस्थात् । **गोशाल**श्च भयात् कोणे निलीय तत्र तस्थौ ।

अथ तत्र तदा ग्रामणीपुत्रः **स्कन्दो दन्तिल**या दास्या सह रन्तुं तत्राऽऽगतः **सिंह**वदेवोवाच, न च कोऽपि तस्योत्तरं ददौ । ततः **स्कन्दो** रन्त्वा निरगात् । **गोशाल**श्चोच्चैर्जहास । तेन च क्रुद्धः



**स्कन्दः** 'पिशाचवत् प्रच्छन्नः स्थित्वा कोऽयमुच्चैर्हसती'ति ब्रुवन् **गोशालं** कुट्टयित्वा स्वगृहमगात् । ततो **गोशालः** प्रभुमुपालेभे-''किमेष स्वामिधर्मो यद् निर्दोषं हन्यमानं मां न त्रायसे'' । ततः **सिद्धार्थः** पुनरुवाच-''भो मूर्ख ! त्वं स्वमुखदोषेणैव तित्तिरिरिव ताडनमाप्नोषि'' । ततो भगवान् **वीर**स्ततो विहृत्य **कुमार**सन्निवेशं गत्वा **चम्पकरमणीयो**द्याने प्रतिमया तस्थौ ।

अथ तत्र धनाढ्यः कुम्भकारः **कूपनयो** नाम मद्यकीटवदेव मद्यप्रिय आसीत् । तथा तदा तच्छालायां **पार्श्वनाथ**शिष्यो बहुश्रुतो **मुनिचन्द्रा**चार्यः शिष्यगणैः सहितः स्थित आसीत् । स सूरिश्च शिष्यं गणे स्थापयित्वा स्वयं **वर्धना**ख्यमतिदुष्करं जिनकल्पप्रतिकर्म चकार । स एकदा साम्यभेदानां तपः-सत्त्व-सूत्रै-कत्व-बलानां मध्ये सत्त्वेन स्वं भावयन् समाधिस्थोऽस्थात् । इतश्च **गोशालः** प्रभुमुवाच-'मध्याह्नो जातः, तद्भिक्षायै ग्रामं यामि'' । ततः **सिद्धार्थ** उवाच-'अहमद्यो-पोषितोऽस्मि' । ततो **गोशालो** बुभुक्षितो भिक्षार्थं ग्रामं प्रविवेश ।

तत्र च विचित्रवस्त्रान् **पार्श्व**शिष्यान् दृष्ट्वा 'के यूयं पात्रादिधारिण' इत्यपृच्छत् । ते च 'वयं निर्ग्रन्थाः **पार्श्व**शिष्या' इत्यूचुः । ततो **गोशालो** हसन्नुवाच-''मिथ्यावाचो वो धिक्, वस्त्रादिग्रन्थधारिणोऽपि यूयं कथं निर्ग्रन्थाः ? तदियं युष्माकं जीविकार्थं पाखण्डकल्पनैव । मम धर्माचार्यो यथा वस्त्रादिसङ्ग-रहितो वपुष्यपि निःस्नेहः, तथैव निर्ग्रन्था भवन्ति'' । ततस्ते **वीर**जिनमजानन्तः प्रत्यूचुः-''यादृशो भवान्, तव धर्माचार्योऽपि तादृगेव गृहीतलिङ्गः किमु'' । तेन च क्रुद्धो **गोशालः** शशाप-''मम धर्मगुरोस्तपस्तेजसा वोऽयमुपाश्रयो दह्यताम्'' । ततस्ते ऊचुः-''तव वचनाद् वयं न दग्धाः स्याम'' ।

ततो **गोशालो** विलक्षो गत्वा प्रभुमुवाच-"युष्मान् निन्दन्तो मया दृष्टास्तपस्विनो 'युष्माकमयमुपाश्रयो दह्यतामि'ति क्रोधादाकृष्टाः। किन्तु तेषामुपाश्रयो न दग्धः, तत्र किं कारणम् ?" तच्छ्रुत्वा **सिद्धार्थ** उवाच-'ते **पार्श्व**स्वामिनः शिष्याः, तत्त्वद्वचसा तेषामुपाश्रयः कथं दहतु ?" अत्राऽन्तरे निशा प्रववृते । **मुनिचन्द्र**सूरयश्चोपाश्रयाद् बहिर्गत्वा प्रतिमयाऽस्थुः । कुलालः **कूपनय**श्च पानगोष्ठ्यामागलं पीतमद्यो मत्तः समागच्छन् **मुनिचन्द्र**सूरिं दृष्ट्वा तं चौरबुद्ध्या गले गृहीत्वा निरुच्छ्वासीचकार । स सूरिश्च वेदनां सहमानः शुभध्यानस्थोऽवधिज्ञानमाप्य विपद्य दिवं जगाम । तस्योपरि च समीपस्था व्यन्तराः पुष्पाणि वर्षन्तो महिमानं चक्रुः ।

**गोशाल**श्च विद्युत्पङ्क्तिमिव गगने तेजस्विनीं देवश्रेणिं दृष्ट्वा प्रभुमुवाच-"प्रभो ! किं त्वद्विद्विषामुपाश्रयो दह्यते ? यद् व्योमज्वालाकुलं वर्त्तते" । ततः **सिद्धार्थो** जगौ-"मैवं वोचः, **मुनिचन्द्रो** दिवं गतोऽस्ति, तस्य महिमानं कर्त्तुं तेजोरूपाः सुराः समेता एते"। **गोशाल**श्च कौतुकात् तद् द्रष्टुं तत्र ययौ । तावच्च देवाः स्वस्थानं ययुः। तत्र च स **गोशालः** पुष्पादिवृष्टिं दृष्ट्वा प्रमुदितो गत्वा प्रतिश्रये सुप्तान् **मुनिचन्द्र**शिष्यानुवाच-'किं यूयं शिष्यहतका मुण्डा दिने यदृच्छया भिक्षान्नं भुक्त्वा रात्रावजगरा इव सदा शेरते, एतदपि न जानीथ यत् सूरिर्विपन्नः । कुलीनानां युष्माकमियं गुरौ महती भक्तिः" । ततस्ते मुनयस्तच्छब्दादुत्थिताः कोऽयं पिशाचवद् वक्तीति तर्कयन् गुरुसमीपं गत्वा तं विपन्नं दृष्ट्वा चाऽऽत्मानं भृशं निनिन्दुः । **गोशालो**ऽपि च लब्धावसरस्तान् निर्भर्त्स्य प्रभुमुपेयाय । प्रभुश्च ततो विहृत्य **चोराक**निवेशं ययौ ।



अथ तत्र शत्रुनृपभयाश्चौरान्वेषिभिरारक्षैः **सगोशालः** कायोत्सर्गस्थितः प्रभुर्दृष्टः । तैः कोऽसीति पृष्टोऽपि प्रभुर्मौनाभिग्रहाद् न किञ्चिदवोचत् । ततस्तेऽयं कस्याऽपि गुप्तचरो यद् मौनी न किमपि वक्ती'ति **सगोशालं** प्रभुं जगृहुः । **गोशालं** च बद्ध्वा कूपे निचिक्षिपुर्घटीवन्न्यञ्चनोदञ्चनानि च चक्रुः । तदा च तत्र **पार्श्व**शिष्ये **उत्पल**स्य भगिन्यौ **सोमा-जयन्तिके** साध्व्यौ **चोराक**निवेशेऽवसताम् । ते च "मुनिवेषौ नरौ जले क्षेपणादिनाऽऽरक्षैः पीडयेते" इति श्रुत्वा चरमस्तीर्थकरः स्यात् किमिति शङ्कया तत्राऽऽगत्य प्रभुं तथावस्थं दृष्ट्वाऽऽरक्षानूचतुः-"भो मूर्खाः इमं **सिद्धार्थ**नृपपुत्रं न जानीथ किम् ?" ततस्ते भयात् प्रभुं मुक्त्वा नत्वा चाऽक्षमयन् । प्रभुश्च तत्र कतिचिद्दिनानि व्यतीत्य चतुर्थं वर्षाकालमत्येतुं **पृष्ठचम्पा**पुरीं जगाम । तत्र चतुर्मासक्षपणकृद् द्विविधप्रतिमामाश्रितश्चतुर्मासीं न्यवात्सीत् । चतुर्मास्यन्तदिने च पारयित्वा प्रभुः क्वचिद् बहिर्जगाम ।

अथ तस्मिन्नगरे **दरिद्रस्थविरा**ख्या राग-द्वेषादिग्रस्ताः सपरिवाराः पाखण्डिनो वसन्ति स्म । तत्पाटकस्य मध्ये च तेषां कुलदेवताप्रतिमासनाथं महन्मन्दिरमासीत् । प्रभुश्च तन्मन्दिरस्य कोणे तत्स्तम्भ इव निष्कम्पः कायोत्सर्गेण तस्थौ । तदानीं च माघे मासि रात्रौ सुदुस्सहं शीतमासीत् । देवकुले महोत्सवश्चाऽऽसीत् । ते पाखण्डिनश्च सपरिवारास्तदायतने प्रमोदात् सम्भूय नृत्य-जागरणादिकं चक्रुः ।

ततो **गोशालो** हसन्नुवाच-"इमे पाखण्डिनः, यदेषां पत्न्योऽपि मद्यं पीत्वा नृत्यादिकं कुर्वन्ति" । तच्छ्रुत्वा च क्रुद्धास्ते **गोशालं** कण्ठे गृहीत्वा गृहात् श्वानमिव निरसारयन् । ततश्च **गोशालः** शीतेन हकारवत् सङ्कुचितगात्रो दन्तपङ्क्तिं वादयन्

सदयैस्तैः पुनस्तत्र प्रवेशितः । स मुहूर्त्तेन गतशीतश्च पुनस्तथैवोवाच। ततस्तैः पुनस्तथैव निःसारितस्तथैव प्रवेशितश्च । एवं ते क्रोधाऽनुकम्पाभ्यां तस्यैवं त्रिश्चक्रुः चतुर्थवारे च **गोशाल**स्तानुवाच- ''यथार्थकथनेऽपि युष्माकं कः कोपः ? निजदुराचाराय किं न कोपं कुरुथ ? पुनः पुनश्च स्पष्टवादिने मह्यं द्रुह्यथ'' ।

ततस्तत्कुट्टनेच्छयोत्तिष्ठतो यूनो निवारयन्तो वृद्धा ऊचुः-अयं तपोराशेर्देवार्यस्योपासकः सेवको वा, अयं स्वेच्छया ब्रवीतु, अनेन सह भाषितेनाऽलं, यदि श्रोतुं न सहध्वे तर्हि वाद्यवादनं कुरुध्वम्''। ततस्तेऽपि तथैव चक्रुः । सूर्योदये जाते च प्रभुः **श्रावस्तीं** गत्वा प्रतिमया तस्थौ ।

अथ भोजनावसरे प्राप्ते **गोशालो** भिक्षार्थं प्रभुमाजुहाव । **सिद्धार्थ**श्च पूर्ववदेव 'वयमुपोषिता' इत्युवाच । ततो **गोशालो** ममाऽद्य कीदृश आहार इत्यपृच्छत् । ततः **सिद्धार्थ** उवाच- ''मनुष्यमांसं भक्षयिष्यसि'' । तच्छ्रुत्वा **गोशाल** उवाच-''अद्याऽत्र मांसगन्धोऽपि न भवेत् तत्र भोक्ष्ये'' । ततो **गोशालो** भिक्षार्थं **श्रावस्तीं** प्राविशत् । इतश्च तस्यां पुरि **पितृदत्तो** गृहमेध्यासीत् । तत्पत्नी **श्रीभद्रा** च मृतवत्सा **शिवदत्तं** दैवज्ञं ममाऽपत्यं कथं जीवेदित्यपृच्छत् । ततः स उवाच-''जातमृतं शिशुं सासृक्पलं पिष्ट्वा क्षीरेण सर्पिर्मधुसहितं पायसीकृत्य धूलिधूसरितपादाय सुसाधवे भोक्तुं दत्ते चेत् तवाऽपत्यानि निश्चयेन जीविष्यति । तस्मिन् साधौ भुक्त्वा गते सति त्वया गृहद्वारमन्यथा कार्यं, येन भोज्यं ज्ञात्वा स तव गृहं क्रोधाद् न दहेत्'' ।

ततः सा पुत्रार्थिनी स्वं मृतबालं पायसीकृत्य समागताय **गोशाला**य भक्त्या ददौ । स च तत्पायसं भुक्त्वा गत्वा च 'चिराद् भ्रान्तोऽसी'ति प्रभुमवोचत् । ततः **सिद्धार्थे**न तत् पायसं यथाकृतं तद् वर्णितम् । तच्छ्रुत्वा च **गोशालो** मुखेऽङ्गुलिं कृत्वा तद् ववाम। तत्र च नखाद्यवयवान् दृष्ट्वा क्रुद्धस्तद् गृहमन्वेष्टुं गतः । किन्तु द्वारस्याऽन्यथाकरणात् तद् गृहं नाऽज्ञासीत् । ततः स उवाच- ''यदि मद्गुरोस्तपस्तेजश्च तर्ह्येष सकलोऽपि प्रदेशो दह्यताम्'' । ततस्तत्रत्याः सन्निहिता व्यन्तरदेवाः 'प्रभोर्माहात्म्यं मा हीयतामि'ति तं सर्वं प्रदेशमदहन् ।



अथ प्रभुस्तत्र किञ्चित् स्थित्वा **हरिद्रुकं** ग्रामं गत्वा बहिर्हरिद्रवृक्षतले प्रतिमयाऽस्थात् । तदानीं च तद्वृक्षतले **श्रावस्तीं** नगरीं गमिष्यन् महासार्थोऽपि न्यवात्सीत् । स च रात्रौ शीतभयादग्निं प्रज्वालयामास । प्रातश्चोत्थायाऽग्रे ययौ । प्रमादाच्चाऽविध्यापितः सोऽग्निः क्रमात् प्रसरन् **वीर**जिनमुपागतः । तद् दृष्ट्वा च **गोशालो** 'भगवन् ! पलायस्व पलायस्व, एषोऽग्निरभ्येती'ति वदन् शीघ्रं काकनाशं नंष्ट्वाऽन्यत्र जगाम । प्रभुश्च तद्वचः श्रुत्वाऽपि तमग्निं ध्यानाग्निमिव कर्मदारुदाहाय चिन्तयन्नप्रकम्पोऽस्थात् । तेनाऽग्निना च प्रभोः पादौ श्यामलीकृतौ ।

अथ तस्मिन् वह्नावुपशान्ते प्रभु**र्गोशाले**न सहितो **लाङ्गला**ख्यं ग्रामं गत्वा विष्णुमन्दिरे प्रतिमया तस्थौ । **गोशाल**श्च क्रीडया समागतान् ग्राम्यबालान् कौतुकात् प्रेतवद् विकृतं रूपं विधाय भीषयते स्म । भयाद् ग्रामं पलायितेषु बालेषु तत्पितर आगत्य **गोशालं** तथारूपं दृष्ट्वा 'किं बालांस्त्रासयसी'ति निर्भर्त्स्य भृशमकुट्टयन् । वृद्धाश्च प्रभुं दृष्ट्वा 'मुच्यतामयं, देवार्यस्य सेवकः कोऽपि सम्भाव्यते' इति तान् निवारयामासुः । ततस्तैर्मुक्तो **गोशाल** उवाच- ''प्रभो ! वज्रवद् निष्ठुरोऽसि, यद् मां हन्यमानमुपेक्षसे'' ।

ततः **सिद्धार्थ**स्तमुवाच–'साधु निहन्यसे, तत्र च तवाऽङ्गचापलमेव निमित्तम्'' ।

अथ प्रभुः कायोत्सर्गं पारयित्वाऽऽ**वर्त्त**ग्रामं गत्वा बलभद्र-मन्दिरे प्रतिमया तस्थौ । तत्राऽपि **गोशालः** पूर्ववदेव बालान् भीषयामास । तत्पितृभिश्च तथैव मत्तगर्दभवत् कुट्टितः । तेषु गतेषु चाऽपि **गोशालः** स्वभावस्य दुर्जयत्वात् पुनर्बालांस्तथैव भीषयामास। ततः कुपितास्तत्पितरः समागत्य 'अस्य कुट्टनेनाऽलम्, अस्य स्वाम्येव कुट्टनीयो य एनं न निवारयती''ति मिथो विचार्योत्क्षिप्त-लगुडा **वीर**जिनं प्रत्यधावन् । तदाऽर्हद्भक्तेन तत्रस्थेन व्यन्तरेणा-ऽधिष्ठितां तन्नाशाय क्रोधादुत्सीरां बलभद्रप्रतिमां दृष्ट्वा भीता विस्मिताश्च पादयोः पतित्वा स्वं निन्दन्तः प्रभुं क्षमयामासुः ।

अथ प्रभुस्ततो विहृत्य **चोराक**सन्निवेशनं गत्वा विजने प्रतिमया तस्थौ । **गोशाले** च भिक्षार्थं गन्तव्यं न वेति प्रभुं पृष्टवति **सिद्धार्थ** उवाच–''अस्माकमद्योपवासो वर्त्तते'' । ततो **गोशालो** बुभुक्षितो भिक्षार्थं ग्रामं प्रविष्टो गोष्ठीभक्तं पच्यमानं दृष्ट्वा भिक्षासमयो जातो न वेति प्रच्छन्नः प्रतीक्षते स्म । तदानीं च तद्ग्रामे महच्चोर-भयमभवत् । ग्राम्याश्च प्रच्छन्नं पश्यन्तं **गोशालं** चौरोऽयमिति सम्भाव्य भृशमकुट्टयन् । ततो **गोशाले** क्रुधा ''मम धर्मगुरोस्तेजसा तपसा वा शीघ्रममीषामयं मण्डपो दह्यतामि''ति शापं दत्तवति प्रभुभक्तैर्व्यन्तरैः स मण्डपो दग्धः ।

अथ **वीर**जिनः **कलम्बुकं** सन्निवेशमगात् । तत्र च **मेघः** **कालहस्ती** च द्वौ भ्रातरौ शैलपती अभूताम् । तदानीं च **कालहस्ती** ससैन्यश्चौरमनुधावमानः स**गोशालं** प्रभुमागच्छन्तं दृष्ट्वा चौराविमा-वित्याशङ्क्य कौ युवामित्यपृच्छत् । प्रभुश्च मौनित्वाद् **गोशाल**श्च



कपिवत् कौतुकप्रियत्वाद् मौनिनावास्थताम् । ततः स **कालहस्ती** **गोशालं** प्रभुं च बद्ध्वा भ्रातुरार्पयत् । **मेघ**श्च **सिद्धार्थ**सेवकः प्रभुं दृष्टपूर्वी क्षमयित्वा मुमोच ।

❀ ❀ ❀

अथ प्रभुरवधे''र्बहुकर्मनिर्जरणीयमवशिष्यते, सहायान् विना च तद् न शीघ्रं क्षय्यम् । आर्यदेशे च सहाया दुर्लभाः, तदनार्यदेशेषु विहरणीयमि''ति विचिन्त्य स्वभावात् क्रूरपुरुषं **लाट**देशं प्रविवेश । तत्र च प्रभुं केचिद् मुण्ड इति जघ्नुः, केचिच्च गूढपुरुष इत्यधरन्, केचिच्च दस्युरयमिति बबन्धुः, केचित् कुतूहलात् स्वामिनं प्रति सारमेयान् मुमुचुः । एवं लोकाः प्रभुं यथारुच्युपदुद्रुवुः । प्रभुश्च तैरुपसर्गैः कर्मक्षपणादमोदत । **गोशालो**ऽपि च प्रभुमनुसरन् बन्धन-ताडनादिकाः सर्वा वेदनाः सेहे । एवं तत्र प्राचुर्येण कर्मनिर्जरां विधाय कृतकृत्य इव प्रभुः पुनरार्यदेशमभिजगाम ।

अथाऽऽर्यदेशं प्रति गच्छन्तं प्रभुं **पूर्णकलश**ग्रामान्तिके **लाट**देशं प्रविक्षन्तौ द्वौ चौरौ दृष्ट्वा दुःशकुनमेतदिति जिघांस-योद्यतासी अधावताम् । तदानीं च शक्रः कथमद्य स्वामी वर्त्तते इति चिन्तापरोऽवधिना प्रभुं हनिष्यन्तौ तौ तस्करौ दृष्ट्वा सद्यो वज्रेण जघान । ततः प्रभुः क्रमाद् **भद्दिलपुरं** गत्वा चतुर्मासोपवासेन वर्षाकालं गमयामास ।

अथ प्रभुः पारणां कृत्वा विहारक्रमतः **कदलीसमागमा**ख्यं ग्रामं प्रापत् । तत्र चाऽथिभ्यः सदाव्रतभोजनं दीयमानं दृष्ट्वा **गोशाल** उवाच–''प्रभो ! अत्रैहि, भुज्यताम्'' । ततः **सिद्धार्थ** उवाच–

''अद्याऽस्माकमुपवासः'' । ततो **गोशालो**ऽहं भोक्ष्ये इत्युक्त्वा तत्र गत्वा भुञ्जानश्च पिशाच इवाऽतृप्तो ग्राम्यैः सर्वान्नपूर्णमर्पितं महत् स्थालं भोक्तुमारेभे । सर्वं तद्भक्तं भोक्तुमप्रभवतश्च तस्य शिरसि ग्राम्याः स्वाहारशक्तिमप्यजानन् मूर्त्तिमान् दुष्कालोऽसि किमित्युपहस्य भक्तस्थालं चिक्षिपुः । **गोशालश्च** तृप्तस्तुन्दं परिमृजन् प्रभुमुपाजगाम । प्रभुश्च **जम्बूखण्डा**भिधं ग्रामं गत्वा प्रतिमया स्थितवान् । **गोशालश्च** सदाव्रतान्नं लिप्सुः पूर्ववदेव भोजनं घर्षणं च प्राप ।

अथ प्रभुः क्रमात् **तुम्बाकं** सन्निवेशनं प्राप्य बहिः प्रतिमया तस्थौ । **गोशालश्च** ग्राममगात् । तत्र च बहुश्रुतं वृद्धं सपरिवारं **पार्श्व**शिष्यं **नन्दिषेण**मुनिं गच्छचिन्तां विहाय **मुनिचन्द्र**वज्जिनकल्पप्रतिकर्मणयत्नं दृष्ट्वा हसित्वा च प्रभुमुपाययौ । **नन्दिषेण**मुनिश्च रात्रौ चतुष्के कायोत्सर्गेण स्थित आरक्षैर्दृष्टश्चौरबुद्ध्या हतः । तत्क्षणंजातावधिज्ञानो विपद्य दिवं जगाम । **गोशालश्च** सुरैः कृतं तन्महिमानं दृष्ट्वाऽऽगत्य तच्छिष्यान् भर्त्सनपूर्वकमाख्यत् ।

अथ स**गोशालो वीर**प्रभुः **कूपिकां** सन्निवेशं प्राप्तस्तत्राऽऽरक्षैश्चरभ्रान्त्या ताडितः । तेन च लोके 'तरुणैरारक्षैर्देवार्यश्चरभ्रान्त्या निरपराधोऽपि ताड्यते' इति वार्त्ता प्रवृत्ता । तदानीं च तत्र **प्रगल्भा-विजये पार्श्व**शिष्ये त्यक्तचारित्रे जीवननिर्वाहाय परिव्राट्त्वं प्रपन्ने तिष्ठतः । ते च तां वार्तां श्रुत्वा मा भूद् **वीर**जिन इति शङ्कया तत्राऽऽगत्य तथावस्थं प्रभुं दृष्ट्वा च वन्दित्वाऽऽरक्षानूचतुः-''रे मूर्खाः! किं **सिद्धार्थ**पुत्रं **महावीरं** न जानीथ ? शीघ्रमेनं मुञ्चत, शक्रश्चेद् वृत्तान्तममुं ज्ञास्यति तदा वः शिरःसु वज्रमेव मोक्ष्यति'' । तच्छ्रुत्वा चकितैस्तैर्मुक्तः क्षमितश्च प्रभु**र्वैशालीं** नगरीं प्रति प्रतस्थे।



अथ मध्ये द्वौ मार्गावभूताम् । तत्र **गोशालः** प्रभुमवक्-''त्वं मां हन्यमानमपि तटस्थ इवोपेक्षसे, तत्त्वया समं न यास्यामि, तवोपसर्गैश्च ममाऽप्युपसर्गा भवन्ति, लोकश्च मामेवाऽऽदौ हन्ति पश्चात् त्वाम् । भोजनमपि च मम क्लेशादेव कदाचिदेव जायते । यः सेवकं प्रति सर्वदैवोदासीनस्तं को नाम सेवेत । अद्यावधि तालवृक्षसेवेव मया कृता त्वत्सेवा मोघा जाता । अतः परं तदहं न करिष्यामि'' । तच्छ्रुत्वा स्वामिसङ्क्रान्तः **सिद्धार्थ** उवाच-''तुभ्यं यद् रोचते तदाचर, ममैषैव रीतिर्नाऽन्यथा जातुचिदपि भाविनी'' । ततः प्रभु**र्वैशाली**पुरीगामिना मार्गेण जगाम, **गोशालश्च राजगृह**गामिना मार्गेण ययौ ।

अथ **गोशालः** क्रमाच्चौराणां पञ्चशतीसमाकीर्णं महावनं प्रविवेश । वृक्षारूढश्चौरपुरुषश्च गृध्रवद् दूरत एव तं दृष्ट्वा चौरान् 'नग्नः कोऽप्येती'त्याख्यत् । ततश्चौरा ऊचुः-''अकिञ्चनोऽप्येष न मोक्तव्यः, चरो वा स्यात्, अस्मान् पराभूय गच्छेदितीदमपि न योग्यम्'' । ततः समीपे समागतं **गोशालं** मातुलोऽसि भो इति वदन्तश्चौरा अध्यारुह्य तं वाहयन्ति स्म । तेषां च पृथक् पृथक् वाहनया **गोशालो**ऽर्धमृत इव जातः । चौराश्चाऽन्यतो जग्मुः ।

अथ **गोशालो** दध्यौ-''आदावेव कुक्कुरेणेव प्रभुहीनेन मया दुःखं प्राप्तम् । प्रभोरुपसर्गादिकं शक्रादयो देवा निवारयन्ति, तदन्तिकस्थस्य ममाऽपि दुःखानि कथञ्चिद् व्यतियन्ति स्म । प्रभुः क्षमोऽपि निमित्तवशाद् मय्युदासीनः मन्दभाग्योऽहं कथं पुनः प्रभुं प्राप्स्यामि, तावत् तमन्वेषयामि'' । एवं ध्यात्वा स तद्वनाद् निर्गत्य प्रभुमन्वेष्टुमनवरतं भ्राम्यति स्म ।

अथ प्रभुर्**वीर**जिनो **वैशाल्यां** गत्वा कर्मारशालायां जनाननुज्ञाप्य प्रतिमया तस्थौ । तत्र च तदानीं चिराद् रोगी कश्चिल्लौहकारो नीरोगतां प्राप्तः शुभे दिने स्वजनेन सहाऽऽजगाम । तत्राऽग्रे प्रभुं दृष्ट्वा च सोऽचिन्तयत्–''प्रथमदिन एव मम पाखण्डिदर्शनरूपमशकुनं जातं, तदिदमशुभमिहैव पातयामि'' । एवं विचिन्त्य सोऽयोघनमुद्यम्य प्रभुं हन्तुमधावत । तदानीं च शक्रः क्व स्वामीति ज्ञातुमवधिं प्रयुज्य तं लौहकारं प्रभुं जिघांसुं दृष्ट्वाऽऽगत्य स्वशक्त्या कर्मारस्य शिरस्येव तमयोघनमपातयत् । तेन च महता प्रयत्नेन रोगमुक्तोऽपि स कर्मारः पञ्चत्वं प्राप । शक्रश्च प्रभुं प्रणम्य निजं धाम जगाम ।

अथ प्रभुस्ततो विहृत्य **ग्रामाक**सन्निवेशं प्राप्य **बिभेलिको**द्याने **बिभेलिका**ख्ययक्षायतने कायोत्सर्गेणाऽस्थात् । पूर्वजन्मन्यवाप्तसम्यक्त्वश्च स यक्षो दिव्यैः पुष्पादिभिः प्रभुं पूजयामास । ततो विहृत्य च प्रभुः **शालिशीर्षं** ग्रामं प्राप्योद्याने प्रतिमया तस्थौ । तदा च माघमासः प्रावर्त्तत । तदा च ग्रामे **त्रिपृष्ठ**जन्मनि प्रभोर्भार्या **विजयवती बाणमन्तरिका**ख्या कटपूतना बभूव । सा च तत्र जन्मनि सम्यक् सन्तोषमप्राप्ताऽमर्षेण मृत्वा भवान् भ्रान्त्वा मनुष्यजन्म प्राप । तत्र बालतपः कृत्वा तत्र ग्रामे व्यन्तरी जाता ।

पूर्ववैराच्च सा प्रभोः पुरस्तापसीरूपं विकृत्य जटावल्कलधारिणी तुषारजलेन शरीरमार्द्रयित्वा प्रभोरुपरि स्थिता वातं विकृत्याऽङ्गानि कम्पयामास । तेन च प्रभोरुपरि दुःसहा जलबिन्दवः पेतुः । जटाग्राद् वल्कलाग्राच्च पतिता जलबिन्दवः प्रभुं पीडयामासुः । तं शीतोपसर्गं सहमानस्य प्रभोश्च विशेषतः



कर्मनिर्जरणं धर्मध्यानं प्रावृतत् । तेन च **वीर**जिनस्य सर्वलोकावलोकनमवधिज्ञानमभूत् । चरमतीर्थकरस्य देवभवे सहजमवधिज्ञानमेकादशाङ्गीसूत्रार्थधारकत्वं चाऽभवत् । सा कटपूतना च रात्र्यन्ते शान्तकोपा पश्चात्तापयुता प्रभुं भक्त्या पूजयित्वा निजं स्थानं जगाम ।

प्रभुश्च दीक्षायाः षष्ठीं चतुर्मासीं गमयितुं **भद्रिका**पुर्यां गत्वा तपःपरस्तस्थौ । **गोशाल**श्चाऽपि तत्र षष्ठमासादनन्तरं प्रभोर्मिलितः । मुदितश्च स प्रभुं सेवमानः पूर्ववत् तस्थौ । प्रभुश्च विविधाभिग्रहपूर्वकं चतुर्मासक्षपणं कृत्वा वर्षाकालेऽतीते नगर्या बहिः पारणकं चकार ॥ ३ ॥

*इति दशमे पर्वणि श्रीमहावीरप्रथमषड्वर्षछद्मस्थविहार-*
*वर्णनात्मकः तृतीयः सर्गः ॥३॥*

## चतुर्थः सर्गः

अथ प्रभु**र्वीरो गोशाल**सेवितो **मगध**भूमावष्टौ मासान् निरुपसर्गं विजहार । **आलभिका**यां नगर्यां च प्रभुश्चतुर्मासक्षपण-पूर्वकं चतुर्मासीं गमयामास । ततश्च पुर्या बहिः पारणं विधाय **गोशाले**न सह विहरन् **कुण्डक**ग्रामं प्राप्य वासुदेवायतनस्यैकस्मिन् कोणे प्रतिमाधरस्तस्थौ । **गोशाल**श्च स्वभावादेव निर्लज्जो विष्णुप्रतिमां दूषयन् पूजकेनाऽऽगतेन दृष्टः । पूजकश्च तं दृष्ट्वा कोऽप्ययं पिशाचो वा ग्रहगृहीतो वा भवेदिति सम्भाव्याऽऽयतने प्रविवेश । ततश्चारु निरूप्य नग्नत्वाच्छ्रमणोऽयं कोऽपीत्युपलक्ष्य ''मयाऽस्य हननेऽदोषो धार्मिकोऽर्चकेन हत' इति लोकापवादः स्यात् । एवं विचिन्त्य ग्रामं गत्वा तद्दर्शनाय जनानानयति स्म । चपेटाभिर्मुष्टिभिश्च ग्राम्यबालैर्हन्यमानः स वृद्धैर्ग्रहिलममुं हत्वा-ऽलमिति मोचितः ।

अथ प्रभु**र्मर्दना**ख्यं निवेशनं गत्वा बलदेवायतने प्रतिमा-धरस्तस्थौ । **गोशाल**श्च तत्राऽपि बलदेवप्रितमां दूषयन् पूर्ववदेव ग्राम्यैः कुट्टितो मोचितश्च वृद्धैः । ततो विहृत्य च प्रभु**र्बहुशाला**ख्यं ग्रामं प्राप्य **शालवनो**द्याने प्रतिमया तस्थौ । तत्र च **शालार्या** नाम व्यन्तरी विनैव कारणं क्रुद्ध्वा प्रभोरुपसर्गानकरोत् । श्रान्ता च शान्तकोपा सा प्रभुं पूजयामास ।



प्रभुश्च ततो विहृत्य **जितशत्रु**नृपेण शासितं **लोहार्गल**पुरं प्राप । तदा च तस्य नृपस्याऽन्येन नृपेण विरोधोऽभूत् । **गोशाले**न सहाऽऽगच्छंश्च प्रभुर्मार्गे तत्पुरुषैर्दृष्टः पृष्टश्च प्रतिवचोऽददानो गुप्तचर इति नृपस्य समर्पितः । **अस्थिक**ग्रामात् पूर्वमेवाऽऽगत **उत्पल**श्च प्रभुं दृष्ट्वा वन्दित्वा च **जितशत्रुं** निवेदयामास । ततो नृपोऽपि प्रभुं भक्तितो ननाम । प्रभुश्च विहरन् **पुरिमताला**ख्यं नगरं प्राप ।

अथ **पुरिमताले** नगरे पुरा **वागुरः** श्रेष्ठी तद्भार्या **भद्रा** चा-ऽऽस्ताम् । सा च वन्ध्या पुत्रार्थं दानं कुर्वती श्रान्ता । अन्यदा च तौ दम्पती **शकटमुखो**द्यानं गत्वा रममाणौ भ्रमन्तौ जीर्णं महदायतनं दृष्ट्वा प्रविष्टौ **मल्लिनाथ**स्य प्रतिमां भक्त्या ववन्दाते । ''यदि त्वत्प्रसादात् पुत्रः पुत्री वा भविष्यति, तदा त्वच्चैत्यमुद्धरिष्यावहे त्वद्भक्तौ च भविष्याव'' इत्यूचतुश्च । ततस्तौ श्रेष्ठिनौ निजगृहं जग्मतुः । तत्राऽऽसन्नाया जिनभक्ताया व्यन्तर्याः प्रभावतश्च श्रेष्ठि विश्वासवर्धनो **भद्रा**या गर्भोऽभवत् । **वागुर**श्च तत्प्रभृत्येव तद्देवकुल-मुद्धर्तुं प्रारेभे । स **वागुरो**ऽभिग्रहमादाय प्रत्यहं गत्वा त्रिसन्ध्यं **मल्लि**प्रतिमां पूजयामास । तं जिनभक्तं ज्ञात्वा च साधवः साध्व्यश्च विहारक्रमेणाऽऽयान्ति स्म । स **वागुरो**ऽपि तान् पूजयति स्म । साधुसम्पर्काच्च तौ श्रेष्ठिदम्पती श्रावकत्वं जगृहतुर्विधिं च बुबुधाते।

प्रभुं च तत्र नगरस्य **शकटमुखो**द्यानस्याऽन्तरे प्रतिमया स्थितं वन्दितुमागत **ईशाने**न्द्रो **वागुरं मल्लि**प्रतिमां पूजयितुं गच्छन्तं दृष्ट्वा ''प्रत्यक्षं जिनं विहाय तत्प्रतिमार्चनाय किं यासि ? अयं हि चरमस्तीर्थकृद् **वीर**प्रभुर्विहरन्नत्र छद्मस्थः प्रतिमया तिष्ठती''त्युवाच। ततो **वागुरो** लज्जया सङ्कुचितगात्रो मिथ्यादुष्कृतमित्युक्त्वा

त्रिःप्रदक्षिणीकृत्य प्रभुं **वीरं** भक्त्या ववन्दे । तत **ईशानेन्द्रो वागुर**श्च निजं स्थानं जग्मतुः ।

अथ **वीर**प्रभु**रुष्णाक**सन्निवेशमगात् । गच्छतश्च प्रभोस्तत्काल-जातविवाहौ विकृताकारौ वधू-वरौ सम्मुखमागतौ । **गोशालक**श्च तौ प्रेक्ष्य "द्वयोर्विकृताकारयोर्वधू-वरयोः समो योग" इति तयोः पुरोभूय भूयो भूयो ब्रुवन् विदूषक इव जहास । तेन क्रुद्धा वधू-वरपक्षाः पुरुषास्तं कुट्टयित्वा चौरमिव मयूरबन्धेन बद्ध्वा वंशगह्वरे चिक्षुपुः। ततो **गोशाल** उवाच-"प्रभो ! अन्यत्राऽपि दयालुस्त्वं किं मां बद्धं सेवकमुपेक्षसे ?" ततः **सिद्धार्थ** उवाच-"तव निजदुश्च-रितैरेवैषा विपत्" । प्रभुश्चाऽदूर एव गत्वा **गोशालं** प्रतीक्षमाणस्त-स्थौ । वधू-वरपक्षाश्च तं दृष्ट्वा चिन्तयन्ति स्म-"असौ देवार्यस्य सेवकः स्यात्, यतोऽमुमेष प्रतीक्षते" । एवं निश्चित्य च ते **गोशाल**ममुञ्चन्।

ततस्तेन सह विहरन् प्रभु**र्गोभूमिं** प्राप्तवान् । तत्र **गोशालो** गोपालान् पप्रच्छ-"म्लेच्छा बीभत्साकारा व्रजशूरा ! एष मार्गः क्व याती"ति वदन्तु । ततो गोपालाः प्रत्यूचुः-"भो ! विना कारणं किमस्मानाक्रोशसि, न त्वमस्माकं श्यालः" । ततो **गोशाल** प्रत्युवाच-"भो ! दासीपुत्राः ! यदि न सहिष्यध्वे तदाऽधिकमाक्रोक्ष्यामि, मया नाऽऽक्रोशः कृतः, एष हि वः स्वभावः" तेन च क्रुद्धास्ते **गोशालं** कुट्टयित्वा बद्ध्वा च वंशगह्वरेऽक्षिपन् । दयालवोऽध्वन्याश्च तममोचयन् ।

अथ प्रभू **राजगृहं** गत्वा चतुर्मासक्षपणभृद् विविधाभिग्रह-पूर्वकं चतुर्मासीं गमयामास । अन्ते च पुर्या बहिः पारणं विधाय प्रचुरं कर्म निर्जरणीयं ध्यात्वा तन्निर्जरणाय **गोशाले**न सह



**वज्रभूमि-शुद्धभूमि-लाटा**दिम्लेच्छदेशं जगाम । तत्र च म्लेच्छा नानाविधैरुपसर्गैः प्रभुमुपदुद्रुवुः । प्रभुस्तु तैरुपसर्गैः कृत्वा कर्म-निर्जरणसहायांस्तान् म्लेच्छान् बन्धूनिव मेने ।

अहो ! यस्य पादाङ्गुष्ठप्रेरणमात्रेण **मेरु**रपि चकम्पे स एव **वीरः** स्वकर्मभिः पीडितो न मनागपि क्षोभं जगाम । उपसर्ग-निवारणाय शक्रेण नियुक्तः **सिद्धार्था**ख्योऽमरोऽपि **गोशाल**विषय एव शूरोऽभूद्, नाऽन्यदा । प्रभुश्च जगत्पालन-नाशनक्षमं स्वबलमपि तदुपसर्गनिवारणाय कर्मवृद्धिभयाद् न शिश्रिये । शीतघर्मादि-भ्यस्त्राणार्थं वसतिमप्यप्राप्नुवन् प्रभुः षण्मासान् यावद् धर्मजागरिकया जाग्रदवतस्थे । तत्र हि प्रभुः शून्यगृहे तरुतले वा धर्मध्यानपरो नवमं वर्षाकालं गमयामास ।

अथ प्रभुस्ततो विहृत्य **सिद्धार्थ**पुरमाजगाम । ततोऽपि च **गोशाले**न सह **कूर्म**ग्रामं प्रति विजहार । मार्गे च तिलस्तम्बं दृष्ट्वा "अयं निपतस्यते नवे"ति **गोशालः** प्रभुं पप्रच्छ । प्रभुश्चाऽपि भवितव्यतावशाद् मौनं त्यक्त्वा जगौ-"भद्र ! निपतस्यतेऽयं तिलस्तम्बः, किन्त्वस्मिन् सप्ताऽपि पुष्पजीवा अवस्थिताः सन्ति, अस्यां शिम्ब्यां तावन्तस्तिला भविष्यन्ति" । प्रभुवचस्यश्रद्धया च **गोशाल** उत्खन्य समृदं तं तिलस्तम्बं क्वचिदन्यत्र क्षिप्तवान् । प्रभुवचोऽसत्यं मा जनीति सन्निहितैः सुरैस्तदानीं जलवृष्टिर्विचक्रे। तेन च तिलस्तम्बस्तत्र न तान्तः । तत्प्रदेशेनैव गच्छन्त्या गोः खुरेणाऽऽक्रान्तश्च स तिलस्तम्बः क्लिन्नभूमौ मूलेन प्रविष्टो रोपितो-ऽभवत् । क्रमात् प्ररूढमूले उद्गताङ्कुरे च तस्मिन् तिलस्तम्बे तानि पुष्पाणि वर्धन्ते स्म । प्रभुश्च मन्दमतिना **गोशाले**नाऽनुस्रियमाणः **कूर्म**ग्रामं जगाम ।

इतश्च **चम्पा-राजगृह**योर्मध्ये समृद्धो **गोबर**ग्रामो बभूव । तत्र चाऽऽभीराधिपो **गोशङ्खी** गृहमेध्यासीत् । तस्य चाऽतिप्रिया **बन्धवती** नाम भार्या वन्ध्याऽऽसीत् । तस्य ग्रामस्य समीप एव **खेटका**ख्यो ग्रामो दस्युभिर्हतो बन्दाश्च गृहीताः । तदा च तत्र **वेशिका** नाम स्त्री सुतं प्रासूत । दस्युभिश्च पतिं हत्वा सुरूपा साऽपहृता । सा च नवप्रसवपीडिता बालमादाय गन्तुं न शशाक । तदा चौरास्तामूचुः-"यदि त्वं जीवितमिच्छसि तदा बालकं त्यज"। सा च भयाद् बालं वृक्षतले मुक्त्वा चौरैः सह जगाम । प्रातश्च गोभिः सह तत्राऽऽगतो **गोशङ्खी** तं सुरूपं बालकं दृष्ट्वा गृहीत्वा पुत्रत्वेन निजपत्न्याः समर्पितवान् । तथा स छागं हत्वा बालकं रक्तेन लिप्तं कृत्वा पत्न्याऽपि सूतिकावेषं ग्राहयामास । लोके च "मद्भार्या गूढगर्भाऽधुना पुत्रं सुषुवे" इति वदन् महोत्सवं चकार ।

**वेशिका** च चौरै**श्चम्पा**पुर्यां चतुष्पथे विक्रेतुं स्थापिता वेश्यया क्रीता गणिकाव्यवहारं शिक्षिता च प्रसिद्धगणिका जाता । **गोशङ्खि**कसुतश्च क्रमेण तारुण्यं प्राप्तो घृतशकटं विक्रेतुं मित्रेण सह **चम्पा**पुरीं गतः । तत्र रमणीभिर्विलासपरान् तरुणान् दृष्ट्वा रिरंसुर्गणिकापाटकं गत्वा वेश्यामध्ये **वेशिकां** दृष्ट्वा तामेवैच्छत् । तदैव च स तस्या **ग्रहणका**ख्यं रतिभाटकमदापयत् । रात्रौ च कृतस्नान-विलेपनस्तद्गृहाय प्रतस्थे । मार्गे च पुरीषे मग्नं पादं स्मरातुरः स नाऽज्ञासीत् । तत्कुलदेवता च तं प्रबोधयितुं तत्क्षणमेव गां वत्सं च विकृत्य तन्मार्गमध्ये तस्थौ । यावच्च स पुरीषापाकरणाय पादेन वत्समघर्षयत् तावत् स वत्सो गां मानुष्या वाचोवाच-"मातः ! पश्य, अयं निर्लज्जः पापी पुरीषलिप्तं पादं



मत्तनौ घर्षति" । ततो गौरुवाच-"मा खिद्यस्व, अस्य न किमप्य-कार्यम्। यतोऽयं कामातुरो निजां मातरमेव रन्तुं त्वरते" ।

तच्छ्रुत्वा च स दध्यौ-"गावः कथं मनुष्यवाचा वदन्ति ? एतस्या वेश्यायाश्च कथमहं पुत्रः ? तां वेश्यामेव पृच्छामि" । एवं ध्यात्वा स तद्गृहं गतस्तया वेश्ययाऽभ्युत्थानादिना कृतादरः कामक्रीडां विहाय गोवाचा साशङ्कः क्षणं स्थित्वा तां पप्रच्छ-"निजं पूर्ववृत्तादिकं कथय" । सा च तदनाकर्णितकं कृत्वा हावभावान् दर्शयति स्म । ततः सोऽवोचत्-"तव कथितद्विगुणं धनं दास्यामि, तव स्वपित्रोः शपथः, त्वं स्वकीयं यथार्थं वृत्तं ब्रूहि" । एवं पुनः पुनस्तेन पृष्टा सा यथायथं स्ववृत्तमाख्यातवती ।

ततः स साशङ्क उत्थाय स्वग्रामं गत्वा पितरौ पृच्छति स्म-'किमहं युवयोरङ्गजोऽस्मि क्रीतो वाऽन्यथा वा प्राप्तः, मम यथार्थं कथ्यताम् । ताभ्यां चाऽऽवयोरङ्गजोऽसीति कथितश्च स तयोरय-थार्थकथनखिन्नोऽभुक्त्वैव तस्थौ । ततः पितरौ तस्य यथार्थ-माख्यातवन्तौ । तेन च स **वेशिकां** वेश्यां निजमातरमज्ञासीत् । ततः स **चम्पां** गत्वा **वेशिका**याः स्ववृत्तान्तं कथयामास । साऽपि च तं स्वपुत्रं ज्ञात्वा लज्जानम्रमुखी रुरोद । ततः स द्रव्यं दत्त्वा कुट्टिन्याः स्वमातरं मोचयित्वा ग्रामं नीत्वा धर्ममार्गेऽस्थापयत् । **वेशिका**पुत्र इति स ग्रामे **वैशिकायन** इति ख्यातो विषयविरक्तस्तापस-व्रतमग्रहीत् ।

शास्त्राभ्यासपरो धर्मनिपुणः स क्रमात् **कूर्म**ग्राममाजगाम । तद्ग्रामाद् बहिश्च स ऊर्ध्वबाहुः सूर्यमण्डलन्यस्तदृष्टिर्जटामण्डितः स्थिरो विनयी दयादिगुणसम्पन्नो धर्मध्यानस्थितो मध्याह्ने

आतापनामकरोत् । सूर्यकिरणतापेन भुवि निपतिता यूकाः स दयालुरवचित्य पुनर्मूर्ध्नि क्षिपति स्म ।

**गोशाल**श्च तं दृष्ट्वा समीपमेत्य तमुवाच–"त्वं किं तत्त्वं जानासि अथवा यूकाशय्यातरोऽसि, कस्त्वमसि नरो वा नारी वा? न सम्यग् विज्ञायसे" । एवं सहासं पृष्टोऽपि स तापसः क्षमावान् न किमप्युवाच । भूयो भूयश्च **गोशाल**प्रश्नतः क्रुद्धः स तापस–स्तेजोलेश्यां विसृष्टवान् । ततो भीतो **गोशालः** पलाय्य प्रभुसमीपं ययौ । प्रभुश्च **गोशालकं** तेजोलेश्याया रक्षितुं शीतलेश्यां विससर्ज । तया च जलेनाऽग्निरिव तेजोलेश्योपशान्ता । **वैशिकायन**श्च प्रभोस्तामृद्धिं दृष्ट्वा विस्मितो **वीर**जिनमुपेत्य सविनयमुवाच–"प्रभो ! तवैष शिष्य इति मया न ज्ञातः, तन्मम विरुद्धाचरणं क्षन्तुमर्हसि" ।

एवमुक्त्वा तस्मिन् गते च **गोशालकः** प्रभुं पप्रच्छ–"कथं तेजोलेश्या लब्धिर्जायते" । तदा **वीर**प्रभुर्जगौ–"यो यमी सर्वदा षष्ठं विदध्यात्, सतुषकुल्माषधान्यमुष्ट्या जलचुलुकेन च पारणं विदध्यात्, तस्य षण्मासान्तेऽप्रतिहता शत्रुभयङ्करोत्तमा तेजोलेश्योत्पद्यते" ।

अथ प्रभुः **कूर्म**ग्रामाद् **गोशाले**न सह प्रस्थाय **सिद्धार्थपुरं** नगरं प्रति विजहार । तत्तिलस्तम्बदेशे प्राप्ते च **गोशालको**ऽवोचत्–"भवता कथितोऽसौ तिलस्तम्बो न निष्पन्नः" । ततो **वीर**जिनो जगौ-"निष्पन्नः स तिलस्तम्बोऽत्र वर्त्तते" । अश्रद्धालुश्च **गोशाल**स्तत्र तिलशिम्बां व्यदारयत् । तत्र च सप्त तिलानवलोकमानो **गोशालो**ऽवक्–"जन्तवः परावृत्त्य पुनस्तत्रैवाऽङ्गे जायन्ते" ।

❀ ❀ ❀



अथाऽन्यदा स प्रभुणाऽऽख्यातां तेजोलेश्यां साधयितुं प्रभुं त्यक्त्वा **श्रावस्तीं** नगरीं जगाम । तत्र च स कुम्भकारशालायां स्थितः प्रभुकथितविधानेन षाण्मासिकं तपोऽकरोत् । तेजोलेश्या च तस्याऽसेधीत् । ततः स तेजोलेश्यापरीक्षार्थं कूपतटे गत्वा स्वस्य क्रोधाविर्भावाय कर्करेण दास्या घटमनाशयत् । सा च तमाक्रोष्टुमारेभे ।

ततश्च **गोशाले**न मुक्ता तेजोलेश्या क्षणादेव पतिता विद्युदिव दासीमधाक्षीत् । तेन च जातविश्वासः कौतुकी स **गोशालो** लोकैः परिवृतो विजहार । क्रमाच्च तस्य त्यक्तव्रता अष्टाङ्गनिमित्तज्ञाः षट् **पार्श्व**शिष्याः **शोण-कलिन्द-कर्णिकारा**-**ऽच्छिद्रा**-**ऽग्निवेशाना**-**ऽर्जुना** मिलिताः । सोहृदाच्च तस्य तेऽष्टाङ्गमहानिमित्तमुपदिदिशुः । ततः स **गोशाल**स्तेजोलेश्या-ऽष्टाङ्गमहानिमित्तज्ञानगर्वितोऽहं जिनोऽस्मीति वदन् पृथिवीं विजहार ।

इतश्च प्रभुः **सिद्धार्थ**पुराद् **वैशालीं** नगरीं गतः स्वपितृमित्रेण गणराज**शङ्खे**न पूजितः । ततः प्रस्थाय च **वीर**जिनो **वाणिजकं** ग्रामं प्रति प्रस्थितो मार्गे **मण्डिकिका**ख्यां नदीं नावाऽतारीत् । उत्तीर्णमात्र एव च प्रभुर्नाविकैर्नद्युतारणद्रव्यार्थिभिस्तप्ते सैकते धृतः । तदानीमेव च **शङ्ख**नृपजामेय**श्चित्रा**ख्यो नौसैन्येन तत्राऽऽगतः प्रभुं दृष्ट्वा नाविकान् भर्त्सयित्वा मोचयित्वा भक्त्या पूजयित्वा च स्वपुरं जगाम ।

अथ प्रभुर्विहरन् **वाणिजक**ग्रामं प्राप्य ग्रामाद् बहिरेव प्रतिमया धर्मध्यानस्थस्तस्थौ । तदानीं च तत्र ग्रामे षष्ठतपःपरायणो नित्यमातापनालीनोऽवधिज्ञानवा**नानन्द**श्रावकः प्रभुं वन्दित्वा

बद्धाञ्जलिरुवाच-प्रभो ! सुदुःसहान् परीषहानुपसर्गांश्चाऽसहिष्ठाः, ततस्ते शरीरं मनश्च वज्रसारं मन्ये । इदानीं तव केवलज्ञानं समीपमेव वर्त्तते" । एवमुक्त्वा स **आनन्दो वीर**जिनं पुनर्नत्वा स्वगृहं जगाम ।

अथ प्रभुस्तत्र कायोत्सर्गं पारयित्वा ततो विहृत्य **श्रावस्त्या**-मागत्य दीक्षातो दशमं प्रावृट्कालं गमयामास । तत्र च पुराद् बहिः पारणां विधाय **सानुयष्टिकं** ग्रामं गत्वा **वीर**जिनो भद्रां प्रतिमां प्रपन्नवान् । तत्र प्रतिमायां कृतानशनः प्रभुः पूर्वं पूर्वाभिमुख एकपुद्गलविन्यस्तदृष्टिः सकलं दिनं तस्थौ । ततो रात्रौ दक्षिणाभि-मुखः पुनर्दिने पश्चिमाभिमुखस्ततो रात्रौ उत्तराभिमुख इत्येवं षष्ठेन प्रतिमां चकार । पारणामकृत्वैव च प्रभुर्महाभद्राप्रतिमामाश्रित्य चतुरहोरात्रीं पूर्वादिदिशा क्रमात् तस्थौ । एवं दशमेन महाभद्राप्रतिमां चकार ।

ततो **वीर**जिनो द्वाविंशतितमेन सर्वतोभद्रां प्रतिमां प्रपेदे । तत्र प्रत्येकमप्यहोरात्रं दशसु दिशास्वपि तस्थौ । किन्तु तत्रोर्ध्वाधो-द्रव्याण्यूर्ध्वाधोदिशो निर्दधौ । तदेवं तिस्रोऽपि प्रतिमा विधाय पारणार्थं प्रभु**रानन्द**श्रावकगृहं प्रविवेश । तदानीं च तत्र **बहुला**दासी भाण्डानि क्षालयन्ती पर्युषितं भक्तं त्यक्तुकामा प्रभुमागतं दृष्ट्वा किं तुभ्यं कल्पते इत्यपृच्छत् । प्रभुणा च प्रसारिते करे सा भक्त्या तदन्नं ददौ । प्रभुश्च तेनाऽन्नेन पारणं चकार । तेन प्रसन्नाश्च देवास्तत्र पञ्च दिव्यानि चक्रुः । सर्वो जनश्च मुमुदे । राज्ञा च तदैव **बहुला** दासीभावाद् मुक्ता ।

अथ प्रभुर्विहरन् म्लेच्छाकीर्णां **दृढभूमिं** प्राप्य तत्र **पेढाल**ग्रामं समया **पेढालो**द्याने कृताष्टमतपाः **पोलासं** चैत्यं प्रविवेश । तत्र जन्तुरहिते शिलातले निर्निमेषो रूक्षैकद्रव्यदत्तदृष्टिरेकरात्रिक्या



महाप्रतिमया तस्थौ । तदानीं च शक्रः **सुधर्मा**यां निजपरिजन-परिच्छदसुरैः परिवेष्टितः सङ्गीतकैः कालं नयन्नवधिज्ञानतः प्रभुं तथास्थितं ज्ञात्वा यथाकल्पं नत्वा शक्रस्तवेन स्तुत्वा च सकलां सभामुद्दिश्योवाच-"समित्यादिगुणसमग्रो विषयनिःस्पृहो रूक्षैकपुद्गल-दत्तदृष्टिर्ध्यानस्थः प्रभु**र्वीर**जिनस्त्रिलोक्यां कैरपि ध्यानाच्चालयितुम-शक्यः" ।

शक्रस्य तद्वचः श्रुत्वा शक्रसामानिको देवोऽभव्यो मिथ्यादृष्टिः **सङ्गमः** कोपादुवाच-"मर्त्यः श्रमणकोऽयं किं वर्ण्यते ? सुराणाम-तुलबलप्रभावाणां यथाक्रमं सिद्धिसमग्राणां पुरः कियानयं मानवः ? एषोऽहं तं ध्यानाच्चालयिष्यामि" । एवमुक्त्वा स **सङ्गम**सुरः सभामण्डपादुत्थितवान् । जिना अन्यसाहाय्यादविघ्नं तपश्चरन्तीति कोऽपि मा ज्ञासीदिति शक्रस्तमुपेक्षितवान् । **सङ्गम**सुरश्च रौद्राकृतिर्भयङ्करो वेगाद् गत्वा **वीर**जिनं तथास्थितं दृष्ट्वा प्रवृद्धमत्सरः प्रभोरुपरि पांसुवृष्टिं ततान । प्रभुश्च तेन पांसुपुञ्जेन सर्वाङ्गमाच्छादितो निरुद्धसर्वेन्द्रियो निःश्वासोच्छ्वासयोरप्यसमर्थोऽपि तिलमात्रमपि ध्यानाद् न विचलितः ।

ततः स पांसुवृष्टिं मुक्त्वा वज्रमुखाः पिपीलिका विकृत्य ताभिः प्रभोः सर्वाङ्गं पीडयामास । ततोऽपि चाऽक्षुब्धे ध्यानैकताने प्रभौ स दंशान् विचकार । दंशदंशैश्च क्षीरधारासहोदरैः स्रवद्भिर-सृग्भिः प्रभुर्निर्झरैः पर्वतराज इव बभौ । एवमपि निष्कम्पध्यानस्थे प्रभौ स मन्दमतिः सुरः प्रचण्डमुखसूच्यो घृतेलिका विचकार । ताभिर्विद्धोऽपि प्रभुर्ध्यानाद् न व्यचलत् । ततः स दुष्टो विभोर्ध्यानभङ्गार्थं कृतनिश्चयो महावृश्चिकान् विचकार । ते वृश्चिकाश्च पुच्छाङ्कुरकण्टकै**र्वीर**जिनशरीरं बिभिदुः । ततोऽपि **वीर**जिने

पूर्ववदेवाऽक्षुब्धे स्थिते स दुरभिसन्धिः सुरस्तीक्ष्णदंष्ट्रान् नकुलान् विचकार । ते नकुलाश्च खिखीतिशब्दायन्तो दशनैर्विदार्य प्रभुशरीराद् मांसखण्डानकृन्तन् । तथा सत्यपि ध्यानादचलिते प्रभौ मोघश्रमः स सुरः प्रभुमापादमस्तकं विकृतैर्भयङ्करैर्दीर्घभोगैर्भोगिभिरवेष्टयत् ।

तेषु सर्वेष्वपि श्रान्तेषु स कुबुद्धिर्देवो वज्रदन्तान् मूषकान् विचकार । ते मूषकाश्च प्रभोरङ्गानि नखदन्तादिभिर्ददंशुः। क्षते मूत्रणेन कृत्वा क्षारं निचिक्षिपुश्च । ततोऽपि विफलमनोरथः स सुराधमो भयङ्करं गजरूपं विकृत्याऽधावत । प्रभुं शुण्डाग्रेण गृहीत्वा च स प्रमत्तो गजः प्रभुं नभसि चिरमुल्लालयित्वा "ऽसौ विशीर्य-कणशो भवत्वि"ति दुराशयेन दन्तावुत्क्षिप्य नभसः पतन्तं प्रतीच्छति स्म । भूमौ पतितं च प्रभुं स दन्ताघातेन मुहुर्मुहुर्विध्यति स्म । एवमपि स्थिरध्यानस्थे प्रभौ स करिणीं विचकार । सा च प्रभुं दन्ताभ्यां विभिद्य विषेणेव स्वशरीरजलेन सिषेच ।

पुनश्च स सुरः करेणुद्रव्यादेव विकृताकारं ज्वालाजालभीषणं विवृतास्यं पिशाचं विचकार । स पिशाचश्च कृताट्टहासश्चर्म-वस्त्रकर्त्रिकाधरः प्रभुमुपाद्रवत् । तस्मिन्नप्युपशान्ते च स देवः क्रोधाध्मातो व्याघ्ररूपं विचकार । स च व्याघ्रः पुच्छं चालयन् बूत्कारदारुणो दंष्ट्राभिर्नखैश्च प्रभुशरीरं पीडयामास । तस्मिन् व्याघ्रेऽपि विफले स देवहतकः **सिद्धार्थ**नृपरूपं विचकार । "भवता किमेतदतिदुष्करमारब्धं, प्रव्रज्यां त्यज, अस्माकं प्रार्थनां न मोघां कुरु, मां वार्धकेऽशरणं **नन्दिवर्धन**स्तत्याजे"त्युवाच च । तेन सुरेण विकृता **त्रिशला**ऽप्येवं मुहुर्मुहुर्विललाप । तयोर्विला-पैरप्यचलिते प्रभौ स दुर्धीः सुरः स्कन्धावारं विकृतवान् । तत्र च पाचक ओदनपाकार्थं चुल्लीस्थाने शिलां विहाय प्रभोः पादौ कृत्वा



पाकस्थालीं न्यवेशयत् । तथा तेन तत्क्षणं ज्वालितोऽग्निः प्रभोः पादमूले प्रजज्वाल । तेन तप्तस्याऽपि प्रभोः स्वर्णस्येव न श्रीहानिर्जाता ।

ततः स देवहतको घोरारावं चाण्डालं विचकार । स चाण्डालश्च **वीर**जिनस्य कण्ठे कर्णयोर्भुजयोर्जङ्घयोश्च लघुपक्षिपञ्जराणि लम्बयामास । तेन च प्रभोः शरीरं लम्बितपक्षिचञ्चु-नखाघातै-र्विदीर्णं पञ्जरमिव छिद्रशतसङ्कुलं जातम् । तेनोपसर्गेणाऽप्यक्षुब्धे प्रभौ स देवो महोत्पातकरं तीव्रवेगं झञ्झावातं विचकार । स वातश्च वृक्षानुन्मूल्य नभसि क्षिपन् पांसुभिर्द्यावापृथिव्यौ पूरयन् प्रभुमुत्पाट्यो-त्पाट्य पातयति स्म । प्रभुश्च तथाऽपि ध्यानाद् न चचाल ।

ततः स सुर आवर्तिमहाव्रातं विकृत्य चक्रस्थमृत्पिण्डमिव प्रभुं भ्रमयामास । तेनाऽपि च प्रभुर्न चकम्पे । ततः स सुराधमो दध्यौ-"अयं वज्रवद्दृढमनाः कथमपि न क्षुभ्यति, अहं च भग्नवाक् कथं **सुधर्मां** यामि । अस्य प्राणनाशेनैव ध्यानं भङ्क्ष्यति नाऽन्यथा" । एवं ध्यात्वा स **सङ्गम**सुरः कालचक्रं विकृत्य लौहभारसहस्रघटितं **रावणः कैलास**मिवोद्धृत्य प्रभोरुपरि चिक्षेप । तच्चक्रं च ज्वालाजालैर्भयङ्करं समुद्रे वडवानल इव प्रभोरुपरि पपात । तच्चक्रप्रहारतश्च प्रभुराजानु पृथिव्यामन्तर्मग्नवान् । एवं स्थितोऽपि प्रभुस्तस्येदं कर्म शुशोच ।

अथ सुरो दध्यौ-"अयं कालचक्रहतोऽपि न विपन्नवान् । तदसौ न शस्त्रास्त्रसाध्यः । कदाचिदनुकूलैरुपसर्गैः क्षुभ्येत्" । एवं विचार्य च देवोऽनुकूलानुपसर्गांश्चकार । स दुष्टमतिर्देवस्तत्क्षणं प्रकाशमानदिशं पक्षिरवमनोहरं प्रातःकालं विचकार । प्रभुश्च तां दैवीं

मायां मन्यमानो ध्यानं न मुमोच । ततः स देवः किरीट-हारादि-विभूषितो विमानस्थः पुरोभूय प्रभुमुवाच-"महामुने ! तव प्राणेष्वप्यनपेक्षया दृढप्रतिज्ञया तपसा बलेन सत्त्वेन च प्रसन्नोऽस्मि। यथेष्टं याचस्व, त्वां स्वर्गं मोक्षं वा प्रापयामि, चक्रित्वं वा ते यच्छामि" ।

एवं प्रलोभनावाक्यैरदत्तप्रतिवचस्यक्षुब्धे प्रभौ सोऽमरः पुनर्दध्यौ-"अनेन मम सर्वं बलाम्बरं विफलीकृतम्, इदानीं कामशासनमेवाऽमोघं यदि स्यात् । कामिनीकटाक्षताडिता महापुरुषा अपि व्रतं त्यजन्ति" । एवं विचार्य च स देवो मनसा देवाङ्गना आदिष्टवान् । कामसहायान् षड्ऋतूनपि प्रेरयामास । ऋतुषु प्रादुर्भूतेषु च तत्र देवाङ्गनाः प्रादुर्भूय प्रभोः पुरः सङ्गीतकं चक्रुः । प्रभुं क्षोभयितुं च विविधहावभावं प्रदर्शयामासुः । काश्चिच्च मदनपीडिता इव त्यक्तं कामयाचनां चक्रुः" । किन्तु प्रभुः कथमपि क्षोभं न जगाम । स देव उक्तरीत्या कायोत्सर्गस्थे प्रभौ विंशतिमुपसर्गान् चकार ।

अथ प्रातः **सङ्गम**सुरो दध्यौ-"अहो ? असौ मर्यादायाः सागर इव ध्यानाद् मनागपि न चचाल । तदभ्रष्टवाक् किं स्वर्गं यामि ? तदहं चिरं स्थित्वाऽमुमुपसर्गैः क्षोभयिष्यामि" । भगवान् **वीर**श्च सूर्योदये जाते **वालुका**ख्यं ग्रामं प्रति विजहार । **सङ्गम**सुरश्च मार्गे चौराणां पञ्चशतीं प्रोचै**र्वालुकां** च विचकार । ते चौराश्च मातुल ! मातुल ! इति जल्पन्तः प्रभुं तथाऽऽश्लिष्यन्ति स्म यथाऽद्रिरपि पिष्टः स्यात् । प्रभुश्च **वालुका**यां जानुदघ्नं मज्जत्पादोऽपि **वालुका**ग्रामं जगाम । स दुर्बुद्धिर्देवश्च पुरे ग्रामे वनेऽन्यत्राऽपि



चेत्थमुपसर्गांश्चकार । एवमुपसर्गं कुर्वतः **सङ्गम**सुरस्य षण्मासा व्यतीयुः ।

अथ **वीर**जिनो गोकुलं जगाम । तदानीं च तत्रोत्सव आसीत्। **वीर**प्रभुश्च तान् षण्मासानुपोषितोऽतीत्य पारणार्थं गोकुलं प्राविशत् । ज्ञानोपयोगेन च तं देवमुपसर्गनिवृत्तं ज्ञात्वा प्रभुर्भिक्षाया निवृत्त्य बहिः प्रतिमया तस्थौ । ततो देवोऽवधिं प्रयुज्य प्रभुमक्षुब्धं ज्ञात्वा दध्यौ-"षण्मासीं यावदविरतं कृतैरुपसर्गैर्न चलितोऽसौ । दीर्घकालेना-ऽप्ययं ध्यानात् क्षोभं नैष्यति । तत्पर्वतभेदने गजस्येव मम प्रक्रमो वृथा जातः । स्वर्गं त्यक्त्वा भूमिष्ठस्य मम कियच्चिरं भ्रमितव्यम् ?"

एवं विचार्य स देवः प्रभुं प्रणम्य बद्धाञ्जलिर्दीनमुखो लज्जितश्चोवाच-"सभायां शक्रेण यथा वर्णितस्तथैवाऽसि, तद्वचस्य-श्रद्धया च मयैवमुपद्रुतोऽसि, त्वं सत्यप्रतिज्ञोऽहं च भ्रष्टप्रतिज्ञः । मया साधु न कृतम् । दयालो ! तत् क्षमस्व । अहमुपसर्गं विहाय स्वर्गं यास्यामि । त्वमपि ग्रामादिषु निःशङ्कं विहर । भिक्षार्थं ग्रामं प्रविश । अदूषितमाहारं च भुङ्क्ष्व । मयैव पुरा भिक्षादोषा विहिताः" । ततः प्रभुरुवाच-"**सङ्गम**देव ! मम चिन्तां त्यज । वयं स्वेच्छयैव विहरामः" । ततः स देवः प्रभुं प्रणम्य पश्चात्तापतप्तो दिवं ययौ ।

इतश्च **सौधर्म**वासिनो देवास्तावन्तं कालं हर्षोत्साहविधुरा उद्विग्नास्तस्थुः । शक्रोऽपि दुःखितस्त्यक्तविनोदव्यापारो दध्यौ-"प्रभोरेतावतामुपसर्गाणामहमेव हेतुरभवम् । मया कृतायां स्वामिवर्णनायां स सुरोऽकुप्यत्" । तावच्च म्लानमुखो नष्टश्रीको भ्रष्टप्रतिज्ञो लज्जाकूणितनेत्रः **सङ्गम**सुरः शक्राधिष्ठितां **सुधर्मां**

सभामाजगाम । शक्रश्च तं दृष्ट्वा सद्यो विमुखो भूत्वा देवानुवाच- ''भोः सुरा ! अयं कर्मचाण्डालः **सङ्गमो** द्रष्टुमनर्हः, अनेन प्रभुर्बहु कदर्थितः । भवादभीतोऽयं मदप्यभीतः । अर्हन्तो नाऽसाहाय्यात् तपः कुर्वन्ति, तेनोपसर्गकाले नाऽसौ शिक्षितो मया । अयं पापो नाऽत्र स्थातुमर्हति । तदसावस्मात् कल्पाद् निर्वासनीयः'' । एवमुक्त्वा शक्रः क्रुद्धो वज्रेणाऽद्रिमिव **सङ्गमं** वामपादेन जघान । ततः स शक्रभटैरायुधैर्हन्यमानो देवाङ्गनाभिराक्रुश्यमानः सामानिकैर्हस्यमानोऽवशिष्टैकसागरोपमजीवितो **यानका**ख्यविमानेन **मेरु**शिखरं जगाम । **सङ्गम**स्य महिष्यश्चाऽपि शक्राज्ञया तमनुगच्छन्ति स्म । तस्य सकलमन्यं परिवारं शक्रो गमनाद् न्यवारयत् ।

अथ द्वितीये दिने **वीर**जिनः पारणार्थं तत्र गोकुले प्राविशत् । तत्रैका गोपालिका स्थविरा भक्त्या प्रभुमुषितेन परमान्नेन प्रत्यलाभयत् । तदानीं देवाश्चिराज्जातेन प्रभोः पारणेन प्रसन्नास्तत्र पञ्च दिव्यानि चक्रुः । ततो विहृत्य च प्रभु**रालभिकां** पुरीं गत्वा प्रतिमया तस्थौ । तत्र विद्युत्कुमारेन्द्रो **हरि**नामा समुपेत्य प्रभुं प्रदक्षिणीकृत्य प्रणम्य चैवमवोचत्- प्रभो ! अस्माकं सोढुमप्यशक्या उपसर्गास्त्वयाऽसह्यन्त, तद्वज्रादपि दृढोऽसि । अधुनाऽल्पेनैवोपसर्गेण घातिकर्मचतुष्टयं परिशाटयित्वाऽचिरादेव केवलमाप्स्यसि'' । एवमुक्त्वा स विद्युत्कुमारेन्द्रः प्रभुं भक्तितः प्रणम्य स्वस्थानं जगाम ।

❀ ❀ ❀

अथ प्रभुस्ततो विहृत्य **श्वेतवीं** पुरीं ययौ । तत्र च विद्युत्कुमारेन्द्रो **हरिसहः** समुपेत्य प्रभुं वन्दित्वा **हरि**वत् कीर्त्तयित्वा च स्वं धाम जगाम । ततश्च विहृत्य प्रभुः **श्रावस्त्यां** गत्वा प्रतिमया तस्थौ । तस्मिन् दिने च तत्र नगरे लोकैर्महाडम्बरपूर्वकं स्कन्द-



रथयात्रामहोत्सवः प्रारब्धोऽभूत् । पौराः प्रतिमास्थं प्रभुमतिक्रम्य चैत्यपूजापात्रमादाय स्कन्दं प्रति ययुः । तत्र च स्कन्दप्रतिमां स्नपयित्वा पूजयित्वा च यथाविधि रथमध्यारोहयितुं प्रवृत्ताः ।

तदानीं च शक्रः प्रभोर्विहारक्रमं चिन्तयन्नवधेस्तथाविधं प्रभुं पौरांश्च ददर्श । ततः प्रभोरतिक्रमणनिमित्तं जनेभ्यः कुपितः शक्रस्तत्राऽऽजगाम । तेनाऽधिष्ठिता च स्कन्दप्रतिमा यन्त्रपुत्तलिकेव प्रभुं प्रत्यचालीत् । ''अहो ! अयं स्कन्दः स्वयं रथमारोक्ष्यती''ति वदत्स्वेव लोकेषु सा प्रतिमा प्रभुमुपेत्य त्रिः प्रदक्षिणीकृत्य नत्वा भूमौ निषद्य चोपासितुमारेभे । ततो लोका ''अस्य देवस्याऽप्ययं पूज्यः, तदस्य प्रागस्माभिः कृतोऽतिक्रमोऽनुचित'' इति ब्रुवन्तः सविस्मयानन्दमग्नाः प्रभोर्महिमानं चक्रुः ।

अथ प्रभुस्ततो विहृत्य **कौशाम्बीं** जगाम । तत्र च प्रतिमास्थं प्रभुं सूर्यश्चन्द्रश्च सविमान उपेत्य सुयात्राप्रश्नपूर्वकं भक्त्या ववन्दाते । ततश्च विहृत्य प्रभु**र्वाराणसीं** गतः शक्रेणाऽभ्येत्य भक्त्या वन्दितः । ततो विहृत्य च प्रभुं **राजगृहे** गतं प्रतिमास्थमी**शानेन्द्रो**ऽभ्येत्य भक्त्या सुयात्राप्रश्नपूर्वकं ववन्दे । ततो विहृत्य **मिथिला**पुर्यां गतश्च प्रभु**र्जनक**नृपेण **धरणेन्द्रे**ण च कुशलप्रश्नपूर्वकं भक्त्या वन्दितः ।

अथ ततो विहृत्य **वैशालीं** गतस्य प्रभोर्व्रतग्रहणदिनादेकादशः प्रावृट्कालो जातः । तस्यां पुर्यां च प्रभुः **समरो**द्याने बलदेवचैत्ये चतुर्मासक्षपणभृत् प्रतिमया तस्थौ । तत्र च नागराजो **भूतानन्दः** समेत्य भक्त्या वन्दित्वा केवलज्ञानं समीपमुक्त्वा स्वं धाम जगाम । तत्र च पुरे परमश्रावको **जिनदत्तो** दयालुर्विभवहाने- **र्जीर्णश्रेष्ठी**ति ख्यातो वसति स्म । तदुपवने बलदेवनिकेतने गतश्च

स **जिनदत्तो वीर**जिनं प्रतिमास्थं दृष्ट्वा 'छद्मस्थ एव सर्वज्ञोऽस्ती'ति निश्चित्य च भक्त्या वन्दित्वा दध्यौ-"प्रभुरद्योपोषितः प्रतिमया स्थितोऽस्ति, श्वो मद्गृहे पारणं कर्त्ता चेत् तदा सुन्दरम्"। एवमाशया स प्रभुं चतुर्मासीं यावद् नित्यं सेवयामास । चतुर्मास्यन्तिमदिने च स प्रभुं निमन्त्र्य स्वगृहं जगाम ।

पूर्वं स्वनिमित्तं सम्पादितानि प्रासुकान्येषणीयानि च चिन्तयित्वा स **जिनदत्तः** प्राङ्गणे जिनागमनं प्रतीक्षमाणः स्थित एतानि भोज्यानि स्वामिने दास्यामीत्यचिन्तयत्। धन्योऽहं यद् मद्गृहे जिनः पारणं करिष्यति, तमागच्छन्तं समभिगत्य त्रिः प्रदक्षिणपूर्वकं वन्दिष्ये, तदिदं ममाऽपुनर्भवाय भविष्यतीत्येवमादि च चिन्तयन् सशुचिमानस्तस्थौ । प्रभुश्च ताव**दभिनव**श्रेष्ठिनो गृहं जगाम। धनमदमत्तश्च स श्रेष्ठी मिथ्यादृष्टिश्चेटीं भिक्षादानायाऽदिशत्। दारुदर्वीकरा च सा कुल्माषानानीय प्रभोः प्रसारिते करपात्रे क्षिप्तवती । तदानीं च देवैर्दुन्दुभिर्वादिता, वस्त्रोत्क्षेपश्च कृतः, पञ्चदिव्यानि च कृतानि । लोकैः पृष्टश्चा**ऽभिनव**श्रेष्ठी माययोवाच- "मया स्वयं पायसेन प्रभुः पारणं कारितः" । अहो ! दानं सुदानमिति देवशब्दं श्रुत्वा च जना नृपाश्चा**ऽभिनव**श्रेष्ठिनं मुहुर्मुहुः प्रशशंसुः ।

**जीर्णश्रेष्ठी** च स्वाम्यागमनं चिन्तयन् स्थितो देवदुन्दुभि-ध्वनिं श्रुत्वा दध्यौ-"मां मन्दभाग्यं धिक्, मम मनोरथो विफलः। कथमन्यथा प्रभुर्मम गृहं विहायाऽन्यत्र पारणं चकार । प्रभुश्च पारणं कृत्वाऽन्यत्र जगाम ।

अनन्तरं च तत्रोद्याने केवली **पार्श्व**शिष्यः समाजगाम । नृपो जनाश्च गत्वा तं पप्रच्छुः-"नगर्यामस्यां कः पुण्यशाली जनः ?" **जीर्णश्रेष्ठी**ति तेन कथिते च लोको जगौ-"तर्हि कथमसौ स्वामिनं न पारितवान्" **अभिनव**श्च पारितवान् । वसुधाराऽप्य**भिनव**-श्रेष्ठिगृहेऽभूत् । तत्कथं न स पुण्यशाली" । ततः केवल्युवाच-"**जिनदत्ते**न जिनो भावतः पारितः, तेन चाऽग्रे जन्मनि सोऽ**च्युत**कल्पं गन्ता । यदि पारणकालेऽसौ तादृग्भावः स्यात् तदा दुन्दुभिध्वनिं नाऽऽकर्णयिष्यद् ध्यानवशात् केवलं च प्राप्स्यत् । **अभिनव**श्रेष्ठिना च शुद्धभावं विना जिनः पारितः । तेनैहिकं वसुधारारूपं फलं प्राप्तम्" । तच्छ्रुत्वा च स्मितो जनः स्वं स्वं धाम जगाम ।



अथ **वीर**जिनो ग्रामादिषु विहरन् **सुंसुमार**पुरं गत्वाऽ**शोक-खण्डो**द्यानेऽशोकवृक्षस्याऽधः शिलातले कृताष्टम एकरात्रिक्या प्रतिमया तस्थौ ।

अथेतोऽत्र **भरते विन्ध्यपाद**तलस्थे **बिभेले** सन्निवेशे **पूरणो** नाम धनाढ्यो गृहपतिर्बभूव । स एकदाऽर्धरात्रे दध्यौ-मया पूर्वभवे नूनं महत् तपः कृतम् । येनेदृशी श्रीः सम्मानं च ममाऽस्ति । पूर्वकर्मणामेवाऽत्र फलं लभ्यते । ततो गृहवासं परित्यज्य स्वजनान् प्रतिबोध्य भविष्यद्भवे फलप्राप्त्यै तपश्चरिष्यामि । अष्टभिर्मासैर्वयसा-ऽऽयुषा च तत् कर्त्तव्यं येनाऽन्ते सुखमेधते" । एवं ध्यात्वा स प्रातः स्वजनान् भोजयित्वाऽऽपृच्छ्य च व्रतार्थं स्वस्थाने पुत्रं न्यस्य नाम्ना **प्राणामं** तापसव्रतं गृहीत्वा चतुःपुटं दारुमयं भिक्षापात्रमग्रहीत् ।

तद्दिनात् प्रभृत्येव च स सदा षष्ठान्यकरोत् । आतापनया चाऽन्वहमात्मानं तनूचकार । पारणादिने च स तच्चतुःपुटं पात्रमादाय मध्याह्ने भिक्षार्थं ययौ । प्रथमे पुटे क्षिप्तां भिक्षां पान्थादिभ्यो द्वितीयपुटक्षिप्तां काकादिभ्यस्तृतीयपुटस्थां जलचरादिभ्यश्च दत्त्वा चतुर्थपुटस्थां भिक्षां स राग-द्वेषौ विना स्वयमादत् । एवं स द्वादश-

वर्षाणि बालतपो विधाय **बिभेल**सन्निवेशस्यै**शान्या**मनशनं प्रपद्य मासान्ते विपद्य बालतपःप्रभावा**च्चमरचञ्चा**यां **चमरेन्द्रो** बभूव ।

अथ जातमात्रस्तत्राऽवधिना भुवनान्तराणि पश्यन्नूर्ध्वं **सौधर्मे**न्द्रं वज्रभृतं **सौधर्मा**वतंसे विमाने स्थितं महर्द्धि दृष्ट्वा जातकोपः स्वानवोचत्-''कोऽयमप्रार्थितप्रार्थको दुरात्मा निर्लज्जः, सुराधमो मम शिरसि स्थितः'' । कृताञ्जलिभिः सामानिकाद्यैः सुरैर्महाबलश्चण्डाज्ञः **सौधर्म**कल्पेन्द्रोऽयमिति ज्ञात्वा चाऽत्यन्तं क्रुद्ध**श्चमर** उवाच-'मदीयपराक्रममविज्ञाय यूयं तं प्रशंसथ, तस्य पातनात् स्वबलं दर्शयिष्यामि । नहि कोऽप्युच्चस्थानस्थितिमात्रेण प्रभुर्भवति'' । ततः सामानिका ऊचुः-'अयं पूर्वोपार्जितपुण्यैर्महर्द्धिविक्रमोऽस्ति देवेन्द्रः । त्वं च स्वपुण्यमात्रभिरस्माकं प्रभुर्जातोऽसि । पुण्यवशे विभवे ईर्ष्ययाऽलम् । देवेन्द्रे तव विक्रमव्यापारो हासाय पाताय च स्यात् । तच्छान्तिमेहि, स्वपुण्यफलं भुङ्क्ष्व'' ।

तत**श्चमर**स्तानुवाच-''भीता भवन्तोऽत्रैव तिष्ठन्तु, अहमेकोऽपि तेन युद्धाय यास्यामि । सुरा-ऽसुराणां सोऽहमेव चेन्द्रः स्याम् । नह्येकस्मिन् कोशे खड्गद्वयं युगपत् तिष्ठति'' । एवं स्वं विकत्थमानः स समुत्पतिष्णुरचिन्तयत्-''एते सामानिका मम हिताः सत्यवाचोऽपि स्युः । दैवात् पराजितस्य मम कः शरणं स्यात् ?''

एवं विमृश्याऽवधिं प्रयुज्य **संसुमार**पुरे **वीर**प्रभुं प्रतिमास्थं दृष्ट्वा तमेव शरणं निश्चित्योत्थाय **चमरस्तुम्बालया**ख्यामायुधशालां जगाम । तत्र स परिघं गृहीत्वा **चमरचञ्च**या नगर्या निर्गत्य **वीर**जिनमुपनम्य परिघं मुक्त्वा नत्वोवाच-''प्रभो ! त्वत्प्रभावेण शक्रं जेष्यामि, उपरि स्थितः स मां बाधते'' । ततः पुनः परिघमादायैशान्यां गत्वा लक्षयोजनमानं तनुं विकृत्य भयङ्कर-



विशालाकृतिर्गर्वात् **सौधर्मे**न्द्रं प्रति समुत्पपात । क्षणाच्छक्रमण्डलं प्राप्य त्रस्तैः पलायितैः कुपितैर्विस्मितैश्च सुरैर्दृश्यमान**श्चमर** एकं पादं **पद्मवेद्या**मपरं **सुधर्मा**यां च निधाय परिघेणेन्द्रकीलं त्रिस्ताडयित्वा भ्रकुटीकुटिलाननः शक्रमुवाच-''विटानामिवैषां देवानां समूहेन गर्वितस्त्वं किं ममोपरि वससि ? अधुनैव त्वामधः पातयामि । किं **चमरेन्द्रं** मामप्रतिमबलं न जानासि ?''

शक्रश्च तादृशवचनमश्रुतपूर्वो विस्मितः स्मयते स्म । अवधेश्च शक्रस्तं **चमरं** ज्ञात्वा रे ! पलायस्वेति ब्रुवन् विकटभ्रुकुटिर्वज्रमुत्पाट्य चिक्षेप । **चमर**श्च वज्रमागच्छन्तं सूर्यमुलूक इव द्रष्टुमप्यक्षमः शिरसि पादौ कृत्वेव **वीर**जिनं शरणं प्रपित्सुः पलायामास । क्षणेन च तादृङ् महातनुर्लघुदेहो जातः । वज्रश्च तमनुययौ ।

इतश्च शक्रो वज्रं मुक्त्वा सद्यश्चिन्तयामास-''असुराणामिह स्वतः समागमने न शक्तिः । तदसौ जिनं तच्चैत्यं मुनिं वा कथमपि ध्यात्वा प्राप्तशक्तिरिहाऽऽगतः स्यात्'' । एवं विमृश्याऽवधिं प्रयुज्य **वीर**प्रभावादागत**चमरं** **वीर**जिनं प्रति गच्छन्तं ज्ञात्वा हा हा हतोऽस्मीति क्रन्दन् वज्रमार्गेण लघु धावमानो ययौ । तत्राऽग्रत**श्चमर**स्तत्पृष्ठतो वज्रं तत्पृष्ठतश्च शक्रो ययौ । पश्चात् प्रस्थितोऽपि चेन्द्रो बलवत्त्वाद् वेगेन तयोः समीपस्थो जातः । **चमर**श्च वज्रैरनुस्रियमाणो **वीर**जिनं प्रतिमास्थं शरणं शरणमिति पूत्कुर्वन् प्राप्य कुन्थुवत् सूक्ष्मो भूत्वा तत्पादयोः प्राविशत् ।

शक्रश्च **वीर**जिनपादयोश्चतुरङ्गुलमस्पृष्टं तं वज्रं गारुडिकः सर्पमिव मुष्ट्याऽग्रहीत् । तथा **वीर**प्रभुं त्रिःप्रदक्षिणीकृत्य नत्वा कृताञ्जलिर्जातं वृत्तं निवेद्यैशान्यां स्थित्वा क्रोधनाशाय वामपादेन

भुवं ताडयित्वा **चमर**मुवाच-''विश्वाभयदः प्रभुः श्रितः । मया वैरं विहाय स्वपुरं गत्वा सुखेन तिष्ठ'' । एवं **चमर**माश्वास्य शक्रः पुनः प्रभुं नत्वा स्वस्थानं जगाम । **चमर**श्च प्रभोः पादाभ्यां निर्गत्य प्रणम्य प्रभुमुवाच-''त्वमेव मम प्राणदोऽसि, त्वत्पादं प्रपन्ना भवादपि मुच्यन्ते, वज्राद् मम त्राणं कियत् । पूर्वजन्मकृतबालतपः-प्रभावादसुरेन्द्रत्वमपि मेऽज्ञानानुविद्धम् । तथाऽपि मम त्वत्प्रपत्तिः श्लाघ्या । त्वत्प्राप्तिर्हि सर्वस्याः प्राप्तेः श्रेयसी'' । एवं भक्त्या प्रभुं स्तुत्वा नत्वा स **चमरेन्द्रः** स्वां **चमरचञ्चा**पुरीं जगाम। तत्र च सिंहासनासीनो लज्जानम्रमुखः सामानिकादीन् प्राह-''यथा शक्रो युष्माभिर्वर्णितः, स तथैवाऽस्ति । मया मोहात् तद् न ज्ञातम् । **वीरं** शरणं प्रपद्यैव तद्वज्राद् मम मुक्तिरभूत्'' । एवमुक्त्वा **चमरः** सपरिवारः प्रभुमुपेत्य नत्वा सङ्गीतं विधाय पुनः स्वनगरं जगाम ।

अथ प्रभुः प्रातरेकरात्रिकीं प्रतिमां पारयित्वा विहरन् **भोगपुरा**ख्यं नगरं प्राप । तत्र च **माहेन्द्र**क्षत्रियः प्रभुं दृष्ट्वा मन्दमतिः खर्जूरीयष्टिमुत्पाट्य प्रजिहीर्षुर्धावमानः प्रभुदर्शनार्थमागतेन **सनत्-कुमारे**न्द्रेण दृष्टो निर्भर्त्सितो ववले । स इन्द्रश्च प्रभुं नत्वा सुखविहारं पृष्ट्वा च स्वं धाम ययौ ।

अथ **वीर**जिनो विहरन् **नन्दि**ग्रामं प्राप्तः पितृमित्रेण **नन्दि**ना भक्त्या पूजितः । ततो विहृत्य च **वीर**प्रभु**र्मेंढक**ग्रामं प्राप्तवान् । तत्र च गोपालः केशकृतरज्जुमादाय प्रभुं हन्तुं दधावे । तदानीं च शक्रः **कूर्म**ग्रामवदाशु तत्राऽऽगत्य गोपं निवार्य प्रभुं ननाम ।

**वीर**प्रभुः ततो निर्गत्य **कौशाम्बीं** नगरीं जगाम । तत्र च **शतानीको** नाम नृप आसीत् । **चेटक**नृपस्य कन्या **मृगावती** च



तस्य राज्ञो महिषी जिनभक्ता श्राविकाऽऽसीत् । तथा तन्नृपमन्त्रिणः **सुगुप्त**स्य भार्या **नन्दा** श्राविका **मृगावत्याः** सखी बभूव । तन्नगरे **धनवाहो** नाम महाढ्यः श्रेष्ठी चाऽऽसीत् । तद्भार्या च गृहकर्मनिपुणा **मूला** नाम बभूव ।

प्रभुश्च तत्र पौषकृष्णप्रतिपत्तिथौ दुष्करमभिग्रहं जग्राह-''यदि लौहशृङ्खलबद्धपादा, मुण्डिता, कृतानशना, शोकेन रुदती, दासीत्वमापन्ना नृपकन्या, देहल्यन्तः कृतैकपादा बहिः स्थिताऽपरपादा, सर्वेष्वेव भिक्षाचरेषु साधुप्रभृतिषु गृहात् प्रतिनिवृत्तेषु, शूर्पकोणेन मह्यं कुल्माषान् चिरादपि दास्यति तदैवाऽहं पारयिष्यामि नाऽन्यथे''ति । एवमभिग्रहं गृहीत्वा प्रभुः प्रतिदिनं यथाकालं नानागृहेषु पारणार्थं भ्रमति स्म । पौराश्च दीयमानामपि भिक्षामभिग्रहवशात् प्रभावना-ददाने स्वं निन्दन्तस्ताम्यन्ति स्म । प्रभुश्चैवं भिक्षामगृह्णन् द्वाविंशतिं परीषहान् सहमानश्चतुरो मासान् यामानिव व्यतीयाय ।

अथाऽन्यदा प्रभुर्भिक्षार्थं **सुगुप्त**मन्त्रिगृहे प्रविष्टो दूरादेव **नन्द**या दृष्टः । ततो **नन्दा** स्वं भाग्यं वर्णयन्ती हर्षात् प्रभुमभ्युद-तिष्ठत् । तथा कल्प्यान्यन्न-पानादीन्यानयति स्म । प्रभुश्चाऽभिग्रहवशात् तान्यगृहीत्वैव ततो निर्गतवान् । ततो **नन्दा**ऽपूर्णमनोरथा खिन्ना स्वं बहु निनिन्द । तां च तादृशीं दास्युवाच-''अयं देवार्यः प्रतिदिनमेव भिक्षामगृहीत्वैव गृहाद् निर्याति न पुनरद्यैव'' । ततो **नन्दा** विशिष्टाभिग्रहवशात् प्रभुर्भिक्षां नाऽऽदत्ते इत्यनुममौ । ततः प्रभोरभिग्रहः कथं ज्ञेय इति चिन्तया सा म्लानवदना तस्थौ ।

**सुगुप्त**श्च तां तथावस्थां दृष्ट्वा कारणं पप्रच्छ । **नन्दा** च विशेषाभिग्रहवशात् प्रभुर्भिक्षामगृहीत्वैव गृहाद् निर्याति, तत्तस्य

कोऽभिग्रह इति बुद्ध्या जानाहीत्युवाच । ततः प्रभोरभिग्रहज्ञानार्थं प्रयतिष्ये इति **सुगुप्तो** जगाद । तदैव च तत्राऽऽगता **मृगावत्या** वेत्रिणी **विजया** तयोरालापं श्रुत्वा देव्याः कथयामास । तज्ज्ञात्वा च खिन्नया **मृगावत्या वीर**प्रभोर्भिक्षानादानं ज्ञात्वा तामाश्वास्य **शतानीको** मन्त्रिणमाहूय-"प्रभोरभिग्रहं जानीहि, येन तं पूरयित्वा प्रभुं पारयामी"त्युवाच । ततो मन्त्र्युवाच-प्रभोरभिग्रहो न ज्ञायते, तेनाऽहमपि खिद्ये ।

ततो नृपस्**तथ्यवादि**नमुपाध्यायं धर्मशास्त्रज्ञं **वीर**प्रभोरभिग्रहं पप्रच्छ । द्रव्यादिभेदाद् बहवोऽभिग्रहाः शास्त्रे विहिताः । तत्र प्रभोः कोऽभिग्रह इति विशिष्टज्ञानं विना न ज्ञेयमित्युपाध्यायोक्तं श्रुत्वा च नृपः पुर्यामघोषयत्-"भिक्षार्थमागतस्य प्रभोर्गृहीताभिग्रहस्याऽनेकविधा भिक्षोपनेतव्या" । पौराश्च नृपाज्ञया श्रद्धया च तथा चक्रुः । **वीर**प्रभुश्चाऽपूर्णाभिग्रहः क्वचिदपि भिक्षां न जग्राह । ततः पौरैः खिन्नैर्लज्जितैश्चाऽवलोक्यमानः प्रभुर्भिक्षाया अलाभेऽपि प्रफुल्ल-वदनस्तस्थौ ।

इतश्च पुरा **शतानीक** एकस्यां रात्रौ नौसैन्येन **चम्पा**पुरीं रुणद्धि स्म । ततश्च **चम्पा**पुरेशो **दधिवाहनः** पलायिष्ट । **शतानीक**स्याऽऽज्ञया च तद्भटास्तां पुरीं स्वेच्छया मुमुषुः । तत्र च कोऽप्यौष्ट्रिको **दधिवाहन**स्य प्रियां **धारिणीं** तत्पुत्रीं **वसुमतीं** च जग्राह । **शतानीक**श्च कृतकृत्यः सैन्यैः सह **कौशाम्बी**माजगाम । औष्ट्रिकश्च **धारिण्या** रूपेण मोहितो मार्गे गच्छन् जनानुच्चैरुवाच-"इयं प्रौढा रूपवती च मम भार्या भविष्यति । एतां कन्यकां च पुर्याश्चतुष्पथे नीत्वा विक्रेष्ये" ।



तच्छ्रुत्वा च **धारिणी** मनसि दध्यौ-"शुद्धवंशजाऽहं कुलीनस्य **दधिवाहन**स्य पत्नी जिनभक्ता चेमं शब्दं श्रुत्वाऽपि जीवामि, मां धिक्, तद्बलादपि प्राणांस्त्यजामि" । एवमुद्विग्नायास्तस्याः शोकमग्नहृदयायाः प्राणाः क्षणादपि गताः । औष्ट्रिकश्च तां मृतां दृष्ट्वा स्वदुर्वचनं मुहुर्निनिन्द । कन्याऽप्येवं मा म्रियतामिति विमृश्य च स तां साम्नाऽऽलपन् पुरीमानीय विक्रेतुं राजमार्गे स्थापयामास।

**धनावहः** श्रेष्ठी च दैवात् तत्राऽऽगतस्तां दृष्ट्वा कुलीनामनुमाय च नैषा हीनहस्ते पतत्विति विचार्य चेप्सितं मूल्यं ददौ । ततस्स सानुकम्पो **वसुमतीं** स्वगृहं नीत्वा पृच्छति स्म-'कस्य सुताऽसि, कस्तव स्वजनः, मा भैषीः । त्वं मम सुतेवाऽसि' । सा च महत्त्वेन स्वकुलं वक्तुमक्षमा न किञ्चिदुवाच । नम्रमुखी च तस्थौ । ततः श्रेष्ठी **मूलामु**वाच-"असावावयोर्दुहिता, तदियं यत्नतो लाल्या पाल्या च" ।

अथ सा बाला **वसुमती धनावह**श्रेष्ठिगृहे स्वगृहवदेव तस्थौ । तस्या विनयादिभिश्च चन्दनवद् रञ्जितः श्रेष्ठी तां परिजनैः सह **चन्दने**त्याचख्यौ । क्रमाच्च प्राप्तयौवनां श्रेष्ठिनो हर्षदां निसर्गसुन्दरीं **चन्दनां** दृष्ट्वा **मूला** सेर्ष्या दध्यौ-"एतां पुत्रीवत् स्वीकृत्याऽपि रूपमोहितः श्रेष्ठी यद्येनां परिणयेत् तर्ह्यहं जीवन्त्यपि मृतैव" । एवं हृदि ताम्यन्ती सा **मूला** दुराशयाद् दिवानिशं चिन्ता मग्ना तस्थौ । एकदा च घर्मार्त्तः श्रेष्ठी गृहमापणादाजगाम । तदानीं च दैवात् प्रादप्रक्षालकेऽनुपस्थिते विनयवती **चन्दना** श्रेष्ठिना निषिद्धा-ऽप्युत्थाय पितुरिव तस्य पादौ क्षालयितुं प्रवृत्ता । तदानीं च तस्याः केशपाशोऽङ्गवलनेन जलार्द्रभूमौ परिस्रस्तः । ततः श्रेष्ठी वात्सल्या-ल्लीलायष्ट्या तमुद्धृत्याऽऽदराद् बबन्ध ।

**मूला** च गवाक्षस्था तद् दृष्ट्वा दध्यौ-या पूर्वं मम शङ्का साऽद्य प्रत्यक्षा जाता । यतोऽस्याः श्रेष्ठिना केशबन्धः पत्नीत्वनिबन्धनम् । नेदृशी पितुः क्रिया भवति, तदियं मूलादेवोच्छेदनीया" । एवं विमृश्य **मूला** दुराशया तस्थौ । श्रेष्ठी च क्षणं विमृश्य बहिर्निर्जगाम। **मूला** च नापितमाहूय **चन्दना**ममुण्डयत् । पादयोः शृङ्खलं क्षिप्त्वा क्रुद्धा ताडयित्वा च गृहकोणे स्थापयित्वा कपाटं दत्त्वा परिवार-मुवाच-"पृच्छतोऽपि श्रेष्ठिनो नैतत् कथनीयं केनाऽपि, अन्यथा स मम कोपभाजनं स्यात्"। एवं **चन्दना**या नियन्त्रणां विधाय **मूला** मूलगृहं जगाम ।

श्रेष्ठी च सायंकाले समायातः क्व **चन्दने**त्यपृच्छत् । **मूला**-भयाच्च न कोऽपि जगाद । ततः श्रेष्ठी 'सा क्वाऽपि रमते, गृहोपरि वा स्यादि'त्यबुध्यत । एवमेव स श्रेष्ठी रात्रावप्यपृच्छत् । किन्तु पूर्ववदेव कोऽपि नाऽऽख्यत् । तेन च स विशुद्धधीः श्रेष्ठी **चन्दना** सुप्ताऽस्तीत्येवमेवाऽबुध्यत । एवं च **चन्दनां** द्वितीये तृतीये च दिवसेऽपश्यन् सन्देहमुपगतः कुपितश्च परिजनमुवाच-**चन्दना** क्वा-ऽस्तीति कथय, जानन्तो न ब्रूयात् चेत् सर्वान् वो निग्रहीष्यामि"।

एवं श्रुत्वा काऽपि वृद्धा दासी दध्यौ-"अहं चिरं जीविता, मरणं मम समीपं **चन्दना**वृत्तान्ते **मूला** मम किं करिष्यति ?" एवं ध्यात्वा सा **मूला-चन्दनयो**र्वृत्तान्तं कथयामास । तथा सा श्रेष्ठिन**श्चन्दना**गृहं दर्शयामास । ततः श्रेष्ठी स्वयं द्वारमुद्घाटयामास । तत्र च मुण्डितां निगडितां क्षुत्-पिपासार्त्तां साश्रुनेत्रां **चन्दनां** दृष्ट्वा तां 'त्वं विश्वस्ता' भवेत्याश्वास्य तद्भोज्यानयनार्थं शीघ्रं रसवतीं ययौ। तत्र च विशिष्टं भोज्यं दैवादपश्यन् श्रेष्ठी शूर्पकोणे कुल्माषानादाय



ददौ । तथा तावदेतान् भुङ्क्ष्व यावद् निगडच्छेदाय कर्मारमानया-मीत्युक्त्वा श्रेष्ठी बहिर्जगाम ।

**चन्दना** च तदानीं दध्यौ-"अहो ! क्व मम राजकुले जन्म, क्व चेदृश्यवस्था । अस्मिन् संसारे वस्तु क्षणादेव विपरिवर्तते, एतद् मम प्रत्यक्षम् । साम्प्रतं किं करोमि ? मम षष्ठपारणायाऽमी कुल्माषा एव सम्प्रति सन्ति । तद्यद्यतिथिः कोऽप्यायाति तस्मै निवेद्यैव भुञ्जे नाऽन्यथा" । एवं ध्यात्वा सा द्वारे इतस्ततो दृष्टिं ददौ।

तदानीमेव च **वीर**जिनो भिक्षार्थमितस्ततः पर्यटंस्तत्राऽगात् । ततस्तादृशातिथिलाभेन स्वकर्म प्रशंसन्ती सा कुल्माषशूर्पमादाय प्रस्थिता स्वमेकं पादं देहल्या अन्तरपरं च बहिर्दत्त्वा निगडैर्नियन्त्रि-तत्वाद् बहिर्गन्तुमसमर्था तत्र स्थित्वैव भक्त्या **वीर**प्रभुमुवाच-"प्रभो ! यद्यप्येतद् भोजनं न योग्यं तथाऽपि परोपकारी भगवान् गृहीत्वैतद् मामनुगृह्णातु" । ततः प्रभुस्तदन्नं द्रव्यादि शुद्धं स्वाभिग्रहं पूर्णं च ज्ञात्वा कुल्माषभिक्षार्थं करं प्रासारयत् । **चन्दना** च धन्याऽहमिति चिन्तयन्ती प्रभोः करे शूर्पकोणेन कुल्माषान् ददौ । तदानीं प्रभोरभिग्रहपूर्त्या देवास्तत्राऽऽययुः । तथा वसुधाराप्रभृतीनि पञ्च दिव्यानि चक्रुः ।

तथा **चन्दना**या निगडानि तुत्रुटुः । तत्पदे सौवर्णानि नूपुराणि जज्ञे । मूर्ध्नि केशपाशश्च पूर्ववत् जज्ञे । तथा देवैः सा **चन्दना** सर्वाङ्गं रत्नालङ्कृता विहिता । तथा ते उच्चैर्जगुर्ननृतुश्च । **मृगावती-शतानीकौ नन्दा-सुगुप्तौ** च दुन्दुभिध्वनिं श्रुत्वा सपरिवारास्तत्रा-ऽऽययुः। शक्रोऽपि प्रसन्नमनाः शीघ्रं पूर्णाभिग्रहं प्रभुं वन्दितुं तत्राऽऽययौ । **चम्पा**वस्कन्दने आनीतो **दधिवाहन**स्य कञ्चुकी **संपुल**श्च राज्ञा तदैव मुक्तस्तत्राऽऽगतो **वसुमतीं** दृष्ट्वा तत्पादयोः

पतितस्तामपि रोदयन् रुरोद । नृपेण किं रोदिषीति पृष्टश्च स उवाच- "इयं **धारिणी-दधिवाहन**योः पुत्री नष्टविभवा पितृभ्यां हीना दासीवदन्यगृहे वसतीति रोदिमि" ।

ततो नृप उवाच-"इयं न शोच्या, यया सम्पूर्णाभिग्रहो **वीर**जिनः प्रतिलाभितः" । ततो **मृगावत्यु**वाच-"**धारिणी** मम स्वसा, तदियं बाला ममाऽपि दुहिता । प्रभुश्च दिनपञ्चकन्यून-षण्मासीतपःपारणं कृत्वा **धनावह**गृहाद् निर्जगाम । शक्रश्च **शतानीकं** लोभाधिक्याद् वसुधारां ग्रहीतुमुद्यतमुवाच-"नेह तव स्वामित्वम्, इयं कन्या यस्मै वसुधारां ददाति स एव लभते" । ततो नृपेण को वसुधारां गृह्णात्विति पृष्टा **चन्दनो**वाच-"अयं **धनावहः** श्रेष्ठी पालनाद् मम पिता, स एव गृह्णातु" । ततः श्रेष्ठी तां वसुधारामाददे ।

ततः शक्रः पुन **शतानीक**नृपमुवाच-"विषयविरक्तेयं बाला चमरदेहा **वीर**स्य केवले जाते प्रथमा शिष्या भविष्यति, तदेषा प्रभोः केवलोत्पत्तिं यावत् त्वया पालनीया" । एवमुक्त्वा शक्रः प्रभुं प्रणम्य स्वं धाम ययौ । **शतानीक**श्च **चन्दनां** स्वान्तःपुरं निनाय । तत्र च सा प्रभोः केवलोत्पत्तिं ध्यायन्ती तस्थौ । **मूला** चाऽनर्थकारिणी श्रेष्ठिना निर्वासिता दुर्ध्याना विपद्य नरकं जगाम ।

❀ ❀ ❀

अथ विहरन् प्रभुः **सुमङ्गलं** ग्रामं प्राप्तः **सनत्कुमारे**न्द्रेणाऽऽगत्य वन्दितः । ततश्च विहरन् प्रभुः **सत्क्षेत्र**सन्निवेशं गतो **माहेन्द्र**-कल्पेन्द्रेणैत्य भक्त्या वन्दितः । ततः **पालक**ग्रामं गतः प्रभुर्यात्रायै प्रस्थितेन **भायाले**न वणिजा दृष्टो-असौ भिक्षुरशकुनमित्यस्य मूर्धन्यसिं क्षिपामी"ति प्रभुं हन्तुं धावितः **सिद्धार्थ**व्यन्तरेण



स्वयमेव च्छिन्नमूर्धा जातः । ततो विहरन् **वीर**जिन**श्चम्पा**पुरीं प्राप्य **स्वातिदत्त**द्विजस्याऽग्निहोत्रशालायां द्वादशीं प्रावृट्चतुर्मासीमुपोषित-स्तस्थौ ।

तत्र च महर्द्धिकौ **पूर्णभद्र-माणिभद्रौ** यक्षौ प्रत्येकं रात्रिमागत्य प्रभुं पूजयतः स्म । ततः **स्वातिदत्तो** दध्यौ-किमसौ देवार्यः किमपि वेत्ति, यदमुं प्रति रात्रिं देवाः पूजयन्ति ?" एवं विचिन्त्य जिज्ञासुः स आगत्य प्रभुं पप्रच्छ-"देहे मस्तकाद्यङ्गपूर्णे को जीव उच्यते ?" ततः प्रभुरुवाच-"योऽहमिति मन्यते स जीवः" । ततो द्विजेन 'सोऽपि क' इति पृष्टः प्रभुरुवाच-"स देहभिन्नः सूक्ष्मः" । ततः 'सूक्ष्मोऽपि स क' इति द्विजेन पृष्टः प्रभुः "इन्द्रियैरग्राह्यः स" इत्युक्तः प्रभुं तत्त्वज्ञं ज्ञात्वा भक्त्या पूजयामास । प्रभुणा भव्य इति कृत्वा प्रतिबोधितः ।

चतुर्मास्यां गतायां च प्रभु**र्जृम्भिका**ग्रामं गतः । शक्रश्च नाटकं दर्शयित्वा प्रभुमुवाच-"प्रभो ! अद्य प्रभृति कतिभिरेव दिनैः केवलज्ञानं भवतो जायेत" । एवमुक्त्वा च शक्रः प्रभुं नत्वा स्वस्थानं जगाम । **वीर**प्रभुश्च **मेण्ढक**ग्रामं जगाम । तत्र च **चमरेन्द्रः** समेत्य प्रभुं नत्वा सुखविहारं पृष्ट्वा स्वं भवनं जगाम ।

अथ प्रभुः **षण्मानि** नामधेयं ग्रामं गत्वा बहिः कायोत्सर्गेण ध्यानमग्नस्तस्थौ । तदानीं च प्रभोर्विष्णुभवार्जितं शय्यापालकर्णयो-स्तप्तत्रपुक्षेपजं वेद्यं कर्मोदीर्णम् । शय्यापालजीवश्च तत्र गोपालो जातः । प्रभोः समीपे वृषभान् मुक्त्वा सो दोहाद्यर्थं ययौ । वृषभाश्च चरन्तो वनं विविशुः । क्षणादागतो गोपालश्च वृषभानदृष्ट्वा प्रभुं पप्रच्छ । प्रभुश्च न किमप्युवाच । तेन क्रुद्धः स प्रभोः कर्णयोः काशशलाके चिक्षेप । तथा

तेन तथा ते शलाके ताडिते यथा ते मिलिते अखण्डैकशलाकत्वं प्रापतुः । एतौ कीलकौ कोऽपि मा कृषदिति स मन्दधीस्तत्कीलक-बहिरंशं छित्त्वा जगाम।

प्रभुश्च कर्णयोः पीडितोऽपि शुभध्यानादचलितो धर्मध्यानं प्राप। पारणार्थं च प्रभुः **सिद्धार्थ**वणिग्गेहं प्राप्तस्तेन भक्त्या प्रतिलाभितः। तत्र **सिद्धार्थ**स्य मित्रं पूर्वायातो वैद्यः **खरकः** प्रभुं दृष्ट्वोवाच-"अहो! प्रभोः समग्रलक्षणा मूर्त्तिर्म्लानत्वेन शल्यवती लक्ष्यते। ततः सम्भ्रमात् **सिद्धार्थे** भगवतो देहे क्व शल्यमिति सम्यङ् निरूपये"त्युक्तः स वैद्यः सम्यक् पश्यन् प्रभोः कर्णयोः कीलौ ददर्श। **सिद्धार्थ**स्याऽपि तददर्शयच्च। ततः **सिद्धार्थ** उवाच-"केनाऽपि क्रूरेणेदं कर्म कृतं, तच्छल्योद्धाराय यत्नं कुरु। प्रभोः कर्णयोः पीडा हि ममैव पीडेति मन्ये'।

ततो वैद्य उवाच-"प्रभुः कर्मक्षयायैवाऽपकारिणमुपैक्षिष्ट नाऽशक्त्या। अयं च देहेऽपि निर्ममः कथं चिकित्स्यः, यः पीडां कर्मनिर्जरार्थमिष्टां मन्यते ?" ततः **सिद्धार्थः** पुनरुवाच-"नाऽयं विवादावसरः, चिकित्सैव खलु कर्त्तव्या । तयोरेवं वदतोश्च प्रभुर्निरपेक्षत्वात् ततो गत्वा बहिरुद्याने शुभध्यानमग्नस्तस्थौ। तौ च **सिद्धार्थ**-खरकौ भेषजादिकं गृहीत्वा तदुद्याने भगवन्तमुपजग्मतुः।

ततस्तौ प्रभुं तैलद्रोण्यामुपवेश्य तैलेनाऽभ्यज्य च बलवद्भिः संवाहकैरमर्दयताम्। तन्मर्दनात् सन्धिषु श्लथेषु सत्सु तौ संदंशाभ्यां युगपत् कर्णकीलकावकृष्येताम्। ततोऽवशिष्टं वेदनीयं कर्मेव प्रभोः कर्णविवरयोः सरुधिरं कीलद्वयं निर्ययौ। कीलकर्षणेन च तथा वेदना जाता यथा प्रभुर्वज्राहतपर्वत इव भीषणारावं ररास। ततस्तौ **सिद्धार्थ**-



खरकौ संरोपणभेषजेन कर्णौ रोपयित्वा प्रभुं प्रणम्य क्षमयित्वा च स्वगृहं जग्मतुः। एवं प्रभोर्वेदनाकरावपि तौ देवश्रीभाजनमभूताम्। दुर्धीर्गोपालश्च स्वामिवेदनानिमित्तं सप्तमनरकदुःखभाजनमभूत्। प्रभोर्भैरवारावाच्च तदुद्यानं महाभैरवमिति प्रथितम्। लोकाश्च तत्र देवकुलं विदधुः।

तदेवं प्रभोः सर्वेषूपसर्गेषु सर्वजघन्यषूत्कृष्टं कटपूतनाशीतं, मध्यमं कालचक्रं, शलाकोद्धरणं चोत्कृष्टम्। गोपारब्धाश्चोपसर्गा गोपेनैव पर्यवसिताः। तथा प्रभोश्चतुर्मासक्षपणानि नव, द्विमासिकानि षट्, मासक्षपणानि द्वादश, अर्धमासक्षपणानि द्विसप्ततिः, एकं षण्मासीक्षपणं, त्रिमासिकं द्वयं, सार्धमासिकं द्वयं, सार्धद्विमासिकं द्वयं, भद्रादिप्रतिमात्रयं चाऽभूवन्। तथैकमभिग्रहयुक्तं दिनपञ्चकन्यूनं षाण्मासिकं क्षपणमभूत्।

चरमायां रात्रौ कायोत्सर्गयुक्ता अष्टमभक्तत एकरात्रिक्यो द्वादश प्रतिमाः, एकोनत्रिंशदधिके द्वे षष्ठशते च प्रभोरभूवन्। नित्यभक्तं चतुर्थं च कदाऽपि नाऽभूत्। तथैकोनपञ्चाशं पारणादिनं शतत्रयमभूत्। एवं प्रभोर्व्रतदिनात् सपक्षिका सार्द्धा द्वादशाब्द्यभूत्। एवं प्रभुर्जलरहितं सर्वं तपश्छद्मस्थो विधायोपसर्गं सहमानो विहरन् **ऋजुपालिक**या महत्या नद्या शोभितं **जृम्भक**सन्निवेशं जगाम॥ ४॥

*इति दशमे पर्वणि श्रीमहावीरद्वितीयषड्वर्षछद्मस्थविहार-वर्णनात्मकः चतुर्थः सर्गः ॥४॥*

# पञ्चमः सर्गः

अथ **वीर**प्रभु **ऋजुपालिका**या नद्या उत्तरे तीरे **श्यामा**क-नामगृहिक्षेत्रे शालतरुतलेऽव्यक्तचैत्यसमीपे उत्कटिकासनेन कृतषष्ठ आतापनापरस्तस्थौ । तत्र च प्रभोः शुक्लध्यानस्थस्य क्षपकश्रेणिग-तस्य जीर्णरज्जुरिव घातिकर्माणि तुत्रुटुः । ततो वैशाखशुक्लदशम्यां हस्तोत्तरास्थे चन्द्रे दिवसस्य चतुर्थे प्रहरे समुज्जवलं केवल-ज्ञानमुत्पन्नम् ।

तत इन्द्रा आसनकम्पेन तज्ज्ञात्वा प्रमुदिता देवैः सह तत्रा-ऽऽगत्य नृत्यादिकं विधाय प्रतिवप्रं चतुर्द्वारं वप्रत्रययुक्तं समवसरणं यथाविधि विदधुः । अत्र कोऽपि सर्वविरतियोग्यो नास्तीति जानन्नपि **वीर**जिनः कल्पवशात् तत्रोपविष्टो देशनामकरोत् ।

तत्तीर्थे च समुत्पन्ने गजरथः कृष्णवर्णो वामे भुजे बीजपुरं दक्षिणे नकुलं च दधन् **मातङ्गो** यक्षः, सिंहवाहना हरितकान्तिर्वाम-योर्भुजयोर्मातुलिङ्ग–वल्लक्यौ दक्षिणभुजयोः पुस्तका–ऽभये च दधाना **सिद्धायिका**देवी च शासनदेवते प्रभोः सदा सन्निहिते अभूताम् ।

अथ **वीर**जिनस्तत्रोपकारयोग्यजनाभावात् तीर्थकरनामकर्मानु-भवाय देवैः परिवृतः स्वर्णकमलेषु पादौ बिभ्रद् यज्ञाय मिलितैः प्रतिबोधपात्रैः शिष्यसमुदायसमन्वितै**गौतमा**द्यैर्विराजिता**मपापां** पुरीं जगाम । तत्पुर्याः समीप एव **महसेन**वनाख्योद्याने देवाः समवसरणं



चक्रुः । **वीर**जिनश्च सर्वातिशययुक्तो देवादिभिः स्तूयमानः पूर्वद्वारा तत्र प्रविवेश । द्वात्रिंशद्धनून्नतं चैत्यवृक्षं प्रदक्षिणीकृत्य नमस्तीर्थाये-त्युक्त्वा सपादपीठे पूर्वरत्नसिंहासने प्राङ्मुख उपविवेश । देवाश्चाऽन्यासु दिक्षु तिसृषु प्रभोः प्रतिबिम्बानि विचक्रुः । ततः सुरादयो यथा द्वारं प्रविश्य प्रभुमुखं पश्यन्तो यथास्थिति तस्थुः । शक्रश्च भक्त्या **वीर**जिनं नत्वा स्तुत्वा च विरराम ।

ततः प्रभुः सर्वभाषामय्या गिरा देशनामकार्षीत्–"अहो ! समुद्र इवाऽपारो भयङ्करश्च संसारः । तरोर्बीजमिव तस्य हेतुः कर्मैव । देही स्वकृतकर्मणैवाऽविवेकी कूपखनक इव नीचैर्गतिमाप्नोति । हर्म्यकारक इव च देही सदाशयः स्वकर्मणैवोर्ध्वगतिं याति । तत् कर्मबन्धहेतुं हिंसां वर्जयेत् । स्वप्राणानिव परप्राणानपि त्रायेत । न मिथ्या वक्तव्या, किन्तु सत्यमेव वदेत् । आत्मपीडामिव देही परपीडां परिहरेत् । कस्यचिद् धनस्य हरणं वध एवेति जनोऽदत्तं नाऽऽददीत । जीवसङ्घनाशहेतुं मैथुनं वर्जयेत् । परब्रह्मप्राप्तये ब्रह्मचर्यमेवाऽऽश्रयेत् । परिग्रहं परित्यजेत् । तेनाऽतिभारेण वृषभ इव पीडितो जनोऽधः पतति । हिंसादीन् सूक्ष्मान् परिहर्त्तुमनीश्वरो बादरांस्त्यजेत्" । एवं **वीर**जिनस्य देशनां शृण्वन्तो जना आनन्द-मग्नास्तस्थुः ।

इतश्च **मगध**देशे **गोबर**ग्रामे गौतमगोत्रो **वसुभूति**र्द्विजो बभूव । तस्य **पृथिव्यां** पत्न्यां गौतमगोत्रीया **इन्द्रभूत्यग्निभूतिवायुभूति**-नामानः पुत्रा अभूवन् । **कोल्लाके** च **धनुर्मित्र**स्य द्विजस्य **वारुण्यां** पत्न्यां **व्यक्तो, धम्मिल्ल**स्य द्विजस्य च **भद्रिला**यां **सुधर्मा** च पुत्रौ बभूवतुः। **मौर्या**ख्यसन्निवेशे द्विजौ मिथो मातृष्वस्रेयकौ **धनदेव**–**मौर्या**वभूताम् । तयो**र्धनदेव**स्य **विजयदेवा**यां भार्यायां **मण्डक**नामा

पुत्रोऽभूत् । तस्मिन् जाते च **धनदेवो** विपन्नवान् । लोकाचारवशाच्चाऽभार्यो **मौर्यको विजयदेवां** स्वभार्यां चकार । क्रमाच्च **मौर्य**स्य **विजयदेवा**यां **मौर्यपुत्र** इति नाम्ना प्रथितः पुत्रोऽभवत् ।

तथा **विमला**पुर्यां (**मिथिला**पुर्याम्) **देवा**ख्यब्राह्मणस्य **जयन्त्यां** पत्न्या**मकम्पितो** नाम पुत्रो बभूव । **कोशला**पुर्यां **वसु**नामद्विजस्य च **नन्दायां** भार्याया**मचलभ्राता** नाम पुत्रोऽभूत् । **वत्स**देशे **तुङ्गिका**ख्ये सन्निवेशे **दत्ता**ख्यद्विजस्य **करुणा**यां पत्न्यां **मेतार्यो** नाम सुतोऽभवत् । तथा **राजगृह**नगरे **बला**ख्यविप्रस्य **भद्रा**यां भार्यायां **प्रभासो** नाम सुतोऽभवत् । ते एकादशाऽपि शास्त्रस्य पारदृश्वानो **गौतमा**द्या उपाध्यायाः शिष्यैः परिवृता आसन् ।

❈ ❈ ❈

**अपापा**यां नगर्यां यष्टुकामो विप्रः **सोमिल**श्च तान् यज्ञकर्मनिपुणान् श्रद्धयाऽऽनिनाय । तत्र **गौतमो वीरं** विवन्दिषून् सुरानागच्छतोऽवलोक्य द्विजानुवाच-"अमी देवा मन्त्रेणाऽऽहूता दृश्यरूपा इह यज्ञे समागच्छन्ति, तद्यज्ञस्य प्रभावं पश्यत" । किन्तु चाण्डालगृहमिव यज्ञवाटं त्यक्त्वा समवसरणं प्रति देवेषु गच्छत्सु लोकोऽवोचत्-"अतिशयशाली सर्वज्ञ उद्याने समवसृतः । तं नन्तुममी देवाः पौराश्च प्रमुदिता यान्ति" । तच्छ्रुत्वा सर्वज्ञेत्यक्षरमाक्रोशमिवाऽसहिष्णुरिन्द्रभूतिः क्रोधात् स्वान् जनानवादीत्-"आम्रं त्यक्त्वा मरुवासिनः करीरमिव मां त्यक्त्वा जनाः पाखण्डिनं यान्ति, धिक् । ममाऽप्यग्रे कोऽपि सर्वज्ञोऽस्ति किम् ? जना मूर्खास्तं यान्ति, खलु यान्तु । अमी देवाः कथं यान्ति ? नूनमस्य कोऽपि महान् दम्भः । तद्देवानां मानवानां च पश्यतामस्यैषोऽहं सर्वज्ञतागर्वमपहरामि" ।



अथैवं स गर्वादुक्त्वा शतपञ्चकशिष्यपरिवृतः समवसरणे **वीर**जिनमुपययौ । तत्र च प्रभोः ऋद्धिमप्रतिमं तेजश्च दृष्ट्वा विस्मित **इन्द्रभूतिः** स्थितः । ततो **वीर**जिनो भो ! **इन्द्रभूते** ! **गौतम** ! तव स्वागतमिति सुधामधुरया वाचोवाच । ततो **गौतमो** दध्यौ-"किमसौ मम गोत्रं नाम च वेत्ति ? यद्वा लोकप्रसिद्धं मां को न वेत्ति ? यद्ययं मम मनःस्थं संशयं वक्ति च्छिनत्ति च ज्ञानेन तदाऽऽश्चर्यम्" ।

तदा **वीर**जिनस्तमुवाच-"जीवोऽस्ति न वेति तव संशयोऽस्ति, किन्तु चैतन्यलक्षणेन जीवोऽस्त्येव । यदि पुण्य-पापभाग् जीवो न स्यात् तव यज्ञदानादिकं निर्निमित्तं स्यात्" । एवं प्रभोर्वचः श्रुत्वा स **इन्द्रभूति**र्मिथ्यात्वेन सहैव सन्देहं त्यक्त्वा **वीर**जिनं प्रणम्य चोवाच-"मन्दधीरहं त्वत्परीक्षार्थमिहाऽऽगतस्त्वया साधु बोधितोऽस्मि । दुष्टमपि मामद्य भवविरक्तं प्रव्रज्यादानेनाऽनुगृहाण" । ततो **वीर**जिनस्तमाद्यं गणधरं ज्ञात्वा शिष्यपञ्चशतीसहितं स्वयं प्रव्राजयामास ।

ततः कुबेरेणौपढौकितं धर्मोपकरणं गृह्णन् निःसङ्गो **गौतमो** दध्यौ-"निरतीचारव्रतपालने यद्येतदुपयुज्यते तद्धर्मोपकरणं वस्त्र-पात्रादिकं ग्राह्यमेव । अन्यथा छद्मस्थैः षड्जीवकाययतनातत्परैः कथं प्राणिदया सम्यक् पालयितुं शक्यते ? यदुद्गमादिशुद्धं गुणवच्च तद् गृहीतमहिंसासाधनमिति तद् ग्राह्यमेव । ज्ञानादियुक्त आद्यन्तमध्येषु शुद्धं सूत्रार्थं साधयेत् । यस्त्वज्ञानी जनोऽत्र परिग्रहं चिन्तयति स हिंसक एव । धर्मोपकरणे परिग्रहधीर्दुष्टा । नहि विना धर्मोपकरणं जलकायादिविविधजन्तूनां त्राणसम्भवः । धृतोपकरणोऽपि मनो-

वचः-कायैरशुद्धोऽसन्तोषभाक् स्वं प्रतारयति" । एवं विमृश्य स **इन्द्रभूतिः** शिष्यैः सह देवार्पितं धर्मोपकरणं जग्राह ।

अथ तं प्रव्रजितं श्रुत्वाऽ**ग्निभूति**र्दध्यौ-"नूनं तेनैन्द्रजालिके**नेन्द्रभूतिः** प्रतारितः । तत्सर्वज्ञम्मन्यं तमहं गत्वा जित्वा स्वं भ्रातरमानयामि । नहि मायां विने**न्द्रभूतिं** शास्त्रपारदृश्वानं कोऽपि जेतुं क्षमः । यदि स मे संशयं ज्ञाता छेत्ता च तदाऽहम**पीन्द्रभूति**वत् सशिष्यस्तच्छिष्यः स्याम्" । एवं ध्यात्वाऽ**ग्निभूतिः** शिष्यपञ्चशतीसमन्वितः समवसरणे उप**जिनं** ययौ ।

**वीर**जिनश्च तमाह-'द्विजा**ग्निभूते** ! गौतमगोत्र ! कर्माऽस्ति न वेति तव संशयः । प्रत्यक्षादिप्रमाणगोचरः कर्म मूर्त्तममूर्त्तो जीवः कथं बध्नीयात् ? तथाऽमूर्त्तस्य जीवस्य मूर्त्तेन कर्मणा कथमनुग्रहोपघाताविति तवाऽऽशङ्का । सा न समीचीना । यतः सातिशयज्ञानवतां कर्म प्रत्यक्षमेव । त्वादृशानां तु जीववैलक्षण्यतोऽनुमानगम्यमस्त्येव । कर्मवैचित्र्यादेव प्राणिनां सुख-दुःखादयो भवन्ति ।

केऽपि नृपाः केऽपि गजादिवाहनाः, केचिच्च पादचारिणः, केचिद्धनाढ्याः, केचिद् भिक्षुकाः, देशकालादिसाम्येऽपि कस्याऽपि वणिजः प्रचुरो लाभः कस्यचिच्च मूलधनस्याऽपि हानिः । एवंविधकार्यवैचित्र्यस्य कर्मैव हेतुः । नहि कारणं विना कार्यमुपजायते । आकाश-घटयोरिव चाऽमूर्त्तेन जीवेन कर्मणां सम्बन्धः । मदिरौषधादिभिरिव चाऽमूर्त्तस्याऽपि जीवस्य कर्मणोपघाता-ऽनुग्रहौ नाऽयुक्तौ । एवं प्रभुणा छिन्नसंशयोऽ**ग्निभूतिः** शिष्यपञ्चशत्या सहितः प्रवव्राज ।



अथ **वायुभूति**र्दध्यौ-"येन तादृशौ मे भ्रातरौ जितौ स नूनं सर्वज्ञः । तत्तस्य पूजनादिभिः पूतात्मा छिन्नसंशयश्च स्याम्" । एवं विचार्य स गत्वा प्रभुं प्रणनाम । ततो **वीर**जिन उवाच-"जीव-देहयोरभेद इति तव भ्रमः । जीवः प्रत्यक्षाद्यविषयत्वाद् न देहभिन्नः, किन्तु जलबुद्बुदवत् स देहे मूर्च्छतीति तव युक्तिरपि मिथ्या । यतो जीवगुणानामिच्छादीनां प्रत्यक्षतो जीवः सर्वप्राणिनां देशतः प्रत्यक्षः । नेन्द्रियादिरूपो जीवः, इन्द्रियाद्यपगमेऽपि स्मरणाद् देहसद्भावेऽपि मरणाच्च" । एवं **वीर**वाण्या छिन्नसंशयो भवविरक्तो **वायुभूतिः** शिष्यपञ्चशतीसहितो दीक्षां ललौ ।

अथ **व्यक्तो**ऽपि **चेन्द्रभूत्या**दिजेतारं सर्वज्ञं मत्त्वा छिन्ने संशये तच्छिष्यत्वं हृदि कृत्वा प्रभुमुपागतः । ततो **वीर**जिन उवाच-"**व्यक्त** ! तवेत्थं धारणा यत् पृथिव्यादीनि भूतानि न सन्ति, पृथिव्यादिबुद्धिस्तु जलचन्द्रवद् भ्रमादेवेति सर्वं शून्यमेव । सा च तव मतिर्मिथ्यैव । यदि सर्वं शून्यं स्यात् कथमनुभूयमानाः सुर-नरादिस्वप्ना-ऽस्वप्नादिभेदाः स्युः" । एवं छिन्नसंशयो **व्यक्तो**ऽपि शिष्यपञ्चशतीयुतः प्रवव्राज ।

ततः **सुधर्मो**पाध्यायोऽपि स्वसंशयच्छेदाय प्रभुमुपाययौ । **वीर**जिनश्च तमुवाच-"**सुधर्मन्** ! इहभव-परभवयोस्तुल्य एव देही, कार्यस्य कारणानुरूपत्वनियमात् । नहि धान्येभ्यो यवाः प्ररोहन्तीति तव बुद्धिः । सा न युक्ता । यतो यो यथेह कर्माऽर्जयति परभवे तस्य तथा गतिः । कर्मवैचित्र्यादेव भववैचित्र्यम् । भवे हि कर्मैव कारणम् । न वा कारणानुरूपमेव कार्यम् । शृङ्गादिभ्यो विलक्षण-शरादिकार्यदर्शनात्" । इत्याकर्ण्य च्छिन्नसंशयः **सुधर्मा**ऽपि शिष्याणां पञ्चभिः शतैः सह प्रवव्राज ।

ततो **मण्डिकं** संशयच्छिदे समागतं प्रभुरुवाच-"**मण्डिक** ! बन्ध-मोक्षयोस्ते संशयो न युक्तः । यतो मिथ्यात्वादिभिर्बन्धो नाम कर्मश्लेषो जीवस्य । तेनैव हि जीवस्य नानाभवभ्रमणम् । ज्ञानादिभिस्तु कर्मपरिशाटो मोक्षः" । एवं प्रभुगिरा छिन्नसंशयो **मण्डिकः** शिष्याणां सार्धत्रिशत्या प्रवव्राज ।

ततो **मौर्यपुत्रः** संशयच्छेदाय समुपागतः । तमपि प्रभुराह-"**मौर्यपुत्र** ! तव देवेषु संशयो निर्मूलः । प्रत्यक्षमेव ह्येतान् देवान् पश्य । अन्यस्मिन् काले त्वेते नाऽऽयान्ति, किन्तु मत्समवसरण एवैते समायान्ति ! जिनप्रभावाच्च जिनजन्माभिषेकादावप्येते देवा भुवि समागच्छन्ति । तद्देवाः सन्त्येव" । इति प्रभोर्वचः श्रुत्वा छिन्नसंशयो **मौर्यपुत्रो**ऽपि शिष्याणां सार्धत्रिशत्या प्रवव्राज ।

ततः समागत**मकम्पित**मपि प्रभुराह-"**अकम्पित** ! नारकाः कदाऽप्यदर्शनाद् न सन्तीति ते मतिर्न युक्ता । कर्माधीनत्वाद्धि ते नेह समायान्ति । यथा त्वादृशास्तत्र कर्मवशादेव गन्तुमसमर्थाः । तत्ते त्वादृशामनुमेया ज्ञानिनां च प्रत्यक्षाः । न केऽपि केवलिन इति वचश्च मयि प्रत्यक्षे सति मिथ्यैव" । तच्छ्रुत्वा प्रबुद्धोऽ**कम्पितः** शिष्यत्रिशत्या सह प्रवव्राज ।

ततः समागतोऽ**चलभ्राता** । तमपि च प्रभुराह-"**अचलभ्रातः** ! पुण्य-पापयोस्ते सन्देहः । स न युक्तः । यतः पुण्य-पापयोः फलं लोके प्रत्यक्षमेवाऽनुभूयते । पुण्यस्य हि दीर्घायुष्यलक्ष्म्यादिकं विपरीतं च पापस्य फलं प्रसिद्धमेव" । तेन प्रभुवचसा छिन्नसंशयोऽ**चलभ्राता** शिष्यशतैः सह व्रतमुपाददे ।

ततो **मेतार्यः** स्वामिनमुपाजगाम । तं च प्रभुराह-"**मेतार्य** ! परलोको नास्तीति तव धीर्भूतेभ्यश्चेतनोत्पत्तिमतिमूला । सा च न



युज्यते । भूतेभ्यो हि जीवो भिन्नः । भूतेषु मिलितेष्वपि चेतनाऽनुपलम्भात् । तत एव च चैतन्यं न भूतधर्मः किन्तु जीवधर्मः । जातिस्मरणादितश्च जीवो भूतभिन्नः परलोकगश्च सिध्यत्येव" । तच्छ्रुत्वा प्रबुद्धो **मेतार्यः** शिष्यत्रिशत्या सह दीक्षामग्रहीत् ।

ततः **प्रभासं** चाऽऽगतं प्रभुरुवाच-"**प्रभास** ! मोक्षे तव संशयो न युक्तः । कर्मक्षयो हि मोक्षः । कर्म च वेदवाक्यतो जीवदशा नानात्वाच्च सिद्धमेव । ज्ञानादिभिश्च कर्म क्षीयते । मोक्षः केवलिनां प्रत्यक्षश्च" । तेन च च्छिन्नसंशयः **प्रभासः** शिष्यशतत्रय्या दीक्षां गृहीतवान् । तदेवं कुलीनाः प्राज्ञाः संविग्ना लोकवन्द्या एकादशाऽपीन्**द्रभूत्या**दयो **वीर**जिनस्य मूलशिष्या अभवन् ।

* * *

इतश्च **चन्दना शतानीक**नृपगृहे स्थिता गगने देवान् गतागतं कुर्वतोऽवलोकमाना प्रभोः केवलोत्पत्तिं निश्चिक्ये । ततो व्रतं जिघृक्षुः समीपस्थैर्देवैः समवसरणं नीता प्रभुं त्रिःप्रदक्षिणीकृत्य नत्वोपविष्टा सा । अपरा अपि च नृप-मन्त्रिपुत्र्यः प्रव्रज्यार्थं तत्र समागताः । प्रभुश्च **चन्दना**मग्रे कृत्वा ताः सर्वाः प्राव्राजयत् । सहस्रशो नरा नार्यश्च श्रावकत्वं जगृहुः ।

अथैवं चतुर्विधे सङ्घे जाते प्रभुरि**न्द्रभूत्या**दीनां स्थित्युत्पाद-व्ययात्मिकां त्रिपदीमुपदिदेश । ते च तत्त्रिपद्याऽऽ**चाराङ्गं सूत्रकृतं स्थानाङ्गं समवायाङ्गं भगवत्यङ्गं ज्ञाताधर्मकथामुपासकदशामंत कृद्दशामनुत्तरोपपातिकदशां प्रश्नव्याकरणं विपाकश्रुतं दृष्टिवाद**श्चेति द्वादशाङ्गानि चक्रुः । दृष्टिवादे चो**त्पादा-ऽऽग्रायणीये वीर्यप्रवादमस्तिनास्तिप्रवादं ज्ञानप्रवादं सत्यप्रवादमात्मप्रवादं**

**कर्मप्रवादं प्रत्याख्यानं विद्याप्रवादं कल्याणकं प्राणावायं क्रियाविशालं लोकबिन्दुसार**मित्येवं चतुर्दश पूर्वाणि सूत्रयामासुः। अङ्गेभ्यः पूर्वमेव सूत्रितानि तानीति पूर्वाणि कथ्यन्ते । एवं रचनां कुर्वतां सप्तगणधराणां तेषां मिथो विभिन्नाः सप्त सूत्रवाचनाः अजायन्त । **अकम्पिता-ऽचलभ्रात्रोर्मेतार्य-प्रभास**योश्च मिथस्तुल्या एव वाचना अभूवन् । **वीर**जिनस्यैकादशस्वपि गणधरेषु द्वयोर्द्वयोर्वा-चनयोः साम्याद् नव गणा आसन् ।

अथ कालज्ञः शक्रः सौगन्धिकरत्नचूर्णपूर्णं स्थालमादाय प्रभुपार्श्वेऽस्थात् । **इन्द्रभूत्या**दयश्चाऽपि क्रमशो नम्रमूर्धानः प्रभोराज्ञां प्रतीच्छवस्तस्थुः । प्रभुश्च द्रव्यैर्गणैः पर्यायैश्च तीर्थमनुज्ञातमिति ब्रुवन् **गौतम**शिरसि पूर्वं चूर्णं क्षिप्त्वा क्रमशोऽन्येषामपि शिरसि चिक्षेप । देवाश्च तदानीं प्रमुदिताश्चूर्णपुष्पवृष्टिं चक्रुः । ततः प्रभुरसौ चिरञ्जीवी चिरं धर्मं द्योतयिष्यतीति **सुधर्मा**णमग्रे कृत्वा गणमन्वज्ञासीत् । तदानीमेव च प्रभुः साध्वीनां संयमोद्योगघटनार्थं **चन्दनां** प्रवर्त्तिनीपदे स्थापयामास । ततः प्रथमपौरुष्यां पूर्णायां प्रभुर्देशनां विससर्ज ।

तत्र च नृपोपनीतो बलिः प्राग्द्वारेण प्रविवेश। आकाशे उत्क्षिप्तस्य तस्य बलेरर्धं सुरा जगृहुः । पतितस्याऽर्धस्याऽर्धं नृपो जनाश्च शेषं जगृहुः । ततः प्रभुरुत्थाय देवच्छन्दे उपाविशत् । ततः प्रभोः पादपीठे समासीनो **गौतमो** देशनां चकार। द्वितीयस्यां पौरुष्यां पूर्णायां च **गौतमो**ऽपि देशनाया विरराम । ततः प्रभुस्तत्र कतिचिद्दिवसान् व्यतीत्य लोकान् प्रतिबोध्य सुरादिभिः सेवमानो महीं विजहार ॥ ५ ॥

*इति दशमे पर्वणि श्रीमहावीरकेवलज्ञान-*
*चतुर्विधसङ्घोत्पत्तिवर्णनात्मकः पञ्चमः सर्गः ॥५॥*

## षष्ठः सर्गः

अथाऽत्र **भरते कुशाग्रपुर**नगरेऽतितीक्ष्णबुद्धिर्यशस्वी प्रताप्य-स्खलिताज्ञः **प्रसेनजिद्** नृपो बभूव । वदान्यो लक्ष्मीवांश्च स जिनधर्मानुरागी श्रीपार्श्वजिनाज्ञावशंवदोऽणुव्रतपरायण आसीत् । तेन च बह्व्यो राजकन्याः परिणीताः । तासु च तस्य बहवः पुत्राः स्वसदृशा अभूवन् ।

इतश्चाऽत्र **भरते वसन्तपुर**नगरे **जितशत्रु**र्नृपो बभूव । तस्य च गुणग्रामसमग्रा देवी वाऽ**परसुन्दरी** देव्यासीत् । तस्यां च **जितशत्रो**र्मङ्गलालयो रूपवान् कलावांश्च **सुमङ्गलो** नाम पुत्रो बभूव। **सेनको** नाम मन्त्रिपुत्रश्च तत्तुल्यवयाः सकलाशुभलक्षणैकपात्रं पिङ्गकेशश्चिपिटघ्राणः पिङ्गनेत्रः सर्वाङ्गैरिवाऽप्रियदर्शनो दुर्मतिरभूत्। स यत्र कुत्राऽपि हास्यपात्रमेवाऽभूत् । नृपसुतः **सुमङ्गल**श्च दूरतोऽपि तमागच्छन्तं विदूषकमिव विचित्राकारं दृष्ट्वा जहास । एवं नृपपुत्रेणाऽनवरतं दृश्यमानोऽवमानपीडितः स **सेनको** वैराग्यमाप । विरक्तश्च स उन्मत्त इव शून्यहृदयः पुरान्निरगात् । तस्मिन् मन्त्रिपुत्रे गते च कियता कालेन **सुमङ्गलः** पित्रा स्वराज्येऽभिषिक्तः ।

**सेनक**श्च भ्रमन् वने कुलपतिमेकं दृष्ट्वा तत्समीपे तापसो भूत्वो**ष्ट्रिका**व्रतमाददे । तथा स तीव्रतपःपरायणस्तापसैः सह **वसन्तपुरं** गतो मन्त्रिपुत्रस्तापसश्चेति लोकैः पूजितो वैराग्यकारणं

पृष्टश्चोवाच-"**सुमङ्गल**कुमारेण ममैतद्रूपं हरितं, तेन मे वैराग्यं जातम्" । तच्छ्रुत्वा च **सुमङ्गल**नृपस्तत्र गत्वा क्षमयित्वा पारणार्थमादराद् न्यमन्त्रयत च । सोऽपि नृपायाऽऽशिषं दत्त्वा तन्निमन्त्रणं स्वीचकार । ततो नृपः स्वगृहमगात् । स तापसश्च मासक्षपणे पूर्णे नृपनिमन्त्रणं स्मरन् राजकुलं जगाम ।

तदानीमेव च नृपस्य शरीरास्वास्थ्यं जातम् । तेन द्वारपालो द्वारं पिहितवान् । तेन च स तपस्वी यथागतेनैव यथा निववृते । तथा मासक्षपणं निर्णीयोष्ट्रिकां ययौ । शमप्रकर्षाच्च न नृपाय मनागपि चुकोप । द्वितीयदिने स्वस्थश्च नृपस्तपस्विभक्तः **सेनक**तापसमुपगम्य नत्वा क्षमयित्वोवाच-"त्वं निमन्त्रितोऽपि मया न पारित एव किन्तु तदाऽन्यत्राऽपि पारणं निवारितम् । तदेवं पुण्याय मम प्रवृत्तिः पापाय सम्पन्ना । तन्ममाऽपराधं क्षमस्व । द्वितीयमासक्षपणे च कल्पपादपो नन्दनमिव मम प्राङ्गणमलङ्कुर्याः" । तथेति प्रतिपन्ने तस्मिंस्तापसे स्वगृहं गतो नृपस्तत्पारणदिनं गणयंस्तस्थौ ।

स तपस्वी च मासक्षपणे पूर्णे नृपगृहं जगाम । दैवाच्च नृपस्य पूर्ववदेवाऽस्वास्थ्यं जातम् । तथैव द्वारे पिहिते च स तापसो निवृत्त्य स्वोष्ट्रिकां जगाम । स्वस्थश्च नृपः पूर्ववदेव तं तापसं निमन्त्रितवान् । तृतीये मासक्षपणे पूर्णे च स तापसो नृपस्याऽस्वास्थ्यवशात् तथैव निवृत्त्य जगाम । ततो नृपाधिकारिणो दध्युः-"यदा यदाऽयं तपस्वी समेति तदा तदा नृपोऽस्वस्थो भवति" । तेन च ते आरक्षानाहुः-"स तपस्वी मन्त्रिपुत्रः प्रविशन्नेव सर्प इव निर्वास्यः" । तैरारक्षैश्च तथा कृते कुपितः स तापसोऽहमेतस्य नृपस्य वधाय भूयासमिति निदानमकरोत् । ततो विपद्य स तापसोऽल्पर्द्धिर्वानमन्तरो बभूव । नृपोऽपि च तापसो भूत्वा वानमन्तरत्वमाप ।



च्युत्वा च स **सुमङ्गल**नृपः **प्रसेनजिन्नृ**पस्य **धारिणी**-कुक्षिजन्मा **श्रेणिको** नाम पुत्रो बभूव । तत्रैव पुरे च **नाग**नामा रथिकः **प्रसेनजि**न्नृपसेवकोऽभूत् । स च सदाचारी दानी कलावान् वीरो धीरश्चाऽऽसीत् । तस्य च **सुलसा**ख्या शीलवती पुण्यात्मा गुणवती च पत्न्यासीत् । एकदा चाऽपुत्रो **नागो** दध्यौ-"कोमलकरं बालं लालयिष्यामीति मे मनोरथोऽपुत्रस्य वन्ध्यस्येवाऽफल एवाऽभूत् । यो न बाल्याद् ब्रह्मचारी न वा तारुण्ये पुत्री, तस्य जीवनं धिक्" । एवं चिन्ताचान्तस्वान्तं मलिनाननं पतिं **सुलसा** रचिताञ्जलिर्विनयादुवाच-'तवेयं दशा चिन्तयेत्याभाति, तत्का ते चिन्तेति मां कथय" ।

ततो **नाग** उवाच-'अहमपुत्रोऽस्मि, मम च पुत्रेच्छाऽस्ति, किन्तु कश्चिदुपायो नाऽस्ति" । ततः **सुलसो**वाच-"त्वमपरा बह्वीः कन्याः परिणय, तासु किमेकाऽपि पुत्रं न प्रसूयेत ?" ततो **नागः** पुनरुवाच-"इह भवे त्वमेव मे पत्नी, अन्याभिर्भार्याभिः कृतं, तासु पुत्रस्य तु कथैव का ? अहं त्वत्कुक्षिजमेव पुत्रमिच्छामि, तत्पुत्रार्थे यतस्व" । ततः **सुलसो**वाच-"अहं पुत्रार्थमर्हदाराधनां करिष्ये, सा हि सर्वेप्सितप्रदा" । ततः साऽऽचामाम्लादिभिर्दुस्तपैस्तपोभिरात्मानं पावयन्ती स्वल्पभूषणा कौसुम्भवस्त्राऽर्हदर्चनतत्परा ब्रह्म पालयन्ती समाधिना तस्थौ ।

अथेतः शक्रो निजसभायां श्राविकासु **भरते सुलसा** श्रेष्ठेति प्रशंसां चकार । तच्छ्रुत्वा विस्मितः कश्चिद्देवः **सुलसायाः** श्रावकत्वं परीक्षितुमागत्य देवपूजातत्परायाः **सुलसा**याः गृहे साधुरूपेण प्राविशत् । **सुलसा** च तं दृष्ट्वा प्रमुदिता भक्त्या वन्दित्वाऽऽगमनकारणं पप्रच्छ । ततः स उवाच-"वैद्येन ममाऽऽख्यातं यत्

त्वद्गृहे लक्षपाकं महातैलमस्ति, तज्ग्लानार्थं देहि" । सा हि तैलपाकोऽमोघः साधोरुपकारी स्यादित्युक्त्वा तैलकुम्भमानीतवती । देवेन च स्वशक्त्या तत्करात् पातितस्तैलकुम्भः पुस्फोट । ततस्तया द्वितीयस्तैलकुम्भः समानीतोऽपि पूर्ववदेव पुस्फोट । ततो विषण्णया तया तृतीयोऽप्यानीतः पुस्फोट । ततः सा दध्यौ-"अहं मन्दभाग्याऽस्मि, यत् साधुर्विफलप्रार्थनोऽभूत्" ।

ततो देवो निजं रूपं धृत्वा तामुवाच-"भद्रे ! शक्रकृतया तव श्रावकत्वप्रशंसया विस्मितोऽहं त्वत्परीक्षार्थमागत इदानीं तुष्टोऽस्मि, वरं वृणीष्व" । ततः **सुलसो**वाच-'यदि तुष्टोऽसि, तर्हि ममाऽपुत्रायाः पुत्रं देहि" । ततो देवो द्वात्रिंशतं गुटिकां दत्त्वोवाच-"एता गुटिकाः क्रमेण भक्षयेः । तवैतावन्तः पुत्राः स्युः । प्रयोजने च सति त्वया स्मृतोऽहं पुनरागमिष्यामि" । एवमुक्त्वा स देवोऽन्तर्हितवान् ।

ततः **सुलसा** दध्यौ-"क्रमशो गुटिकाभक्षणात् पुनः पुनर्बालानामशुचिं का क्षालयिष्यति ? तद्युगपदेवाऽहं सर्वा इमा गुटिका अद्मि, येन मे द्वात्रिंशल्लक्षणः पुत्रो भवेत्" । एवं विचार्य सा सर्वा गुटिका जघास । तेन च तस्या उदरे द्वात्रिंशद् गर्भा उत्पन्नाः, तेन च साऽक्षमा जाता । तान् गर्भानसहिष्णुश्च सा कायोत्सर्गदेवं सस्मार । स्मरणत उपस्थितेन देवेन स्मरणकारणं पृष्टा च सा गुटिकावृत्तान्तं कथयामास ।

तच्छ्रुत्वा देव उवाच-"अमोघगुटिकाभक्षणेन तावन्तो गर्भा अभूवन् । त्वया चारु नाऽऽचरितम् । ते द्वात्रिंशदपि पुत्रास्तुल्यजीविताः स्युः । इदानीं मा विषीद । भवितव्यता हि बलवती । तव गर्भपीडापहारं करिष्यामि" । एवमुक्त्वा स देवस्तस्या गर्भपीडामपहृत्य दिवं जगाम । सा च स्वस्था जाता । पूर्णसमये च



सा शुभमुहूर्त्ते द्वात्रिंशल्लक्षणोपेतान् द्वात्रिंशतं पुत्रान् जनयामास । ते च धात्रीभिर्लाल्यमानाः क्रमाद् वर्धन्ते स्म । **नाग**श्च तान् दर्शं क्रीडयंश्च नितरां मुमुदे । ते सर्वे च **नाग**पुत्राः सवयसः **श्रेणिक**कुमारस्याऽनुयायिनो बभूवुः ।

❁ ❁ ❁

अथाऽन्यदा नृपः स्वपुत्राणां राज्ययोग्यतां परीक्षितुमेकत्र पायसस्थालानि भोजनाय ददौ । भोक्तुं प्रवृत्तेषु कुमारेषु च स नृपो व्याघ्रानिव विवृतमुखान् कुक्कुरान् मुमोच । आधावमानेषु श्वसु च कुमारा द्रुतमुत्तस्थुः । केवलं **श्रेणिक**स्तथैव तस्थौ । तथा सोऽन्यस्थालात् पायसं स्तोकं स्तोकं कुक्कुरेभ्यो यच्छन् स्वयं बुभुजे । ततो येन केनाऽप्युपायेनाऽसौ शत्रून् निरोत्स्यति स्वयं पृथिवीं पालयिष्यति चेति ध्यात्वा नृपो मुमुदे ।

पुनरन्यदा च राजा परीक्षार्थं मुद्रितान् मोदककरण्डान् पयस्कुम्भांश्च पुत्राणां दत्त्वोवाच-"मुद्रामविलोप्यैव मोदकान् भुञ्जीध्वं छिद्रमकृत्वैव च पयः पिबत" । ततः **श्रेणिकं** विना कोऽपि कुमारो नाऽभुक्त नाऽपिबच्च । **श्रेणिक**स्तु करण्डं भ्रामं भ्रामं शलाकाछिद्रपतितं मोदकचूर्णं बुभुजे, घटस्याऽधो जलबिन्दुपूर्णया रूप्यशुक्त्या जलं च पपौ । ततो नृपः परीक्षोत्तीर्णं **श्रेणिकं** बुद्धिमत्तया राज्यार्हं मेने ।

अथ शीघ्रमेव **कुशाग्रपुरे** वह्नेरुपद्रवो जातः । ततो नृपोऽघोषयत्-"यस्य गृहादग्निरुत्थास्यति सोऽस्मात् पुराद् निर्वास्येत" । अन्यदा च सूदप्रमादेन नृपस्य गृहादेवाऽग्निरुत्तस्थौ । अग्नौ वर्धमाने च **प्रसेनजि**न्नृपः सुतानुवाच-यो यं पदार्थं मम गृहाद् गृह्णीयात्

तस्यैव स स्यात्" । ततः सर्वे कुमारा यथारुचि हस्त्यादिकमादाय गृहाद् निर्ययुः । **श्रेणिक**स्तु भम्भामादाय निर्ययौ । नृपेण किमेतद् गृहीतमिति पृष्टश्च **श्रेणिक** उवाच-'राज्ञां जयस्य प्रथमं चिन्हं भम्मा, अस्याः शब्देनैव राज्ञां विजययात्रामङ्गलं, तन्नृपैरियमेव रक्षणीया" ।

ततस्तन्महत्त्वाकाङ्क्षाप्रसन्नो नृपस्तस्य **भम्भासार** इत्यपराख्यां ददौ । तथा स नृपः प्राक्कृतां 'यद्गृहादग्निरुत्तिष्ठेत् स निर्वासनीय" इति घोषणां स्मृत्वा दध्यौ-यद्यहमात्मानं नाऽनुशास्मि तर्हि परेषामनुशासनं दुष्करं स्यात्" । एवं ध्यात्वा स नृपः सपरिच्छद-स्तन्नगरं त्यक्त्वा क्रोशेनैकेन शिबिरं निवेशितवान् । ततो **राजगृहं** यास्याम इति लोकप्रसिद्ध्या स नृपस्तत्रैव **राजगृहं** नाम नगरं परिखादिमनोहरं चकार ।

अथ नृपोऽपरे राज्ययोग्यंमन्याः पुत्रा एनं राज्यार्हं मा ज्ञासिषुरिति **श्रेणिक**मवामन्यत । स हि पृथक् पृथक् कुमाराणां देशान् ददौ । किन्तु भविष्यत्काले राज्यमस्याऽस्त्विति बुद्ध्या **श्रेणिक**स्य न किञ्चिदपि ददौ । ततोऽभिमानी स **श्रेणिकः** स्वनगराद् निर्गत्य क्रमाद् **वेणातट**पुरं प्राप्य प्रविश्य च **भद्रा**ख्यस्य श्रेष्ठिन आपणे लाभोदयं मूर्त्तं कर्मेवोपाविशत् । तदानीं च तन्नगरे कश्चिदुत्सवः प्रावृतत् । प्रभूतैः क्रायकैर्व्यग्रं श्रेष्ठिनं बुद्ध्वा स कुमारः पुटकादिकं बद्ध्वा ददौ । कुमारप्रभावाच्च स श्रेष्ठी प्रभूतं द्रव्यमार्जयत् । अद्य कस्याऽतिथिस्त्वमिति श्रेष्ठिना पृष्टश्च **श्रेणिको** भवतामित्युदतरत् ।

ततः श्रेष्ठी दध्यौ-"मयाऽद्य रात्रौ स्वप्ने **नन्दा**योग्यो यो वरो दृष्टः सोऽयमेव । एवं ध्यात्वा च स उवाच-"धन्योऽहं यत् त्वं



ममाऽतिथिर्भवसि" । ततः स प्रासादं संवृत्य श्रेष्ठी तं कुमारं निजगृहं नीत्वा स्नपयित्वा वस्त्रे परिधाप्य च सादरमभोजयत् । एवं तद्गृहे वसन् **श्रेणिको**ऽन्यदा श्रेष्ठिना **नन्दा**ख्यामिमां कन्यां परिणयेति प्रार्थितः । अज्ञातकुलशीलस्याऽपि मम कथं कन्यां दित्ससीति **श्रेणिके**नोक्तश्च तव गुणैरेव कुलं ज्ञातमिति श्रेष्ठ्युवाच । ततस्तदाग्रहाच्छ्रे**णिकः** समहोत्सवं **नन्दां** परिणिनाय । तया सह विषयसुखं भुञ्जानश्च तत्राऽस्थात् ।

अथ **प्रसेनजि**न्नृपश्चरैः **श्रेणिक**स्य तद्वृत्तं ज्ञातवान् । उग्ररोगाक्रान्तश्च निजं मरणं जानन् नृप औष्ट्रिकान् शीघ्रं **श्रेणिक**मानेतुमादिशत् । **श्रेणिक**श्चौष्ट्रिकेभ्यः पितू रोगवार्त्तां ज्ञात्वा **नन्दां** सस्नेहं सम्बोध्य ततः प्रस्थितवान् । तथा **राजगृहे** नगरे वयं पाण्डुरकुड्या गोपाला इति निजाख्याक्षराणि ददौ । रोगग्रस्तस्य पितुरन्यो रोगो मा भूदिति स उष्ट्रीं समारुह्य शीघ्रं **राजगृह**नगरं ययौ । तं दृष्ट्वा प्रसन्नश्च **प्रसेनजिद्** हर्षाश्रूणि मुञ्चन् राज्येऽभ्यषिञ्चत् । ततो नृपः **पार्श्व**जिनं परमेष्ठिनमस्कारं च स्मरन् चतुःशरणमापन्नो विपद्य स्वर्गं जगाम ।

**श्रेणिक**श्च राज्यधुरामुवाह । तेन मुक्ता गर्भवती **नन्दा** च दुर्वहं गर्भं बभार । तस्याश्च गजारूढा महैश्वर्येण प्राणिनामुप-कुर्वाणाऽभयदा स्यामिति दोहदो जातः । श्रेष्ठी च राजानं तद् निवेद्य दोहदं पूरयामास । पूर्णे समये च सा पुत्रं कान्तिमन्तं प्रासूत । ततो मातामहस्तस्य बालस्य दोहदानुसारेण शुभे दिनेऽ**भयकुमार** इति नाम चकार ।

अथ धात्रीभिर्लाल्यमानः क्रमाद् वर्धमानो विद्या अभ्यस्यन्नष्ट-वर्ष एव द्वासप्ततिकलाकुशलोऽभूद**भयकुमारः** । कोऽपि सवयाश्च

मिथः कलहे तमुपालब्धवान्-"त्वं किं जल्पसि यः खल्वज्ञातपितृकः" । ततोऽ**भयकुमार** उवाच-"मम पिता **भद्रः** खलु" । ततः सवया जगौ-"**भद्र**स्त्वन्मातुः पिता" । ततोऽ**भयकुमारो नन्दां** को मे पितेति पप्रच्छ । सा च **भद्र**स्तव पितेत्युदतरत् । ततोऽ**भयेन भद्र**स्तव पिता, मम पितरं ब्रूहीति पृष्टा **नन्दो**दासीनोवाच-"देशान्तरादागतेन केनचित् परिणीताऽहम् । त्वयि गर्भस्थे च स औष्ट्रिकैः सह रहसि किमप्यालप्य क्वचिदपि जगाम । स कुतस्त्यः को वेत्यद्याऽप्यहं न जानामि" ।

गच्छंश्च स किमपि त्वामुवाचेति पुनर**भये**न पृष्टा सा 'एतान्यक्षराण्यर्पितानी'त्युक्त्वा तत्पत्रमदर्शयत् । तद्विचार्य चाऽ**भय** उवाच-"मम पिता राजा, तत्सम्प्रति **राजगृह**नगरं गच्छामः" । ततो **भद्रं** श्रेष्ठिनमापृच्छ्य शम्बलमादायाऽ**भयो नन्द**या सह **राजगृह**पुरं ययौ । तन्नगरं प्राप्य मातरं बहिरुद्याने सपरिच्छदां विमुच्याऽ**भयः** स्वल्पपरिवारेण सह पुरं प्रविवेश ।

इतश्च **श्रेणिक**नृपेणैकोनानि मन्त्रिणां पञ्चशतानि मेलितान्यासन् । मन्त्रिणां पञ्चशतीं पूरयितुं च नृपो लोके कमप्युत्तमं पुरुषं गवेषयामास । परीक्षार्थं च नृपः शुष्के कूपे निजाङ्गुलीयकं क्षिप्त्वा लोकानादिदेश-"यः कूपतटस्थित एतदङ्गुलीयकं करेण गृह्णीयात् तस्य बुद्धिवैभवेन क्रीता मन्त्रिमुख्यता स्यात्" । ततो लोका ऊचुः-"गगनात् करेण ताराकर्षणमिवोर्मिकायाः कूपतलाद् ग्रहणमशक्यमस्मादृशाम्" । तदानीं तत्राऽऽगतोऽ**भयकुमारः** सस्मितमुवाच-"नैतदतिदुष्करम्" । तं दृष्ट्वा च जनाः कोऽप्यसौ विशिष्टबुद्धिरिति ध्यात्वोचुः-"इमामूर्मिकां करेण गृहाण, तत्र पणीकृतामर्धराज्यश्रियं नृपपुत्रीं मन्त्रिमुख्यत्वं च लभस्व" ।



ततोऽ**भयकुमारः** कूपतलस्थां मुद्रिकामुपरिस्थित आर्द्रगोमयपिण्डेन जघान । तदुपरि च तत्कालं ज्वलत्तृणपूलकं प्रक्षिप्य गोमयं शोषयित्वा शीघ्रं सारणिं कारयित्वा कूपं जलेन पूरयित्वा लोकान् विस्मापयंस्तद्गोमयं तत्करेण गृहीतवान् । आरक्षैस्तज्ज्ञात्वा च विस्मितो नृपस्तं सद्य एव स्वसमीपमाजुहाव । तथा तम**भयं** पुत्रमिवाऽऽलिङ्ग्य कुत आगतोऽसीति पप्रच्छ । **वेणातट**पुरादागतोऽस्मी**त्यभये**नोक्तश्च नृपः पुनस्तं पप्रच्छ-"भद्र ! तत्र ख्यातः **सुभद्रः** श्रेष्ठी तत्पुत्री **नन्दा** च स्तः" । ततस्तेन तत् स्वीकृते नृपः पुनः पप्रच्छ-"**नन्दा** गर्भवत्यासीत्, तस्याः अपत्यमजनि किम्" ।

ततोऽ**भय** उवाच-"देव ! साऽ**भयकुमारा**ख्यं पुत्रमजनिष्ट, स एवाऽहमस्मि"। तच्छ्रुत्वा च नृपस्तमङ्के आदाय मूर्ध्न्याघ्रायाऽश्रूणि मुञ्चन् स्नेहात् स्नपयामासेव । ततो वत्स ! तव मातुः कुशलमिति नृपेण पृष्टोऽ**भयो** बद्धाञ्जलिरुवाच-"त्वत्सङ्गमं ध्यायन्ती सा मन्माता सम्प्रति बाह्योद्यानेऽस्ति" । ततो नृपः प्रमुदितो **नन्दां** समानेतुं सर्वसामग्रीं पुरतः कृत्वाऽ**भयं** प्रेषयामास । स्वयमपि चाऽत्युत्कण्ठया नृपो हंसः कमलिनीमिव **नन्दा**मभिययौ । तां च **नन्दां** कृशां मलिनामुद्यानस्थां दृष्ट्वा सानन्दः स्वगृहमानीय महिषीपदेऽस्थापयत् । **अभया**य च नृपो भगिन्याः **सुसेना**याः पुत्रीं मन्त्रिमुख्यत्वमर्धराज्यं च ददौ । ततोऽ**भयः** पितरं सेवमानो दुःसाध्यानपि नृपान् साधयामास ।

* * *

इतश्च महीमहेलातिलकायमानायां सर्वसम्पत्समृद्धायां गरीयस्यां **वैशाली**नगर्यामिन्द्र इवाऽप्रतिहताज्ञः शत्रुन्तप**श्चेटको** नाम

नृपोऽभवत्। तस्य च राज्ञीभ्यः सप्तकन्यका अजायन्त। ताश्च क्रमात् **प्रभावती पद्मावती मृगावती शिवा ज्येष्ठा सुज्येष्ठा चिल्लणा** चेत्याख्याः। **चेटकः** श्रावकत्वादन्यविवाहनियमं धारयन् कस्मैचिदपि कन्या न ददौ। किन्तु तन्मातरश्चोदासीनमपि **चेटक**मापृच्छ्याऽनुरूपाणां वराणां पञ्च कन्याः प्रददुः।

तत्र **प्रभावती वीतभय**पुराधी**शोदयन**नृपाय, **पद्मावती चम्पे**शाय **दधिवाहन**नृपाय, **मृगावती कौशाम्बी**पुरेशाय **शतानीक**-नृपाय, **शिवा चोज्जयिनी**शाय **प्रद्योत**नृपाय, **ज्येष्ठा** च **कुण्ड**ग्रामेशाय **वीर**जिनज्येष्ठभ्रात्रे **नन्दिवर्धना**य दत्ता। **सुज्येष्ठा चिल्लणा** च सुरूपे कुमार्यौ सदाऽवियुक्ते कलावत्यौ शास्त्रमर्मज्ञे सरस्वत्याः प्रतिमूर्ती इवोपलक्षिते मिथो रममाणे सहैव देवार्चनपरे धर्मश्रवणोन्मुख्यौ सर्वमन्यदपि सममेव चक्रतुः।

एकदा चैका स्थविरतापसी **सुज्येष्ठा-चिल्लणा**शोभितं कन्यान्तःपुरमागता धर्मं शौचमूलं वर्णयामास। तच्छुत्वा च **सुज्येष्ठो**वाच-"शौचमशुभाश्रवात्मकतया पापहेतुरेव न पापनाशकम्"। एवं **सुज्येष्ठया** युक्त्या पराजितां तामन्तःपुरदास्यो जहसुः, कण्ठे गृहीत्वा निरवासयंश्च। ततो निर्गच्छन्ती च सा तापसी दध्यौ-"पाण्डित्यगर्वितामिमां प्रचुरासु सपत्नीषु दुःखभाजं करोमि"। ततः सा पिण्डस्थध्यानेन **सुज्येष्ठा**रूपं मनसि विधाय पटे लिखित्वा **राजगृहं** गत्वा **श्रेणिका**य दर्शयामास। तां दृष्ट्वा च **श्रेणिक**स्तत्सौन्दर्यं बहु वर्णयित्वाऽपृच्छत्-"इयं सुन्दरी त्वया स्वप्रतिमया रूपं दृष्ट्वा वा पटे लिखिता"।

ततस्तापस्यूचे-"दृष्टमेवेदं रूपं मया लिखितम्"। ततश्चित्रस्थामपि तां दृष्ट्वा जातानुरागः कस्यां नगर्यां कुत्र वंशे कस्येयं पुत्री



किमाख्या च, कां कलामियं जानाति, अस्याः पाणिग्रहो जातो न वेति पप्रच्छ **श्रेणिकः**। ततस्तापसी तस्याः सर्वं वृत्तं प्रश्नानुसारेण वर्णयित्वा तया विवाहार्थं नृपं प्रेरयामास। ततो नृपस्तापसीं विसृज्य दूतमनुशिष्य **सुज्येष्ठा**प्रार्थनानिमित्तं **चेटकं** प्रति प्रेषयामास। दूतोऽपि **वैशाल्यां** गत्वा नृपं नत्वा **मगधे**शस्त्वत्तः **सुज्येष्ठां** याचते इत्युवाच। तत**श्चेटक** उवाच-"तव प्रभोर्न स्वरूपपरिचयः, कथमन्यथा वाहीककुलोद्भवोऽपि हैहयवंशोद्भवां कन्यां वाञ्छति। समानकुलयोरेव विवाहो युज्यते, त**च्छ्रेणिका**य कन्यां न दास्यामि, याहि"। प्रत्यागताद् दूतात् तज्ज्ञात्वा च **श्रेणिकः** खेदं जगाम।

ततस्तत्रस्थोऽ**भयकुमार** उवाच-"पितः! मा खिद्यस्व, युष्माकं मनोरथं पूरयिष्यामि"। एवमुक्त्वा गृहं गत्वा कलाकुशलोऽ**भयः** फलके **श्रेणिक**रूपमालिख्य गुटिकया स्ववर्णस्वरभेदं विदधे। ततो वणिग्वेशं गृहीत्वा **वैशालीं** गत्वा **चेटक**नृपान्तः-पुरसमीपे आपणं चकार। तत्र च सोऽन्तःपुरचेटीनामधिकं द्रव्यं ददौ। तथा पटे लिखितं **श्रेणिकं** नित्यं पूजयामास। दास्या पृष्टश्च-"अयं मम नृपः **श्रेणिक**" इत्युवाच। विस्मिता दास्यश्च **सुज्येष्ठा**यै **श्रेणिक**स्य यथादृष्टमप्रतिमं रूपं कथयामासुः। तद्रूपदर्शनकौतुकात् **सुज्येष्ठया** प्रेरिता च दासी गत्वाऽऽग्रहा**दभय**तस्त**च्छ्रेणिक**-चित्रमादाय तां दर्शयामास। तदनुपमं रूपं दृष्ट्वा च तत्र लीना क्षणं स्थित्वा रहसि गत्वा **सुज्येष्ठा** दासीमुवाच-"फलके यस्येदं रूपं तं पतित्वेनेच्छामि, कोऽत्र तद्घटकः स्यात्? एनं पतित्वेनाऽप्राप्य च मम हृदयं भेत्स्यते, तस्मादिह क उपायः? अथवैतद्रूपपूजको वणिगेवाऽत्रोपायः। तन्मत्कार्यं साधयितुं तं प्रसादाय। तदुक्तं चाऽऽगत्य निवेदय"।

ततो गत्वा दास्या प्रार्थितोऽ**भय** उवाच-"त्वत्स्वामिन्या अभिलषितमाश्वेव पूरयिष्यामि, सुरङ्गां खानयित्वा तया तमानेष्यामि, त्वत्स्वामिन्याऽपि तद्रथोऽधिरोहणीयः । त्वत्स्वामिनी च चित्रदृष्टरूपसाम्याच्छ्रे**णिकं** समागतं दृष्ट्वा हर्षमेष्यति" । एवमुक्त्वा च स **श्रेणिका**गमने स्थान-दिन-मुहूर्त्तादिसङ्केतमप्यदात् । दासी च **सुज्येष्ठा**यै तद् निवेद्याऽऽगत्य त्वद्वचः प्रमाणमित्य**भय**मुक्त्वा पुनरन्तःपुरं ययौ । **अभय**श्च गत्वा **श्रेणिका**य सङ्केताद्युदन्तं सर्वमाख्यत् । **सुज्येष्ठा** च तदारभ्य कामार्त्ता **श्रेणिक**मेव स्मरन्ती कदाऽपि निर्वृत्तिं नाऽऽप ।

निर्णीते दिने च **श्रेणिको** द्वात्रिंशता **सुलसा**सुतैः सह सुरङ्गाद्वारं प्राप्य तत्र तैः सह प्रविष्टवान् । सुरङ्गानिर्गतं **श्रेणिकं** **सुज्येष्ठा** च चित्रसम्वादादुपलक्ष्य नितरां मुदिता **चिल्लणां** सर्वं वृत्तमाख्यायाऽऽपप्रच्छे । त्वां विना न स्थास्यामीति **चिल्लणा**प्रतिज्ञां च ज्ञात्वा **सुज्येष्ठा** तां रथमारोप्य स्वयं रत्नकरण्डिकामानेतुं गता । शत्रुगृहे चिरं स्थातुं न युक्तमिति **सुलसा**पुत्रैः प्रेरितश्च नृप**श्चिल्लणा**मेवाऽऽदाय यथा गतेन पथा जगाम ।

समागता **सुज्येष्ठा** च **श्रेणिक**मदृष्ट्वाऽसफलमनोरथत्वात् स्वसुरपहाराच्च "मुषिताऽस्मि, हा **चिल्लणा**ऽपह्रियते" इति पूच्चकार । शीघ्रं सन्निधीभवन्तं **चेटकं** निवार्य च **वीरङ्गकः** सज्जीभूय सुरङ्गाद्वारमागत्यैकेनैव बाणेन गच्छतः **सुलसा**-सुतानवधीत् । यावच्च स सुरङ्गायास्तद्रथानाकर्षति तावच्छ्रे**णिको** दूरं जगाम । ततो **वीरङ्गक**स्तद्वृत्तं **चेटका**य न्यवेदयत् । **चेटक**श्च रथिकानां वधात् तुष्टोऽपि कन्याहरणाद् रुष्टो बभूव । **सुज्येष्ठा** च विफलमनोरथा विषयेच्छां निन्दन्ती विरज्य **चेटक**मापृच्छ्य



**चन्दना**र्यायाः समीपे दीक्षामुपाददे ।

अथ **श्रेणिको**ऽजानन् तत्र स्थितां **चिल्लणां सुज्येष्ठे** इति सम्बोधयामास । ततः **सुज्येष्ठा**याः कनिष्ठाऽहं **चिल्लणे**ति तयोक्तश्च **श्रेणिक** आह-"मम प्रयासो न व्यर्थः । त्वं **सुज्येष्ठा**या अन्यूना **सुज्येष्ठे**वाऽसि" । **चिल्लणा** च पतिलाभेन स्वसृवञ्चनेन च युग-पद्धर्ष-शोकाक्रान्ता जाता । **श्रेणिक**श्च जविना रथेन शीघ्रमेव स्वनगरं प्राप । **अभयो**ऽपि तमनुसरंस्तत्र प्राप । ततः **श्रेणिकश्चिल्लणां** परिणीय गत्वा **सुलसा-नागयोः** सुतमरणवृत्तान्तं कथयामास । तौ च तदाकर्ण्य शोकसन्तप्तौ तारस्वरं रुदन्ताव**भयकुमारो** बोधयामास । तौ बोधयित्वा च **श्रेणिको** गृहं गत्वा **चिल्लण**या सह पुरन्दरः शच्येव विषयान् यथेच्छं बुभुजे ।

अथोष्ट्रिकाक्षपको व्यन्तरायुः समाप्य पुत्रत्वेन **चिल्लणा**याः कुक्षाववततार । गर्भदोषेण च **चिल्लणा**याः पतिमांसभक्षणदुर्दोहदो जातः । पतिव्रता च सा तं दोहदं कस्याऽप्यनाख्याय दिने दिने कृष्णचन्द्रवत् क्षीयते स्म । दुर्दोहदविरक्तया तया च पात्यमानोऽपि स गर्भो नाऽपतत् । राज्ञा च प्रेम्णा कृशाङ्गी सा साग्रहं पृष्टा तद्दोहदं कथञ्चिदाख्यत् । नृपश्च तव दोहदं पूरयिष्यामीति तामाश्वास्य कथमस्या दोहदः पूरणीय इत्य**भयं** पृष्टवान् ।

ततोऽ**भयः श्रेणिक**स्योदरे शशकस्य मांसं तच्चर्मावृतं निधाय तमुत्तानमशाययत्। **श्रेणिका**नुज्ञया च **चिल्लणा** रहसि तन्मांसं भक्षयामास । छलाद् मूर्च्छिते नृपे च मांसं भक्षयन्ती सा क्षणाद् हृदयेन दूयते स्म क्षणाच्च गर्भप्रभावाद् हृष्यति स्म । एवं बुद्ध्या पूर्णदोहदा **चिल्लणा** पतिघ्न्यहमिति मुमोह । राज्ञा स्वमव्रणं दर्शिता च साऽहृष्यच्च ।

अथ सा **चिल्लणा** पूर्णे समये सुतं सुषुवे । ततः सा पितुः शत्रुरेव बालः सर्पडिम्भ इव क्वाऽपि दूरे त्याज्य इति दासीमादिशत् । दासी च तं भासुरं बाल**मशोक**वनं गत्वा भुवि परितत्याज । समागच्छन्त्या तया वृत्तं ज्ञात्वा च **श्रेणिको**ऽ**शोक**वनं गत्वा तं पुत्रं दृष्ट्वा द्वाभ्यां कराभ्यामादायाऽऽगत्याऽस्मिन् ज्येष्ठे सुते त्यक्ते तवाऽन्ये पुत्रा बुद्बुदा इवाऽस्थिरा भविष्यन्तीति बोधयित्वा समर्पयामास । तत**श्चेल्लणा** पत्युर्निदेशादनिच्छन्त्यपि तं बालं स्तन्यदानादिना पालयामास । नृपश्चाऽ**शोक**वने कान्त्या चन्द्र इव दृष्ट इति तस्या-ऽ**शोकचन्द्र** इति नाम चकार ।

**अशोक**वने त्यक्तश्च कुक्कुरीपिच्छेनाऽङ्गुलौ विद्धः पीडया तदा रुदति स्म । ततो नृपः सव्रणमपि तदङ्गुलीं मुखे स्नेहादक्षिपत् । ततश्च स रोदनाद् व्यरंसीत् । व्रणे संरूढेऽपि तस्याऽङ्गुलिः सङ्कुचिताऽभवत् । तेन च स सवयोभिः **कूणिक** इति सम्बोधितः । **चेल्लणा**याश्च क्रमशोऽन्यावपि मोदप्रदौ **हल्ल-विहल्ल**नामानौ द्वौ पुत्रावभूताम् । ते त्रयश्च नित्यं राज्ञो निदेशकारिणो बभूवुः । **चेल्लणा** च पितृद्विषे **कूणिका**य गुडमोदकान् **हल्ल-विहल्ला**भ्यां च शर्करा-मोदकान् प्रेषयामास । **कूणिक**श्च कर्मदोषा**च्छ्रेणिक** एवैवं कारयतीति मन्मानो यौवनं प्रपेदे । ततो वत्सलः **श्रेणिको** महता महेन राजपुत्रीं **पद्मावतीं कूणिके**न परिणाययामास ।

❀ ❀ ❀

अथ **श्रेणिक**स्य भार्या **धारिणी** गर्भं बभार । सा च स्वप्ने मुखे प्रविशन्तं गजं ददर्श । तथा तस्य मेघवृष्टौ भ्रमणदोहदमभूत् । नृपादिष्टेनाऽ**भयकुमारे**ण पूर्णदोहादा च सा पूर्णे समये **मेघकुमारा**ख्यं सुतमसूत ।



इतश्चैको विप्रः पुरा यज्ञं कुर्वाणस्तत्रैकं दासं नियुक्तवान् । दासश्च यज्ञशेषवेतने विप्रेण स्वीकृते यज्ञवाटकेऽस्थात् । तथा स दासो लब्धं यज्ञशेषं साधुभ्यः प्रयच्छति स्म । तन्महिम्ना च देवायुर्बद्ध्वा विपद्य स दासो दिवं जगाम । ततश्च्युत्वा च स दासजीवः **श्रेणिक**स्य **नन्दिषेणा**ख्यः पुत्रोऽभवत् । विप्रस्तु भवान् बभ्राम ।

इतश्चैकस्मिन् वने हस्तियूथे महाबलवानेको यूथपोऽभूत् । स च यौवनं प्राप्य कोऽपि करेणुयूथस्य प्रियो मा भूदिति बुद्ध्या जातं जातं कलभं मारयामास । विप्रजीवश्च तद्यूथस्थाया एकस्याः करिण्या गर्भेऽवतीर्णवान् । ततः सा गर्भिणी करिणी केनाऽप्युपायेनाऽस्मात् पापाद् गजात् पुत्रं रक्षामीति विचार्य मायया खञ्जा भूत्वा मन्दं मन्दं चचाल । स यूथयतिर्हस्ती च मैषाऽन्यस्य भोग्या स्यादिति शनैर्गच्छंस्तां प्रतिपालयामास । ततः सा हस्तिन्यतिमन्दगत्या गच्छन्ती तेन यूथपेन सङ्गमे क्रमशः कालं वर्धयामास । ततः स हस्तीयमक्षमतया चिरादपि सङ्गच्छत्येवेति विश्वासं जगाम ।

एकदा च सा हस्तिनी यूथपे सुदूरं गते सति तृणपूलं मस्तके कृत्वा तापसाश्रमं प्राप्तवती । तापसाश्च मस्तकन्यस्ततृणपूलां प्रणाममभिनयन्तीं करिणीं शरणार्थिनीं विज्ञाय "वत्से ! विश्वस्ता भवे"ति समाश्वासयामासुः । ततः सा तत्राऽऽश्रमे सुखेन निवसन्ती समये जातं पुत्रं तत्रैव मुक्त्वा स्वयं वने यूथेन सङ्गता पूर्ववद् विचचार । तथा मध्ये मध्ये समागत्य कलभाय स्तन्यं ददाति स्म । स कलभश्चाऽप्याश्रम वृक्ष इव क्रमशो ववृधे । तापसाश्चाऽपि

नानातृणकवलैः पुत्रप्रेम्णा तं पोषयामासुः । तापसान् वृक्षान् कलशैः सिञ्चतो निरीक्ष्य चताननुकुर्वन् स तैः **सेचनक** इति नाम्नाऽऽहूतः।

क्रमाच्च सर्वलक्षणयुक्तः स **सेचनको** गजो यौवनसूचकं मदं प्रपन्नो जलं पातुं नदीतीरं प्राप्तो यूथपं पितरं दृष्ट्वा युद्धे तं हत्वा स्वयं यूथपो भूत्वा दध्यौ-"आश्रमेऽस्मिन् मायां कृत्वा मात्रा रक्षितोऽस्मि। मया च यत्पितुरकारि तदेव कोऽप्यस्मिन्नाश्रमे ममेव जातस्त्रातश्च मां मा कार्षीत्" । एवं ध्यात्वा स तं तापसाश्रमं साकल्येन भङ्क्त्वा-ऽलक्ष्य संस्थानमकार्षीत् । ततः पीडितास्तपस्विनस्तद्गजवृत्तं **श्रेणिका**याऽऽचख्युः । **श्रेणिको**ऽपि च शीघ्रं गत्वा तं गजेन्द्रं बद्ध्वा समानीय स्तम्भेऽबध्नात् । ततः स गजो रोषादालिखित इव पादबन्धनरहितोऽपि निःस्पन्दस्तस्थौ । तेन च प्रसन्नास्तापसाः समेत्याऽऽ"स्माभिः पोषितोऽस्मानेव प्रपीडयन् स्वकर्मफलं भुङ्क्ष्वे"ति तं गजमाक्रोशयामासुः ।

ततः स गजो दध्यौ-"नूनमेभिस्तापसैरेवोपायं घटयित्वेदृशीं दशामापितोऽस्मि"। एवं विचिन्त्य क्रोधात् स्तम्भं कदलीकाण्डवद् भङ्क्त्वा बिसतन्तुवद् बन्धनं त्रोटयित्वा च तापसान् भ्रमरानिवा-ऽतिदूरेण विक्षिपन्नभिवनं पलायामास । ततः **श्रेणिक**स्तं गजमानेतुम-श्वारूढैः पुत्रैः सह गत्वा परिवेष्टयति स्म । किन्तु स गजो हस्तिपकानां प्रलोभनां तर्जनां वा न गणयति स्म । किन्तु **नन्दिषेण**स्य वचः श्रुत्वा तं दृष्ट्वा चाऽवधिना पूर्वं जन्म जानन् शाम्यति स्म । **नन्दिषेण**श्च द्रुतमेव तं गजमारुरोह। तथा च गजो **नन्दिषेण**स्य वचसा शिक्षित इव सर्वां क्रियां कुर्वन्नालानवशोऽभूत्। ततः **श्रेणिक**स्तस्मै गजाय पट्टं ददौ प्रीतिपात्रं च चकार । तथा **श्रेणिक**स्य कुलपत्नीषु प्रख्यातपराक्रमाः **काला**द्या बहवः पुत्रा अभूवन् ।



इतश्च **वीर**जिनो विहरन् सपरिवारो **राजगृहं** प्राप्य **गुणशैले** चैत्ये सुरविकृतं समवसरणं शिश्राय । श्रेणिकश्च प्रभुं समवसृतं ज्ञात्वा महर्द्ध्या सपुत्रः समागत्य वन्दित्वा यथास्थानमुपविश्य भक्त्या स्तुतिं चकार । प्रभोर्धर्मदेशनां श्रुत्वा च स सम्यक्त्व**मभय-कुमारा**दयश्च श्रावकधर्मं प्रपेदिरे । देशानान्ते च प्रभुं प्रणम्य पुत्रैः सह प्रसन्नः स्वस्थानं जगाम ।

अथ **मेघकुमारो धारिणीं श्रेणिकं** च रचिताञ्जलिः स्वव्रत-ग्रहणमनुज्ञातुं प्रार्थयामास । ततः **श्रेणिको** दुष्करं व्रतमिति बोधितमपि भवभीतत्वादविरमन्तं **मेघकुमार**मुवाच-"यद्यपि भवोद्विग्नोऽसि, तथाऽपि मम राज्यं गृहीत्वा मां सुखय" । ततस्तत्-स्वीकुर्वाणं **मेघं** नृपो राज्ये निवेश्य भूयस्ते किं करोमीति हर्षादुवाच । ततो **मेघो** जगौ-"तात ! कुतोऽप्यापणाद् दीक्षाग्रहणो-त्सुकाय मह्यं रजोहरण-पात्रादिकमानीयताम्" । ततो नृपो वचनबद्धो-ऽनिच्छन्नपि तथा चकार । **मेघ**श्च गत्वा **वीर**जिनपादान्ते प्रवव्राज ।

अथ **मेघकुमारो** रात्रौ ज्येष्ठक्रमेण कृते संस्तरे प्रसुप्तो गतागतं कुर्वतो मुनेः पादैर्विघटितो दध्यौ-"अमी निर्धनं मां पादैर्घट्टयन्ति, सर्वत्र विभव एव पूज्यः । तत्प्रातर्व्रतं त्यक्ष्यामि" । एवं ध्यायन् स रात्रिं कथञ्चिदतिवाह्य व्रतं त्यक्तुकामो **वीर**जिनमुपजगाम। प्रभुश्च केवलज्ञानेन तदाशयं ज्ञात्वा जगौ-"किं संयमभाराद् भग्नोऽसि, प्राग्भवान् न स्मरसि किम् ? त्वमितस्तृतीये भवे **वैताढ्ये मेरुप्रभा**ख्यो गजोऽभूः । दावाग्निपीडितश्च जलं पातुं सरसि गतः पङ्के मग्नः प्रतिगजेन हतः सप्ताहान्ते मृतः । ततो **विन्ध्ये** तदाख्य एव गजो जातो दावाग्निं दृष्ट्वा जातजातिस्मृतिर्वृक्षादिकमुत्पाट्य स्वयूथरक्षार्थं स्थण्डिलत्रयं चकर्थ ।

अन्यदा च दावे ज्वलिते स्थण्डिलानि प्रतिधावमानस्त्वं पूर्वायातैर्मृगादिभिः पूर्णं स्थण्डिलद्वयमतिचक्राम । तृतीयं स्थण्डिलं गतः शरीरकण्डूयनाय पादं समुदक्षिपः । मिथः प्राणिसम्मर्दस्खलितश्च शशकःस्तवाऽङ्घ्रेरधस्तात् पतितः । तथास्थं शशकमवलोक्य च जातदय उदस्तपाद एवाऽस्थाः । सार्धद्व्यहाद् दवे शान्ते शशकादयो जग्मुः । त्वमपि क्षुत्-तृट्परीतो जलार्थं धावमानश्चिरोद्धृतपादत्वात् खिन्नो भूमौ पतितस्त्र्यहाद् मृत्युं प्राप्य शशकदयापुण्येन राजपुत्रो जातोऽसि । तदेवं लब्धं मानुष्यं मुधा मा कार्षीः" । एवं स्वामिवचनेन **मेघो** व्रते स्थिरो मिथ्या दूष्कृतं कृत्वा विविधं तपस्तप्त्वा विपद्य विजये देवोऽभूत् । ततश्च्युत्वा च **विदेहे**षूत्पद्य सिद्धिं यास्यति ।

❀ ❀ ❀

अन्यदा च स्वामिदेशनया प्रबुद्धो **नन्दिषेणः श्रेणिक**मनुज्ञातुं प्रार्थयामास । पित्राऽनुज्ञातश्च स गृहाद् दीक्षार्थं प्रस्थितो गगनस्थया देवतया प्रोक्तः-"वत्स ! दीक्षार्थं मा त्वरिष्ठाः, तव चारित्रावारकं भोगफलं कर्माऽवशिष्यते । तत्किञ्चित्कालं प्रतीक्षस्व" । तथाऽपि स दुराग्रहाद् प्रभुसमीपं गतवान् । स्वामिना वारितोऽपि च तत्पादपादान्ते प्रव्रज्यां प्रतिपन्नवान् । षष्ठा-ऽष्टमादीनि तपांसि कुर्वन् प्रभुणा सह विहरन् परीषहान् सहमानः सूत्रार्थान् भावयन् कामान् बलाद् रोद्धुं स्वशरीरं भृशं क्रशयामास । इन्द्रियाणि जेतुं च श्मशानादिष्वातापनां चकार ।

एकदा कामेषु कर्मबलात् प्रभवत्सु च स प्रव्रज्याभङ्गभिया स्वमुद्बद्धुं समारेभे । देवता चाऽस्य बन्धच्छेदं चकार । एवं मृत्योर्देवतया वार्यमाण एकाकिविहारपरिकर्मभृत् स षष्ठपारणेच्छया



भिक्षार्थं निर्गतोऽनाभोगाद् वेश्यागृहं प्रविष्टो धर्मलाभमुवाच । मम न धर्मलाभेन किन्तु द्रम्मलाभेन प्रयोजनमिति सविकारं सोपहासं च वेश्यया प्रोक्तः स रोषात् तीव्रतृणं कृष्ट्वा लब्ध्या ततो रत्नराशिं पातयित्वा द्रम्मलाभोऽयं तवेत्युक्त्वा तद्गृहाद् निर्ययौ ।

वेश्या च ससम्भ्रमं तमनुधावमानोवाच-"सुदुष्करमिदं तपस्त्यक्त्वा मया सह भोगान् भुङ्क्ष्व, त्वया विनाऽहमन्यथा प्राणान् त्यक्ष्यामि" । एवं तया भूयो भूयः प्रार्थितः स दोषज्ञोऽपि कर्मवशात् तद्वचः स्वीकृत्य "यदि प्रतिदिनं दशाधिकान् न बोधयिष्यामि तदा पुनर्दीक्षां ग्रहिष्यामी"ति प्रत्यज्ञासीच्च । ततः स त्यक्तमुनिलिङ्गस्तद्गृहे वसन् सदा देवताया जिनस्य च दीक्षानिषेधिकां वाचं स्मरन् तया सह भोगानभुक्त । प्रतिदिनं दश भव्यान् प्रबोध्य जिनेश्वरसमीपं प्रेषयामास च ।

अन्यदा च भोगफले कर्मणि क्षीणे तस्य प्रयतस्य बोधयतोऽपि नव जना अबुध्यन्त, किन्तु रङ्कजातीयो दशमो नैव बुबुधे । तस्मिन्नबुध्यमाने च समयज्ञा वेश्या **नन्दिषेणा**य कृतां रसवतीं मुहुर्मुहुराख्यत् । किन्त्वपूर्णाभिग्रहः स नोत्तस्थौ । किन्तु तं रङ्कजातीमेव विविधैर्वचोभिर्बोधयन्नस्थात् । वेश्यया बह्वाग्रहाद् भोजनार्थमुक्तश्च स **नन्दिषेण** उवाच-"यदि दशमो बोधितो न स्यात् तदाऽहमद्यैव पुनः प्रव्रजिष्यामि" । एवं तामुक्त्वा **नन्दिषेणो** भोग्यफलं भुक्तं ज्ञात्वा ततो निर्गत्य स्वामिनः पार्श्वे पुनर्दीक्षां ललौ । ततः स महात्मा **नन्दिषेण**स्तद्दुश्चरितमालोच्य जिनेन्द्रेण सह विहरन् तीव्रं तपस्तप्यमानो व्रतं पालयन् विपद्य देवत्वमाप ॥ ६ ॥

*इति दशमे पर्वणि श्रेणिकसम्यक्त्वलाभ-मेघकुमार-नन्दिषेणप्रव्रज्यावर्णनात्मकः षष्ठः सर्गः ॥६॥*

## सप्तमः सर्गः

अथ **श्रेणिकश्चेल्लण**या विषयसुखमनुभवंस्तस्यामत्यन्तमासक्तोऽभूत् । तत्पार्श्वं कदाऽपि स नाऽमुञ्चत् । एकदा च भयङ्करे शिशिरर्त्तौ प्रवृत्ते श्री**वीर**जिनः सपरिवारो **राजगृहे** समवासार्षीत् । ततो नृपः **श्रेणिकश्चेल्लण**या सहाऽऽगत्य **वीर**जिनं वन्दित्वा वलितो जलसमीपे प्रतिमास्थितं निरावरणं शीतपरिषहं सहमानं श्रमणं मुनिं ददर्श । ततो वाहनादुत्तीर्य तं भक्त्या वन्दित्वा पुण्यवार्तां पत्न्या सह कुर्वन् गृहं ययौ ।

तत्र च सज्जिते रतिभवने **श्रेणिकश्चेल्लण**या गाढमालिङ्गितो निशि सुष्वाप । गाढनिद्रायां च **चेलणा**याः करः प्रच्छदपटाद् बहिर्भूतो दुःसहशीताक्रान्तो जातः । तेन च गतनिद्रा **चेल्लणा** करं प्रच्छदपटान्तः कृत्वा नृपहृदि निधाय निरावरणं प्रतिमास्थं तं मुनिं स्मृत्वेदृशे शीते कथं स भविष्यतीत्युक्त्वा पुनर्निद्रां प्राप । नृपश्चाऽल्पनिद्रस्तद्वचसा प्रबुद्धस्तस्या वचः श्रुत्वा दध्यौ-''नूनमस्या मनस्यन्यः प्रियः कोऽप्यस्ति, यमेवं शीतपीडासम्भावनयेयं शोचति'' । एवं चिन्तयन्नीर्ष्यया तान्तिमनुभवन् जाग्रदेव तां निशामत्यवाहयत् । प्रातश्च **चेल्लणा**मन्तःपुरं गन्तुमादिश्याऽ**भयकुमार**-माहूय **श्रेणिक** उवाच- ''अन्तःपुरं दुराचाराक्रान्तं ज्ञायते । तन्मातृमोहं त्यक्त्वा तत् सर्वं ज्वाल्यताम्'' । एवम**भयकुमार**-



मादिश्य नृपो **वीर**जिनं वन्दितुं जगाम । इतोऽ**भय**श्च विवेकी भयभीतो दध्यौ-मम मातरः सर्वा निसर्गतः सच्छीलाः, तासामहं रक्षकः, पितुराज्ञा च तादृशी । तथाऽपि कथञ्चित् कालक्षेपः क्रियते, तेन हि पितुः कोपनिवृत्तिं सम्भाव्यते'' । एवं विचार्याऽ**भयकुमारो**-ऽन्तःपुरसमीपे जीर्णहस्तिशालां ज्वालयित्वाऽन्तःपुरं दग्धमिति घोषयामास ।

इतश्च **श्रेणिके**न '**चेल्लणा** किमेकपत्न्यनेकपत्नी वे'ति पृष्टः श्री**वीर**जिनस्तां शीलवतीमशङ्कनीयामुवाच । तच्छ्रुत्वा च नृपः पश्चात्तापाक्रान्तो द्रुतं नगरं प्रतिधावमानस्तथाज्वालनं कृत्वा-ऽभिमुखमागच्छन्त**मभय**मस्मदाज्ञा पूरिता किमित्यपृच्छत् । ततोऽ**भयः** प्रणम्य कृताञ्जलिः स्वाम्यादेशः प्रमाणमित्युवाच । ततो नृपस्त्वं मातृवधकः किं न वह्नौ पतित इत्य**भय**माक्रुष्टवान् । ततोऽ**भय** उवाच- ''देव ! श्रुतजिनवचनोऽहं समये व्रतं ग्रहीष्यामि, पतङ्गमरणं नाऽर्हामि, तथाऽपि तयाऽऽज्ञया तथा कृत्वाऽपि मर्त्तुमुत्सहे'' ।

ततो नृपो मद्वचसाऽपि किमकृत्यमकार्षीरिति ब्रुवन् मूर्च्छामाप । **अभय**श्च नृपं शीतोपचारेण स्वस्थीकृत्योवाच-अन्तःपुरे कुशलं, किन्तु मया भवदाज्ञा विराद्धेति ममाऽपराधः । मयाऽन्तःपुर-समीपस्था जीर्णा हस्तिशाला ज्वालिता । नहि भवदाज्ञामप्यविवेकेना-ऽहं पालयामि'' । ततो नृपस्त**मभयं** प्रशस्य पारितोषिकदानेना-ऽनुग्राह्याऽत्यन्तमुत्कण्ठित**श्चेल्लणां** द्रष्टुं तत्सदनं जगाम । प्रतिदिनं च नवनवेन प्रेम्णा **चेल्लण**या रेमे ।

अथाऽन्यदा **श्रेणिको** दध्यौ-''**चेलणा** मम प्रियतरा, तदन्यराज्ञीभ्योऽस्यां को विशेषः प्रसादः क्रियताम् ? यद्वाऽस्या एकस्तम्भं प्रासादं कारयामि, तत्रेयं विमाने सुरीव सुखं तिष्ठतु'' ।

एवं विचार्य नृपोऽ**भयं चेलणा**र्थमेकस्तम्भप्रासादनिर्माणमादिशत् । ततोऽ**भये**न स्तम्भार्हदारुनिमित्तमादिष्टो वर्धकिर्वनं गतः सर्वलक्षण-लक्षितं वृक्षमेकं ददर्श । ततोऽयं वृक्षराजः साधिदैवत एव भवितु-मर्हतीति ध्यात्वा देवतां प्रसादयितुं तपसि कृतनिश्चय उपोष्य गन्ध-धूप-माल्यादिभिर्वृक्षमध्यवासयत् ।

तदानीं च तद्वृक्षाधिष्ठो व्यन्तरोऽ**भयकुमार**मुवाच-'वर्धकिं निवारय, ममाऽऽश्रयो वृक्षो न च्छेदनीयः । अहमेवैकस्तम्भं प्रासादं करिष्यामि तथा तत्समीपे नन्दनमिवोद्यानं च करिष्यामि" । ततोऽ**भयकुमारो** नः समीहितं सिद्धमित्युक्त्वा वर्धकिं वनात् निवर्त्तयामास । व्यन्तरश्च यथाप्रतिपन्नमेकस्तम्भं प्रासादमुद्यानं च व्यधात् । **अभये**न तद्दर्शितश्च प्रसन्नो नृपस्तं प्रशस्य **चेलणां** तत्र मुक्त्वा स्वयमपि तया सह तत्रैवोवास। **चेलणा** च तत्र तदुद्यान-सम्भवैः पुष्पैर्नित्यमर्हन्तं पूजयामास । पत्यर्थं मालां जग्रन्थ । तथा तदुपवने सा **श्रेणिकं** प्रीत्या रमयामास ।

अथाऽन्यदा सिद्धविद्यस्य तत्पुरवासिनो मातङ्गपतेः स्त्रिया माकन्दफलदोहदो जज्ञे । तया निवेदितश्चाऽसमये आम्रफलं कुत इति चिन्तयन् तयैव **चेलणो**द्याने तदिति विज्ञाय स मातङ्गपतिस्तत्रा-ऽऽगत्य सदा फलान् चूतान् दृष्टवान् । ततो रात्रौ समागत्या-ऽ**वनामन्या** विद्ययाऽऽम्रशाखां नमयित्वाऽऽम्राणि गृह्णाति स्म । प्रातश्च **चेलणा** लूनफलामाम्रवाटिकां दृष्ट्वा राज्ञे न्यवेदयत् । राजाऽ**प्यभय**माम्रचौरगवेषणार्थमादिशत् ।

**अभय**श्च चौरान्वेषणं प्रतिज्ञाय तत्प्रभृति तस्य तस्करस्य दिदृक्षयाऽहर्निशं नगरेऽभ्राम्यत् । एकदा च पौरैः कार्यमाणे सङ्गीतके



गतः सोऽ**भय**स्तैर्दत्ते आसने आसीन उवाच-यावद् नटा नाऽऽयान्ति तावत् कथां श्रृणुत । **वसन्त**पुरेऽतिनिर्धन एको जीर्णश्रेष्ठ्यभूत् । तस्य च वरयोग्या कुमारीकन्यकाऽभूत् । सा च वरार्थं कामदेवपूजनाय क्वाऽप्युद्यानेऽन्वहं चौर्येण पुष्पाण्यवचिनोति स्म ।

तत उद्यानपालः पुष्पचौरमहमद्य धरिष्ये इति सङ्कल्प्य निलीय तस्थौ । किन्तु पूर्ववदागत्य निःशङ्कं पुष्पाण्यवचिन्वतीं तां रूपवतीं दृष्ट्वा क्षुब्धोऽपि तां बाहुना धृत्वा सकम्पो विस्मृतकोपश्चोवाच-'सुन्दरि ! मां कामार्त्तं रमयस्व, अन्यथा त्वां न मोक्ष्यामि, त्वं हि मया पुष्पक्रीत्यसि" । ततः सोवाच-"मां मा स्पृश, अहमद्याऽपि कुमार्येवाऽस्मि" । ततः स उद्यानपालो जगौ-"तर्हि त्वयोढमात्रयेदं शरीरमादौ ममैव सम्भोगपात्रीकर्त्तव्यमि"ति प्रतिजानीहि । तथेति प्रतिपद्यमाना सा तेन मुक्ता स्वगृहं ययौ ।

अन्यदा च परिणीता सा रात्रौ वासगृहं गता पतिमुवाच-"आर्यपुत्र ! मया मालाकारस्य मयोढमात्रया तस्यैव प्रथमाभिगमः प्रतिज्ञातोऽस्ति, तन्मामनुजानीहि, येन वचनबद्धाऽहं तं यामि, पश्चात्तु त्वदधीनैव भविष्यामि" । ततश्च सत्यप्रतिज्ञेयमिति सविस्मयं पत्या-ऽनुज्ञाता सा वासगृहाद् निरीय गच्छन्ती रत्नाभरणलुब्धैर्दस्युभिर्निरुद्धा । तदा मालिकवार्त्तामाख्याय निवर्त्तमानाया ममाऽऽभरणानि गृह्णीध्व-मित्युक्त्वा विमुक्ताऽग्रे जगाम । तदा क्षुधार्त्तेन राक्षसेन रुद्धा यथाख्यातवृत्तज्ञेन तेनाऽपि वलितामेतां भक्षयिष्यामीति मुक्ता च मालिकं प्राप्य साऽहं पुष्पलावी नवोढा त्वामुपागताऽस्मीत्युवाच । ततो मालिकस्तां सत्यप्रतिज्ञां महासतीयमिति मातृवद् नत्वा मुमोच । पश्चाद् निवर्त्तमाना च कथितया मालिकाद् मुक्तिकथया तुष्टेन रक्षसाऽपि मुक्ता चौरैरपि तत्सतीत्वप्रभावाभिभूतैर्मुक्ता गृहं प्राप्य

सर्वामेव तथ्यां कथां पत्ये निवेदयामास । ततः साऽखिलां रात्रिं तेन पत्या मुक्ता सूर्योदये सर्वस्वस्वामिनी चक्रे च ।

लोकास्तद्विचार्य कथयत-"कोऽत्र दुष्करकारकः पतिश्चौरो राक्षसो मालिको वा ?" तदेर्ष्यालुभिः पतिर्नवोढायाः स्वपत्न्या एव परपुरुषार्थं प्रेषणाद् दुष्करकारक इत्युक्तम् । क्षुधितैश्च राक्षसः क्षुधायां ज्वालितायां सत्यामपि भक्ष्यत्यागाद् दुष्करकारकः प्रोक्तः । जारैश्च स्वयमुपस्थितयुवतीत्यागादुद्यानपालको दुष्करकारकः प्रतिपादितः । आम्रचौरेण च सुलभधनत्यागाच्चौरा दुष्करकारकाः समर्थिताः । ततोऽ**भयकुमार**स्तं तस्करं परिज्ञाय धृत्वा त्वया कथं चूतफलं ह्रियते इति पप्रच्छ । चौरेण च विद्याबलेनेत्युक्तश्चाऽ**भयो** राज्ञे सर्वं निवेदयामास । चौरं समर्पयामास च ।

ततः **श्रेणिक** उवाच-'शक्तिमानयं चौरोऽवश्य निग्राह्यः' । ततोऽ**भय** उवाच-"प्रथममेतस्माद् विद्या ग्राह्या, पश्चादुचितं विधेयम्"। ततो नृपो मातङ्गपतिमग्रे समुपवेश्य ततो विद्यां पठितुमारेभे । सिंहासनस्थस्य नृपस्य पठतोऽपि चोच्चप्रदेशे पतितं चलमिव विद्या हृदि न तिष्ठति स्म । ततो विद्यां कूटेन पाठयसि, येन विद्या मयि न स्फुरतीति मातङ्गपतिं नृपस्तर्जयामास ।

ततोऽ**भय** उवाच-"नृप! अयं तव विद्यागुरुः, गुरौ विनयिनां च विद्या स्फुरति, तदेनं सिंहासने समुपवेश्याऽग्रेऽञ्जलिं कृत्वा भुव्युपविश्याऽधीष्व" । तथाऽनुतिष्ठतश्च नृपस्य हृदि द्वे **उन्नामन्यवनामन्यौ** विद्ये नृपस्य हृदि दर्पणे प्रतिबिम्बमिवाऽवतस्थाते । ततोऽ**भयो** नृपं कृताञ्जलिः प्रसाद्य विद्यागुरुत्वमापन्नं तं मातङ्गपतिं मोचयामास ।

❀ ❀ ❀



अथाऽन्यदा **मगधेशः श्रेणिकः** समवसृतं श्री**वीर**जिनं नन्तुं सपरिवारो जगाम । तदानीं च मार्गे जातमात्राऽतिदुर्गन्धा बालिका त्यक्ताऽऽसीत् । तस्यास्तद्गन्धमसहिष्णवः सर्वे नासिकां मुद्रयामासुः । **श्रेणिके**न किमेतदिति पृष्टश्च परिच्छदस्तां तादृशीं बालिकां कथयामास । ततो नृपः श्रुतजिनोपदेशप्रभावाज्जुगुप्सारहितस्तां बालां स्वयं दृष्ट्वा समवसरणं गत्वा **वीर**जिनं वन्दित्वा यथावसरं तस्या बालिकायाः कथां पप्रच्छ ।

ततो **वीर**प्रभुरुवाच-"**प्रान्त**देशे **शालि**ग्रामे **धनमित्र**श्रेष्ठी बभूव । तस्य च **धनश्री**नाम्नी कन्याऽऽसीत् । श्रेष्ठिना तस्या विवाहे प्रारब्धे च ग्रीष्मर्तौ केऽपि साधवो विहरन्तः समाजग्मुः । पित्राऽऽज्ञाता च सा सच्छीला तान् मुनीन् प्रतिलाभयन्ती तेषां प्रस्वेदक्लिन्नाङ्गवस्त्राणां मलगन्धमाघ्राय विप्रीता 'किमेते निर्मलधर्मधराः प्रासुकजलैर्न स्नान्ती'ति जुगुप्सां चक्रे । तेन च बद्धं दुष्कर्माऽनालोच्याऽप्रतिक्रम्य चैव मृता सा **राजगृहे** वेश्याकुक्षाववतीर्णा । गर्भस्थाऽपि सा मातुरप्रीतिदायिनी जाता । तेन च तया प्रतिदिनं पीतैरपि गर्भपातौषधैः स गर्भो न नष्टः । यथाकालं जातां च तां दुर्गन्धां बालां सा विष्टामिव सद्य एव तत्याज ।

ततः **श्रेणिकः** पुनः प्रभुं कीदृशोऽस्याः सुख-दुःखानुभवो भविष्यतीति पप्रच्छ । ततः प्रभुरुवाच-"अनया सर्वं दुःखं भुक्तम्, अग्रे चेयं सुखभाग् भविष्यति । असौ बालाऽष्टौ वर्षाणि तवाऽग्रमहिषी भविष्यति । एतां च त्वं शुद्धान्ते रममाण एनया कृतया त्वत्पृष्ठे हंसलीलया जानीयाः" । ततो नृपो विस्मित इयं मे पत्नी कथं भविष्यतीति चिन्तयन् **वीर**जिनं नत्वा स्वस्थानमगात् ।

इतश्च कर्मनिर्जरावशाद् विलुप्तदुर्गन्धां तां बालिकां दृष्ट्वैकाऽनपत्याऽऽभीरी गृहीत्वा स्वकुक्षिजातामिव पालयामास । क्रमाद् वर्धमाना च सा रूप-लावण्यशालिनी यौवनं प्रपेदे । एकदा नगरे प्रवृत्तकौमुद्युत्सवे दिदृक्षया च सा कुमारी बाला मात्रा सह समाययौ। **श्रेणिका**-ऽ**भया**वपि च निर्मलवस्त्रावृत्ताङ्गौ तत्र समेयतुः । तत्रोत्सवसम्मर्दे च **श्रेणिक**स्य हस्तस्तस्या आभीरीपुत्र्याः कुमार्याः पीनोन्नतपयोधरे वक्षसि लग्नः । तेन च जातरागो नृपः सद्य एव सम्भोगसूचनामिवोर्मिकां निजां तस्या वस्त्राञ्चले बद्ध्वाऽ**भय**-कुमारमादिशत्-'मम व्यग्रचित्तस्योर्मिका केनाऽप्यपहृता, तत्तदपहारकस्त्वया शोधनीयः'' ।

ततो धीमान**भयकुमारो** रङ्गमण्डपद्वाराणि रुद्ध्वा लोकानेकैकं ततः कर्षन् प्रत्येकं वस्त्राणि केशान् मुखं च शोधयन् तस्या आभीरपुत्र्या वस्त्राञ्चले बद्धामूर्मिकां दृष्ट्वा 'त्वया कथमेषोर्मिका गृहीते'ति तां पप्रच्छ । तया च कर्णौ पिधाय न जानामीत्युक्तश्च स धीमा**नभयो** दध्यौ-''नूनमिमां रूपवतीं दृष्ट्वा जातानुरागस्तात एनां ग्रहीतुमभिज्ञानार्थं स्वयमूर्मिकां बबन्ध'' । एवं विचार्य च स तां नृपसमीपं नीत्वेयं तव चित्तेन सहोर्मिकाया अपहारिकेत्यवोचत् । ततो नृपो दुष्कुलादपि स्त्रीरत्नमादेयमित्यहमेनां परिणेष्यामीत्युक्त्वा तां परिणीयाऽग्रमहिषीं चकार ।

अथाऽन्यदा नृपो राज्ञीभिरक्षैश्चिक्रीड । तत्र च यो जयेत् स जितस्य पृष्ठेऽश्वस्येवाऽध्यारोहेदिति पणो बभूव । नृपं जितवत्यः कुलीना राज्यश्च जयसूचनाय नृपपृष्ठे वस्त्रमात्रं न्यधुः । क्रमशो जितवती सा वेश्यापुत्री च निःशङ्कं नृपपृष्ठमारुरोह । नृपश्च भगवद्वचः स्मृत्वाऽकस्माज्जहास । ततः सा पृष्ठादुत्तीर्य नृपं हासकारणं पप्रच्छ।



नृपोऽपि च प्रभुणाऽऽख्यातं तस्याः पूर्वभवादिकं पृष्ठारोहणपर्यन्तं सर्वं वृत्तान्तं कथयामास । तच्छ्रुत्वा च सद्य एव वैराग्यमापन्ना सा नृपमादरादनुज्ञाप्य श्री**वीर**जिनपादान्ते व्रतमाददे ।

इतश्च समुद्रमध्ये पातालगृहोपमे **आर्द्रक**देशे **आर्द्रके** नगरे श्रीमान् चन्द्रसुन्दर **आर्द्रको** नाम नृपो बभूव । तस्य चाऽऽ**र्द्रका**-ख्यायां महिष्यामा**र्द्रककुमारो** नाम सुतो बभूव । स च यौवनं प्रपन्नो भोगान् भुञ्जानः सुखेनाऽस्थात् । **आर्द्रक**नृपेण च **श्रेणिक**नृपस्य परम्परागता प्रीतिरासीत् । एकदा च **श्रेणिकः** प्रचुरमुपायनं दत्त्वा निजं सचिव**मार्द्रक**समीपं प्रेषयामास । तत्र गतश्च मन्त्री तेना-ऽऽ**र्द्रक**नृपेण सगौरवं सत्कृतः । मन्त्रिणोपनीतान्युपायनानि सौवर्चल-निम्बपत्रकम्बलादीनि सादरमादाय **श्रेणिक**नृपकुशलादिकं स **आर्द्रक**नृपो मन्त्रिणं पप्रच्छ । मन्त्री च यथोचितं नृपकुशलादिकं कथयित्वाऽऽ**र्द्रकं** मोदयामास ।

तदानीं चाऽऽ**र्द्रक**कुमारेण 'को **मगधे**शस्तवेदृशं मित्रमि'ति पृष्टो नृपः परम्परागतां **मगधेशश्रेणिक**मैत्रीं वर्णयामास । तत **आर्द्रक**कुमारो मन्त्रिणं पप्रच्छ-''किं तव स्वामिनो गुणवान् कोऽपि पुत्रोऽस्ति, तमहं मित्रं कर्तुमिच्छामि'' । ततो मन्त्र्युवाच-''कुमार ! धीमान् पञ्चमन्त्रिशतमुख्यो दाता दयालुर्दक्षः कृतज्ञः कलावांश्च'' **श्रेणिक**नृपस्याऽ**भयकुमारा**ख्यः पुत्रोऽस्ति'' । तं श्रुतं किं न जानासि ? स सर्वगुणसमग्रोऽस्ति'' । **आर्द्रक**नृपश्चाऽ**भये**न मैत्री-मिच्छन्तं स्वपुत्रं प्रशशंस, द्वयोर्मैत्रीमनुमोदयामास च ।

तत **आर्द्रक**कुमारः पितुराज्ञामिष्टामाप्य मन्त्रिणमुवाच-''मामनापृच्छ्य मा यासीः, गच्छंश्च त्व**मभया**य मम प्रीतिवाचिकं श्रृणुयाः'' । मन्त्री चैवमस्त्वित्युक्त्वा राज्ञा विसृष्टो वेत्रिदर्शितमावासं

जगाम । अन्यदाऽऽ**र्द्रक**नृपो मौक्तिकादीन्युपायनानि स्वपुरुषं समर्प्य तं मन्त्रिणं च व्यसृजत् । **आर्द्रककुमार**श्चाऽपि तस्य मन्त्रिणो हस्तेऽ**भयकुमारा**र्थं मुक्तादीनि प्रेषयामास । स पुरुषश्च सचिवेन सह **राजगृहं** गत्वा **श्रेणिका**याऽ**भया**य चोपायनान्यर्पयामास । मन्त्री चाऽ**भयमार्द्रककुमार**स्तव मैत्रीमिच्छतीति वाचिकमुवाच ।

तच्छ्रुत्वा चाऽ**भयकुमारो** दध्यौ-'मन्ये, श्रामण्यविराधनयैव सोऽ**नार्येषु** जातः । स आसन्नभव्य इत्यनुमिनोमि । कथमन्यथा-ऽभव्यस्य तस्य मया भव्येन मैत्रीमनोरथः स्यात् । समानपुण्य-पापानां हि प्राणिनां प्रीतिर्भवति । तत्केनाऽप्युपायेन तं जैनं कृत्वा-ऽऽप्तो भवामि । तस्याऽऽ**र्द्रककुमार**स्य तीर्थकरबिम्बदर्शनाज्जाति-स्मरणमपि सम्भाव्यते । तदुपायनव्याजेन रत्नमयीमाचार्यप्रतिष्ठिता-मर्हत्प्रतिमां प्रेषयामि' ।

एवं ध्यात्वा सोऽ**भयकुमार आदिनाथ**प्रतिमां करण्डस्थां पेटामध्ये निःक्षिप्य तदग्रे धूपदहनघण्टादीनि देवपूजोपकरणानि च मुक्त्वा तालकं ददौ । ततः स्वयं निजया मुद्रया पेटां मुद्रयित्वा तां प्रचुरैरुपायनैः सह त**मार्द्रक**नृपपुरुषं **श्रेणिके**न विसृष्टं समर्प्य सत्कृत्य चोवाच-"एषा मञ्जूषाऽऽ**र्द्रककुमार**स्य दातव्या । तथा तेन रहस्येकाकिना स्वयं पेटामुद्घाट्य तदन्तःस्थं वस्तु प्रेक्षणीयम्, अन्यस्य कस्यचिद् न दर्शनीयं चेति मम वाचिकं च तस्य कथनीयम्" । ततः स पुरुषस्तथेत्युक्त्वा स्वपुरं गत्वा यथायथं स्वस्वामि-तत्पुत्रयोः प्राभृतानि समर्पयामास । तथाऽऽ**र्द्रककुमार**स्या-ऽ**भयकुमार**वाचिकं कथयामास ।

ततः स **आर्द्रककुमारो** रहसि तां पेटामुन्मुद्र्य तदन्तःस्थां द्युतिमती**मादिनाथ**प्रतिमां दृष्ट्वा सहर्ष-विस्मयं दध्यौ-"इदं मे



क्वाऽपि दृष्टपूर्वं प्रतिभाति, किन्तु स्मृतिं न याति" । एवं ध्यायतश्च तस्य मूर्च्छितस्य जातिस्मृतिर्जाता । तेन च स निजां पूर्वभवकथां सस्मार । "अहं पूर्वस्मिन्नितस्तृतीये भवे **मगध**देशे **वसन्त**पुरे **सामायिका**ख्यो गृहमेध्यभूवम् । तदानीं च **बन्धुमती** मम भार्याऽऽसीत् । तया सार्धं चाऽहं **सुस्थिताचार्य**समीपे जैनं धर्मं श्रुत्वा प्रबुद्धास्तत्समीपे भार्यया सहैव दीक्षामग्रहीषम् ।

एकदा च गुरुणा सह विहरन्नहमेकं नगरमगाम् । **बन्धुमत्य**पि चाऽऽर्याभिः सह तत्राऽऽगता । पूर्वरमणसंस्कारवशात् तां दृष्ट्वा तस्यां जातानुरागोऽहं स्वहृद्भावमन्यमुनये न्यवेदयम् । तेन तज्ज्ञापितया साध्व्या कथिता **बन्धुमती** विषादं गता तामुवाच-"गीतार्थस्यैतस्य मर्यादातिक्रमणं नोचितम्, एष हि देशान्तरगतामपि मां रागाद् न विस्मरिष्यति, तदहं मरणं प्रपत्स्ये, यथा तस्य मम च शीलभङ्गो मा भूत्" । एवमुक्त्वा च साऽनशनं प्रपद्य स्वमुद्बध्य विपद्य देवभूवमाप । तां व्रतभङ्गभयाद् विपन्नां श्रुत्वा चाऽहं प्रशस्य भग्नव्रतस्य मम जीवनं धिगिति निर्वेदमाप्याऽनशनं प्रपद्य विपद्य च देवोऽभवम् । ततश्च्युत्वा चाऽहमनार्यो धर्मवर्जितो जातोऽस्मि" ।

एवं पूर्वजन्म स्मृत्वा स दध्यौ-'यो मां प्रतिबोधयिता स मे बन्धुर्गुरुश्च । तत्पितरमनुज्ञाप्याऽननुज्ञाप्यैव वाऽ**भय**गुरुपवित्रितमार्यदेशं गमिष्यामि" । एवं विचार्य स **आर्द्रककुमार आदिनाथ**प्रतिमां पूजयन् कालं निनाय ।

* * *

अथाऽन्यदा स पितरम**भयकुमारं** द्रष्टुमिच्छामीति न्यवेदयत् । ततः पित्रा न गन्तव्यमिति निषिद्धोऽ**भयं** प्रत्युत्कण्ठितश्च स्थातुं गन्तुं

वा न शशाक । ततः स सर्वदाऽ**भय**मेव स्मरन् क्वाऽपि रतिमविन्दमानः पान्थान् **मगध**देशमार्गादिकं पृच्छति स्म । **आर्द्रक**नृपश्च कुमारमत्युद्विग्न**मभयं** प्रत्यनापृच्छ्याऽपि जिगमिषुं सम्भाव्य 'देशान्तरं गच्छन्नयं भवद्धी रक्षणीय' इति पञ्चसामन्तशतीमादिशत्। तत्प्रभृति च ते सामन्ताश्छायेव तत्पार्श्वं कदाऽपि न तत्यजुः । कुमारश्चाऽपि ततः स्वं कारानिक्षिप्तमिवाऽमन्यत । ततः स कुमारोऽ**भय**समीपगमनं मनसि कृत्वा प्रतिदिनं वाह्याभ्यामश्ववाहनं कर्त्तुमारेभे । तदानीं च सामन्ता मैषो गमदित्यश्वारूढास्तत्पार्श्वेऽस्थुः । तेन च कुमारोऽश्वं वाहयन् किञ्चिद् गत्वा निवर्त्तते स्म । एवं प्रत्यहमधिकाधिकं गत्वा निवर्त्तमाने तस्मिंस्तेऽङ्गरक्षका विश्वासं जग्मुः ।

एकदा चाऽऽ**र्द्रककुमारो** विश्वस्तैर्निजैः पुरुषैः समुद्रे प्रवहणं प्रगुणीकृत्य रत्नैस्तां पूरयित्वाऽर्हत्प्रतिमामप्यारोहयामास । अश्वं वाहयन्नलक्षितश्च स तत्प्रवहणमारुह्याऽऽर्यदेशं गत्वा यानादुत्तीर्य तां प्रतिमा**मभया**य प्रेष्य सप्तक्षेत्र्यां धनानि व्ययित्वा मुनिलिङ्गं प्रपद्य सामायिकमुच्चारयितुं कृतोपक्रमो गगनस्थया देवतयोक्तः-'यद्यपि त्वं महासत्त्वस्तथाऽपि दीक्षां मा ग्रहीः, तव भोगफलं कर्माऽवशिष्यते, तद् भुक्त्वा यथाकालं व्रतं गृह्णीयाः'' । किन्तु स तां देवतावाचमनादृत्य स्वपुरुषकारमवलम्ब्य स्वयं व्रतमाददे । ततः प्रत्येकबुद्धः स मुनिर्दुष्करं व्रतं पालयन् विहारक्रमतो **वसन्त**पुरं प्राप्य बाह्यदेवकुले प्रतिमया समाधिस्थस्तस्थौ ।

इतश्च तन्नगरे कुलीनो **देवदत्त**श्रेष्ठ्यभवत् । तस्य च पत्नी **धनवत्या**सीत् । **बन्धुमती**जीवश्च च्युत्वा तयोः **श्रीमती** नाम पुत्री जाता । सा रूपवती **श्रीमती** धात्रीभिर्लाल्यमाना धूलिक्रीडायोग्यं



वयः प्रपेदे । एकदा च सा श्रीमती पतिरमणक्रीडया क्रीडितुमिच्छुर्वयस्याभिः पौरकन्याभिः सह तत्राऽऽगता । तत्र क्रीडाप्रारम्भे च सर्वा बालिकाः स्वरुचिवरं वृणुते स्म । तत्र **श्रीमत्यु**वाच-मयाऽसौ भट्टारको वृतः । तदानीं च देवता साधु वृतमित्यसकृदुवाच । तथा गर्जितं कुर्वती सा देवता तत्र रत्नान्यवर्षयत् । तेन भीता च **श्रीमती** तस्य मुनेः पादे लग्ना ।

ततः स दध्यौ-''व्रतभङ्गकरोऽयं मम महानुपसर्गो जातः'' । एवं विचार्य सोऽन्यत्र जगाम । नृपश्चाऽस्वामिकं धनं राज्ञ इति न्यायात् तां रत्नवृष्टिं ग्रहीतुं तत्राऽऽगतवान्। तद् द्रव्यं संजिघृक्षवश्च राजपुरुषास्तत् स्थानं नागाकीर्णं दृष्ट्वाऽमुष्यै विवाहे मया दत्तमेतद्द्रव्यमिति देवतोक्तं श्रुत्वा च ततोऽपासरन् । ततः **श्रीमती**पिता सर्वं तद् धनं जग्राह ।

अथ तां बहवो वराः परिणेतुमैच्छन्त । ततो वरं वृण्विति पित्रोक्ता सोवाच-''मया महामुनिरेव वरो वृतः तद्वरणे च देवता द्रव्यमदात् । स मुनिश्च मया स्वरुच्यैव वृतः । तद् द्रव्यं गृहीत्वा च त्वयाऽपि तदनुमतमेव । तन्मां तस्मै दातुमङ्गीकृत्याऽन्यस्मै दातुं नाऽर्हसि। कन्या हि सकृत् प्रदीयते'' । तच्छुत्वा श्रेष्ठ्युवाच-'स न प्राप्योऽस्ति। मुनयो हि नैकत्राऽवतिष्ठन्ते । तस्याऽऽगमनमपि न निश्चितम् । तस्याऽभिज्ञानमपि किमपि नाऽस्ति'' ।

ततः **श्रीमत्यु**वाच-''तात ! गर्जितभीतया मया विलग्नया तत्पादे लाञ्छनं दृष्टमस्ति, तद्यथा प्रतिदिनमागतान् मुनीन् पश्यामि तथा कुरु'' । तच्छुत्वा श्रेष्ठ्युवाच-'इह पत्तने समायातेभ्यो मुनिभ्यस्त्वं स्वयं प्रतिदिनं भिक्षां देहि'' । ततः सा **श्रीमती** प्रत्यहं तथा चकार, लाञ्छनदिदृक्षया मुनिपादानवन्दत'' ।

अथ द्वादशेऽब्दे दिग्भ्रमात् स मुनिस्तत्राऽऽगतो लक्ष्मदर्शनात्-तयोपलक्षितः । तदा **श्रीमती** तमाह-"देवकुले त्वं मया तदानीं वृतोऽसि, त्वमेव मम वरः । तदानीं मां मुग्धां विहाय गतोऽसि । अद्य मया पुनः प्राप्तो न गन्तुमर्हसि, प्रसीद, मां भजस्व । यदि मामवज्ञास्यसि तदाऽहं काष्ठभक्षणं करिष्यामि, तेन च तव स्त्रीहत्यापातकं स्यात्" । ततः स मुनिर्नृपेण महाजनेनाऽन्यैरपि च प्रार्थितो व्रतग्रहणनिषेधिकां देवताया वाचं स्मृत्वा नृपादीनामाग्रहात् तां **श्रीमतीं** परिणीतवान् । तया रममाणस्य च तस्य क्रमशः पुत्रोऽजनि। तस्मिन् क्षीरकण्ठतां विमुच्य वाचमाददाने पुत्रे च मुनिः **श्रीमती**मुवाच-'अतः परं पुत्रस्ते सहायोऽस्तु, अहं दीक्षां गृह्णामि" ।

ततः **श्रीमती** पुत्रं ज्ञापयितुं तूलपूर्णिकतर्कुं चाऽऽदायाऽऽसने उपविश्य तर्कुकर्म प्रारेभे । तदा किमिदमयोग्यं कर्म करोषीति बालकेन पृष्टा च सोवाच-'वत्स ! तव पिता दीक्षार्थं गमिष्यति, तस्मिन् गते च पतिरहिताया मम तर्कुरेव गतिः" । तच्छ्रुत्वा स बालकोऽस्पष्टमधुरमुवाच-'अहं पितरं बद्ध्वा धारयिष्यामि, तर्हि कथं स यास्यति" । एवमुक्त्वा च स सौम्याकृतिर्बाल **ऊर्णनाभो** लीलयेव तर्कुसूत्रेण पितुः पादौ परिवेष्ट्य मातरं "मा भेषीः, स्वस्था भव । मया बद्धपादोऽसावधुना गन्तुं न क्षमः" इत्युवाच। **श्रीमती**पतिश्च तदा दध्यौ-"अस्य बालस्य स्नेहबन्धो मन्मनः पक्षिणं पाशयति । तन्मत्पदोर्यावन्तः सूत्रवेष्टकाः सन्ति तावन्त्यब्दान्यहं सुतवात्सल्याद् गृहे स्थास्यामि" । ततः स पादयोर्द्वादशतन्तु-बन्धसद्भावात् तावन्ति वर्षाणि गृह एवाऽस्थात् ।

अथ प्रतिज्ञावधौ पूर्णे विरक्ताशयः स रात्रेश्चरमे प्रहरे दध्यौ-भवकूपाद् बहिर्गन्तुं रज्जुतुल्यं व्रतं गृहीतमपि मया त्यक्तम् ।



पूर्वजन्मनि मनसैव व्रतभङ्गतोऽनार्यत्वं प्राप्तोऽस्मि, अतः परं कां गतिं यास्यामि । तदधुना प्रव्रज्य तपसाऽऽत्मानं शोधयामि" । एवं ध्यात्वा स प्रभाते भार्यां **श्रीमतीं** कथयित्वा तदनुमतिमाप्य च मुनिवेषं गृहीत्वा निर्ममः सन् गृहाद् निर्गतवान् ।

अथ **राजगृहं** प्रति प्रस्थितः स मार्गो स्वसामन्तपञ्चशतीं चौरकर्मपरायणां दृष्टवान् । उपलक्ष्य तैर्भक्त्या वन्दितश्च स तान् 'किमेषा युष्माभिः पापमूला जीविकोरीकृतेति भर्त्सयामास । ततस्ते ऊचुः-"यदा त्वमस्मान् वञ्चयित्वा पलायितस्तदा वयं नृपतेरात्मानं ह्रिया दर्शयितुमक्षमास्तवाऽन्वेषणे महीं भ्राम्यन्तोऽऽगत्या चौर्यवृत्त्यैव जीवामः" ।

ततो मुनिः पुनस्तानुवाच-"कष्टे समापतितेऽपि धर्मानुबन्ध्येव कर्म विधेयं, मनुष्यभवो हि महापुण्यफलम् । तस्य च धर्मः स्वर्गा-ऽपवर्गहेतुः फलम् । तद् यूयमहिंसा-सत्या-ऽस्तेय-ब्रह्मा-ऽपरिग्रहा-नार्हतान् धर्मान् स्वीकुरुध्वम् । यूयं नृपभक्ताः । अहं च नृपवदेव युष्माकं स्वामी । तन्मम मार्गप्रपत्तिर्भवतां युक्तमेव" । ततस्ते ऊचुः-"त्वं मम स्वाम्यधुना च गुरुरपि । त्वया धर्मं बोधिताः स्मः । तदस्मान् दीक्षादानेनाऽनुगृहाण" । ततो मुनि**रार्द्रककुमार**स्तान् प्रव्राजयामास ।

अथ तैः समन्वित **आर्द्रककुमार**मुनिः श्री**वीर**जिनं वन्दितुं **राजगृहं** गच्छन् सम्मुखागतं **गोशालं** न प्रणनाम । ततस्तेन तस्य विवादो जातः । तच्छ्रोतुं च तत्र भूचराः खेचराश्च कौतुकात् सहस्रशो मिलिताः । तत्र **गोशाल** उवाच-"तपोनिमित्तं कष्टं मुधा, यतो भाग्यादेव शुभा-ऽशुभफलम्" । तत **आर्द्रककुमार**मुनिरुवाच-यदि

सुखं स्वीकरोषि तर्हि तत्र पौरुषं कारणं मन्यस्व । यदि सर्वत्र नियतिरेव कारणं स्यात् तर्हि तव क्रिया अपि मुधा स्युः । भोजनाद्यर्थं प्रयत्नेन चाऽलम्, एकत्रैव नियतिमाश्रित्य किं न तिष्ठसि । तन्नियतिवत् पौरुषमपि स्वार्थसिद्धौ हेतुः । तत्राऽपि नियतेः पौरुषं ज्यायः । गगनाद्धि जलं पतति, पौरुषमाश्रित्य भूखननेनाऽपि तल्लभ्यम् । तदिष्टसिद्धौ नियतिर्बलवती, ततोऽपि पौरुषं बलवत्तरम्" । एवं निरुत्तरीकृत**गोशालः** स **आर्द्रककुमार**मुनिः सजयजयारावं भूचर-खेचराद्यैः स्तुतो हस्तितापसानामाश्रमं ययौ ।

तत्र च नीरसीकरणायाऽऽतपे विकीर्णैर्हस्तिमांसैर्भरितान्युटजान्यासन् । तत्रस्थास्तापसाश्चैकं गजेन्द्रं हत्वा तन्मांसं खादन्तो दिनानि गमयन्ति स्म । पुनश्च ते बहूनां मृगादीनां हनने पापमित्याहारार्थमपर एको महान् गज एव चिरमुदरपूर्त्तये हन्तव्य इति दयाभासमवलम्बमाना महान्तमेकं गजं मारणाय बबन्धुः । यत्र च स शृङ्खलितो गज आसीत्, तेनैव मार्गेण स **आर्द्रककुमार**मुनिर्जगाम ।

जनैर्वन्द्यमानं मुनिपञ्चशतीपरिवृतं तं मुनिं दृष्ट्वा स गजोऽल्पकर्मा दध्यौ-"बद्धोऽहं कथमेनं वन्दे" । ततस्तस्य गजस्य तन्मुनिदर्शनाच्छृङ्खलानि स्वयमेव भग्नानि ।

ततो मुक्तबन्धनः स गजस्तं मुनिं वन्दितुं पस्पर्श । जनस्तु व्याकुलीभूय हतो मुनिरिति वदन् पलायिष्ट । किन्तु मुनिस्तथैव तस्थौ । स करी च मस्तकं नमयित्वा तं मुनिं ननाम । तत्पादौ स्पर्शं स्पर्शं च परमां शान्तिं प्राप । तत उत्थाय भक्त्या तं मुनिं पश्यन् स मतङ्गजो वनं प्राविशत् । तदद्भुतं प्रभावं दृष्ट्वा क्रुद्धास्तापसा



अपि तेन मुनिनाऽऽ**र्द्रककुमारे**ण बोधिता उपजिनेश्वरं प्रेषिता गत्वा **वीर**जिनपादान्ते दीक्षां जगृहुः ।

अथ **श्रेणिक**नृपो गजमोक्षणं तापसप्रतिबोधं च श्रुत्वाऽ**भयकुमारे**ण सहाऽऽगत्याऽऽ**र्द्रककुमार**मुनिं ववन्दे । मुनिश्च धर्मलाभाशिषा तमानन्दयामास । ततो नृपो मुनिं सकुशलं भूमावासीनं दृष्ट्वोवाच-"मुने ! हस्तिमोक्षणं महाश्चर्यम्" । ततो मुनिरुवाच-"गजमोक्षणं न दुष्करं, किन्तु तर्कुतन्तुपाशमोक्षोऽतिदुष्करः" । ततो राज्ञा पृष्टो मुनिस्तर्कुतन्तुकथां कथयामास । लोकश्च तच्छ्रुत्वा विस्मयं जगाम ।

तत **आर्द्रककुमार**मुनिर**भयकुमार**मुवाच-"त्वं मम निष्कारणोपकारी धर्मबान्धवोऽभूः । त्वत्प्रेषिताऽर्हत्प्रतिमावलोकनेन प्राप्तजातिस्मृतिरहं जैनोऽभवम् । त्वयाऽहमनार्यत्वकूपादुद्वृतोऽस्मि । त्वद्बुद्ध्यैव बोधमाप्याऽऽर्यदेशं प्राप्तोऽस्मि । त्वया प्रतिबोधित एव च व्रतं प्रपन्नोऽस्मि । तत्त्वं चिरं कुशलं तिष्ठ" । ततः **साभयः श्रेणिको**ऽन्ये च मुनिं वन्दित्वा स्वस्थानं जग्मुः । मुनिश्च **राजगृहे** समागतं **वीर**जिनं ववन्दे । तं सेवमानश्च कृतार्थः स शिवपदं जगाम ॥ ७ ॥

*इति दशमे पर्वणि चेलणायोग्यैकस्तम्भप्रासादनिर्माण-आमफलापहारकेण श्रेणिकविद्याग्रहण-दुर्गन्धाकथा-आर्द्रककुमारकथावर्णनात्मकः सप्तमः सर्गः ॥७॥*

## अष्टमः सर्गः

अथ भव्यान् प्रबोधयन् प्रभु**र्वीर**जिनो विहारक्रमेण **ब्राह्मण-कुण्ड**ग्रामं प्राप्तो **बहुशाला**ख्योद्याने देवैर्विकृते समवसरणे प्रविश्य पूर्वरत्नसिंहासने यथाविधि तस्थौ । **गौतमाद्याः** सुरादयश्च यथास्थानं तस्थुः । भूयांसः पौरा अपि तत्राऽऽययुः । **देवानन्दार्षभदत्ता**-वप्येत्य प्रभुं वन्दित्वा यथास्थानमुपाविशताम् । ततो **देवानन्दा**या **वीर**जिनमवलोकमानायास्तनौ रोमोद्गमः स्तनाभ्यां दुग्धस्रावश्च जज्ञे । तां तथाविधां प्रेक्ष्य विस्मितः संशयमाप्य **गौतमः** कृताञ्जलिः प्रभुं पप्रच्छ–"प्रभो ! **देवानन्दा**याः सूनुमिव त्वां दृष्ट्वा कथमीदृशी दशा ?"

ततो **वीर**जिन उवाच–"**गौतम** ! अहं **देवानन्दा**कुक्षिजः, अहं स्वर्गाच्च्युत्वाऽस्याः कुक्षौ द्व्यशीतिदिवसमुषितवान् । तेनैषा-ऽज्ञातपरमार्थाऽपि मयि वत्सला जाताऽस्ति" । ततस्तौ दम्पती **देवानन्दार्षभदत्तौ** तच्छ्रुत्वा नितरां मुमुदाते । सा सभा च तादृक् पूर्वं कदाऽप्यश्रुतेर्विस्मिता जाता । तौ दम्पती च स्वं धन्यं मन्यमानौ पुनरुत्थाय प्रभुं ववन्दाते । पित्रोः प्रत्युपकारो दुष्कर इति बुद्ध्या **वीर**जिनोऽपि तौ जनांश्चोद्दिश्य धर्मदेशनां विदधे ।



तथाहि–प्राणिनामिहभवे पिता–पुत्रादिसम्बन्धो मुहुर्मुहुर्जायते विघटते च । संसारे एतत् सर्वमिन्द्रजालवत् । विवेकी जनोऽत्र क्षणमपि स्थातुं नोत्सहते । यावदिदं शरीरं न जराजीर्णं यावच्च प्राणाः सन्ति तावद् निरतिशयसुखसाधनं व्रतं ग्रहीतव्यम् । तत्र प्रमादो न युक्तः" ।

तच्छ्रुत्वा च विरक्तौ तौ दम्पती "आवां संसाराद् विरक्तौ, तद्भवतारणीं दीक्षां देहि, त्वमेव भवं तर्तुं तारयितुं च प्रभुरसी–" त्यूचतुः । प्रभुणा च तथाऽस्त्विवति प्रोक्तौ तावै**शान्यां** गत्वा भूषणादीनि त्यक्त्वा पञ्चमुष्टिभिः केशलोचं कृत्वा प्रभुं प्रदक्षिणीकृत्य वन्दित्वोचतुः–"भवभीतावावां त्वां शरणं श्रितौ, तद्दीक्षादानेना-ऽनुगृहाण" । ततः प्रभुः स्वयं तयोर्दीक्षां दत्त्वा समाचारमावश्यक-विधिं चाऽऽख्यत् । तथा **चन्दना**यै **देवानन्दां** स्थविरेभ्य **ऋषभदत्तं** चाऽर्पयामास । तौ च व्रतं पालयन्तावेकादशाङ्गमधीत्य तपः कृत्वा केवलमाप्य निर्वाणमापतुः ।

❀ ❀ ❀

अथ **वीर**जिनो विहरन् **क्षत्रियकुण्ड**गामं प्राप्य समवसरणस्थो धर्मदेशनां विदधे । तज्ज्ञात्वा **नन्दिवर्धन**स्तत्राऽऽगत्य भक्त्या वन्दित्वा कृताञ्जलिर्यथास्थानमुपविवेश । **जमालि**श्च **वीर**जिनजा-माता **प्रियदर्शन**या सह तत्राऽऽगत्य प्रभुं वन्दित्वा धर्मदेशनां श्रुत्वा पितरावनुज्ञाप्य क्षत्रियाणां पञ्चशत्या सह व्रतं जग्राह । **जमालि**भार्या वीरप्रभोः पुत्री **प्रियदर्शना** चाऽपि स्त्रीसहस्रेण सहिता प्रभुपादान्ते दीक्षामग्रहीत् ।

अथ प्रभुरन्यत्र विजहार । क्षत्रियमुनिभिः सहितो **जमालि**श्च प्रभुमनुससार । **जमालि**र्विहरन्नधीतैकादशाङ्गीकः प्रभुणा सह

दीक्षितानां क्षत्रियमुनीनामाचार्यपदे प्रतिष्ठितश्चतुर्थ-षष्ठा-ऽष्टमादीनि तपांस्यकरोत् । **चन्दना**मनुसरन्ती **प्रियदर्शना** चाऽपि तपांस्यकरोत् । अन्यदा च ''सपरिच्छदोऽहमनियतेन विहारेण त्वदनुज्ञया गच्छामी''-ति **जमालि**ना भूयो भूयः प्रार्थितोऽपि प्रभुर्ज्ञानेन भाविनमनर्थं ज्ञात्वा न किमप्युदतरत् । **जमालि**श्च मौनं स्वीकारलक्षणमिति मत्वा विहर्त्तुं प्रभोः पार्श्वात् सपरिच्छदो निर्गतवान् ।

अथ विहरन् **जमालिः** क्रमात् **श्रावस्तीं** नगरीं प्राप्य **कोष्टका**भिधे बहिरुद्याने समवासार्षीत् । असमयेऽपथ्यपानान्नाशनेन च तस्य पित्तज्वर उदभूत् । उपविष्टः स स्थातुमक्षमः शिष्यमुनीन् संस्तारककरणायाऽऽदिशत् । ततस्ते संस्तारकं कर्त्तुं प्रारेभिरे । पित्तपीडितश्च स पुनः पुनः संस्तारकः कृतो न वेति पप्रच्छ ।

संस्तारकः संस्तृत इति मुनिभिरुक्तश्च स **जमालि**रुत्थाय तत्समीपं गत्वा संस्तारकं क्रियमाणं दृष्ट्वाऽक्षमत्वात् तत्रोपविश्य जातमिथ्यात्वः कोपाद् मुनीनब्रवीत्-''भोश्चिराद् भ्रान्त्वा मयेदं ज्ञातं यत् क्रियमाणं न कृतं किन्तु कृतमेव कृतम्'' । तद्भवद्भिर्यत् क्रियमाणं कृतं वर्णितं तदसत्यं वक्तुं नोचितम् । यत्तु जिन उत्पद्यमानमुत्पन्नं क्रियमाणं च कृतं वक्ति तत् प्रत्यक्षविरुद्धम् । क्षणसमूहसाध्ये वस्तुनि प्रारम्भे कृतत्वोक्तिर्मिथ्यैव । अर्थक्रियाकारि वस्तु मतम् । न चाऽऽद्यक्षणसम्बन्धमात्रेण वस्तुनि साध्यावस्थावस्थेऽर्थक्रियाकारित्वम् । यदि च प्रारम्भ एव वस्तुनः कृतत्वं तदा शेषक्षणेषु कृतस्यैव करणं स्यादित्यनवस्थैवाऽऽपद्येत । तत्कृतमेव कृतमिति युक्तम् । नह्यजातस्य सुतस्य नाम क्रियते । प्रत्यक्षमेव प्रतिपत्तव्यम्। नहि महद्भिरुक्तमित्येतावता युक्तियुक्तं त्याज्यम् । सर्वज्ञोऽर्हन्न मिथ्या वदेदिति न भ्रान्तव्यं, महान्तोऽपि हि क्वचित् स्खलन्ति'' ।



एवं विरुद्धं भाषमाणं कुपितं निर्मर्यादं **जमालिं** स्थविरा ऊचुः-एवं किं विरुद्धं भाषसे ? वीतरागा जिना नाऽन्यथा भाषन्ते। नहि तद्वचसि प्रत्यक्षविरोधादिदोषलेशोऽपि । यदि वस्तु प्रारम्भे नोत्पन्नं तदा कालाविशेषात् समयान्तरेऽपि नोत्पन्नं स्यात् । प्रारम्भेऽपि च वस्तुनोऽभिधाज्ञानोपयोगसद्भावादर्थक्रियाकारित्वमस्त्येव । ब्रवीत्येव हि पृष्टो लोको घटं करोमीति । न वा प्रारम्भे यत् कृतं तदेव द्वितीयक्षणादौ क्रियते, किन्त्वन्यदेवेति नाऽनवस्थाऽपि । छद्मस्थानां च युक्तायुक्तत्वविवेकोऽयोग्यस्त्वादृशानामित्यग्राह्यमेव त्वद्वचः । केवलिनः सर्वज्ञा एव प्रमाणमिति त्वत्प्रयासो वृथैव । महतां स्खलनोक्तिश्चैवमुन्मत्तजल्पितं तव । उक्तप्रकारेण क्रियमाणं कृतमिति सर्वज्ञोक्तेर्युक्तत्वात् । त्वं च सर्वज्ञोपदेशत एव प्राज्यमपि राज्यं तृणवत् त्यक्त्वा प्राव्राजीरिति गुरुवचनमदूष्यं दूषयतस्तव भववृद्धिरेव जायते । त**द्वीर**जिनमुपगम्य त्वया प्रायश्चित्तं विधेयम् । अर्हद्वचनमेकाक्षरमात्रमप्यश्रद्दधानो मिथ्यात्वतो भवपरम्परामेव याति ।

एवं स्थविरैर्बहुधा बोधितोऽपि **जमालिः** स्वनिश्चयादनिवृत्तो मौनं शिश्राय । तेन च कुमताग्रहिणं तं केऽपि स्थविरास्तदैव त्यक्त्वा प्रभुमुपजग्मुः । केचनैव च तत्र तस्थुः । **प्रियदर्शना** चाऽपि स्त्रीसुलभमोह-स्नेहाभ्यां सपरिवाराऽपि **जमालि**पक्षमेव श्रितवती । क्रमाच्च नीरोगो **जमालि**स्तत्स्वदुर्मतमेव प्रतिदिनं जनानुपदिशन् जिनवचनं हसन् स्वं सर्वज्ञं ख्यापयन् साहङ्कारः सपरिवारो विजहार'' ।

अथाऽन्यदा **चम्पा**यां पुरि **पूर्णभद्रा**ख्योद्याने समवसृतं श्री**वीर**जिनमुपगम्य गर्विष्ठो **जमालि**रुवाच-"भगवन् ! तव बहवः शिष्याश्छद्मस्था अप्राप्तकेवला एव मृताः, न च तादृगहम् । ममाऽनन्तं केवलमुत्पन्नमित्यहमेवेह सर्वज्ञोऽस्मि" । तच्छ्रुत्वा **गौतमः** पप्रच्छ-"भो **जमाले** ! यदि ज्ञान्यसि तर्हि जीवो लोकश्च नित्योऽनित्यो वेति वद" । ततो **जमालिः** प्रतिवक्तुमनीश्वरो व्यात्तमुखः शून्यस्तस्थौ ।

ततो **वीर**जिन उवाच-"**जमाले** ! लोकं जीवं च नित्यमनित्यं च विद्धि । द्रव्यात्मना हि सर्वं नित्यं पर्यायात्मना क्षणध्वंसिना पुनः सर्वमनित्यम्" । एवं कथितवत्यपि प्रभौ मिथ्यात्वग्रस्तो **जमालिः** सपरिवारः समवसरणाद् बहिर्जगाम । ततः सङ्घेन निह्नववादित्वात् स जमालिर्बहिष्कृतः । तदानीं च प्रभोः केवलोत्पत्तेश्चतुर्दशाऽब्दान्यभूवन् ।

अथ **जमालिः** स्वमतं सर्वत्र प्ररूपयन् सर्वज्ञम्मन्यः स्वच्छन्दचारी महीं विजहार । लोके च **जमालि**र्जिनाद् विप्रतिपन्नो मिथ्यात्वं प्रपन्नवानि"ति सर्वत्र ख्यातिर्जाता । अन्यदा च स विहरन् सपरिवारः **श्रावस्तीं** प्राप्यैकत्रोद्याने तस्थौ । **प्रियदर्शना**ऽऽर्याऽपि च साध्वीसहस्रान्विता तत्रैव नगरे **ढङ्क**कुम्भकारशालायां तस्थौ । परमश्रावको **ढङ्क**श्च तां कुमतग्रस्तां ज्ञात्वा केनाऽप्युपायेनेमां बोधयिष्यामीति दध्यौ ।

अन्यदा च स पवने भाण्डान्युच्चिन्वन् बुद्धिपूर्वकं **प्रियदर्शना**याः पटेऽलक्षितमेवाऽग्निकणं चिक्षेप । **प्रियदर्शना** च दह्यमानं वस्त्रं दृष्ट्वोवाच-भो **ढङ्क** ! त्वत्प्रमादेन मम पटो दग्धः, पश्य" । ततो **ढङ्क** उवाच-'साध्वि ! मिथ्या मा वोचः, भवन्मते सकले पटे दग्धे एवैवं वक्तुमुचितम् । अथवाऽनुभवादस्माज्जिनस्य दह्यमानो दग्ध इति वचः प्रतिपत्तुमर्हसि' । तच्छ्रुत्वा जातसम्यग्ज्ञाना सोवाच-"अहं चिरात् कुमतग्रस्ता त्वया साधु बोधिताऽस्मि । इयत्कालं यज्जिनवचो दूषितं तन्मम मिथ्या दुष्कृतमस्तु । अतः परं मम तत् प्रमाणम्" ।



ततो **ढङ्क** उवाच-"अन्ते साधु भविष्यति, अधुनैव गच्छ, प्रभोः समीपे प्रायश्चित्तं चर" । **ढङ्के**नैवं बोधिता सा **प्रियदर्शना**ऽनुशासनमिच्छामीति ब्रुवाणा सपरिवारा **जमालिं** त्यक्त्वा **वीर**जिनं जगाम । **ढङ्के**न बोधिता अन्ये मुनयोऽपि **जमालि**वर्जाः प्रभुसमीपं जग्मुः । **जमालि**श्चैकाकी व्रतं पालयन् स्वमतं प्रचारयन् भूयांसि वर्षाणि महीं विजहार । अन्ते चाऽर्धमासानशनं प्रपद्य निजं दुष्कृतमनालोच्यैव विपन्नः षष्ठे कल्पे **किल्बिषिको** बभूव ।

अथ **गौतमो जमालिं** मृतं ज्ञात्वा प्रभुं वन्दित्वा **जमालिः** कां गतिं गत इति पप्रच्छ । ततो **लान्तके** त्रयोदशसागरोपमायुः **किल्बिषिको** जातो **जमालि**रिति प्रभुणोक्तश्च **गौतमः** पुनः पप्रच्छ-'तादृक् तपस्वी स किं **किल्बिषिको**ऽभूत्, च्युत्वा च कां गतिं यास्यति ?" ततो भगवानुवाच-"गुर्वाज्ञाविराधनया जीवाः **किल्बिषिका**दिषु जायन्ते । **जमालि**श्च ततश्च्युत्वा तिर्यङ्-नरादिषु पञ्चकृत्वो भ्रान्त्वा बोधिं प्राप्य सेत्स्यति । तद्धर्माचार्यादीनां विरोधो न विधेयः" । एवमुक्त्वा प्रभुरन्यत्र विजहार ।

❀ ❀ ❀

इतश्च **साकेत**पुरे लोकैः प्रतिवर्षं सुरप्रियो यक्षश्चित्र्यते महोत्सवश्च क्रियते । चित्रितश्च स यक्षः स्वचित्रकचित्रकरं निहन्ति, अचित्रितश्च पुरे मारिं विकरोति । ततो भीताः पलायमानाश्चित्रकराः स्वप्रजामारिभयेन राज्ञा रुद्धाः । तथा नृपेण तेषां दत्तलग्नकानां पत्रके नामानि लिखित्वा घटे क्षिप्तानि । वर्षे वर्षे च तत्कालं पत्रकमाकृष्यते स्म । यस्य च नाम तत्र भवति स यक्षं चित्रयति । एवं काले गच्छति कदाचिदेकश्चित्रकरपुत्रः **कौशाम्ब्या**स्तत्र चित्रशिक्षार्थमागतश्चित्रकरायाः स्थविरायाः कस्याश्चिद् गृहे स्थितः । तस्य च क्रमात् तत्स्थविरापुत्रेण सह मैत्री जाता ।

तदानीं च क्रमात् तत्स्थविरापुत्रस्य नामपत्रके निर्गते च सा करुणमरोदीत् । चित्रकारपुत्रेण तेन रुदितहेतुं पृष्टा च सा यक्षवृत्तान्तं स्वपुत्रस्य निर्गतं नामपत्रकं च कथयामास । तच्छ्रुत्वा च स चित्रकृद् युवोवाच-"मातर्मा रोदीः । तव सुतो गृह एव तिष्ठतु । अहमेव चित्रकरभक्षकं तं चित्रयिष्यामि" । ततः स चित्रकरयुवा षष्ठं कृत्वा चन्दनमनुलिप्य पवित्रवाससाऽष्टाभिर्गुणैर्बद्धमुखः कूर्चकैस्तं यक्षं चित्रयामास । प्रणम्य तमुवाच च-"सुरप्रिय ! तव चित्रं निर्मातुं निपुणोऽपि चित्रकरो नाऽलं क्वाऽहं मुग्धो बालः । तथाऽपि यथाशक्ति मया योग्यमयोग्यं वा कृतं क्षमस्व" । एवं तद्वचसा प्रसन्नो यक्षो वरं वृणीष्वेत्युवाच ।

तदा स युवोवाच-"यदि तुष्टोऽसि, तदद्यप्रभृति लोको न मारणीयस्त्वयेत्येव वरं वृणोमि" । ततो यक्षो जगौ-"एतद् वरं दत्तमेव । अत एव त्वं न मारितः । अन्यत् किमपि स्वार्थं याचस्व" । ततः स चित्रकारः पुनरुवाच-"त्वया मारिर्लोकानां वारितेत्येतावतैवाऽहं कृतकृत्योऽस्मि" । ततो विस्मितो यक्ष उवाच-"परार्थं ते



वरप्रार्थनेन तुष्टोऽन्यमपि तव स्वार्थं वरं दातुमिच्छामि, तद्यथेष्टं वृणु" । ततश्चित्रकृदुवाच-यं द्विपदं चतुष्पदं वैकभागेनाऽपि पश्यामि तदनुसन्धानेन यथावस्थिततद्रूपचित्रणशक्तिं मे देहि" । तत एवमस्त्विति यक्षेणोक्तो नागरैः सत्कृतः स चित्रकृच्**छतानीक**-नृपसनाथां **कौशाम्वीं** नगरीं ययौ ।

अथाऽन्यदा सभास्थः **शतानीको** दूतमाह-'यदन्यनृपाणामस्ति मम च नास्ति, तत् किमिति वद" । ततो दूतेन चित्रसभा त्वां नास्तीत्युक्तो नृपश्चित्रकरान् सभाचित्रणार्थमादिदेश । ततश्चित्रकाराः सभाभूमिं विभज्य जगृहुः । तस्य प्रसादितयक्षस्य चित्रकरस्य भागे चाऽन्तःपुरासन्नदेशोऽभूत् । तत्र चित्रं कुर्वंश्च स जालकान्तरेण **मृगावत्याः** साङ्गुलीयकं पादाङ्गुष्ठं ददर्श । ततः स चित्रकर इयं **मृगावती** देवीत्यनुमाय तां यथारूपं चित्रयामास । नेत्रे उल्लिख्यमाने च कूर्चिकामुखात्चित्रोरुदेशे मषीबिन्दुः पपात । स च तं शीघ्रमेवाऽपनीतवान् । एवं पुनः पुनर्जाते च स दध्यौ-"नूनमस्या अत्र प्रदेशे लाञ्छनेन भवितव्यम्, अतो मषीबिन्दुं नाऽपनेष्यामि" ।

ततो लिखिते चित्रे नृपस्तदवलोकितुमागतः क्रमाद् **मृगावती**चित्रं तदूरुमूले बिन्दुं च दृष्ट्वा क्रुद्धो दध्यौ-"अनेन पापिना नूनं मम पत्नी भग्नशीला कृता । कथमन्यथा **मृगावत्या** वस्त्रान्तरितमूरुमूलस्थं मषीबिन्दुमसौ जानीयात्" । ततः कोपात् स नृपस्तं दोषमुक्त्वा निग्रहाय तमारक्षकाणां समर्पयामास । ततश्चित्रकरा ऊचुः-"देव ! यक्षवरप्रसादादसावेकांशं दृष्ट्वैव समग्रं चित्रमालिखति" ।

ततो राजा तत्परीक्षणार्थं तस्य कुब्जिकामुखमदर्शयत् । चित्रकरश्च कुब्जिकां यथारूपमलिखत् । तथाऽपि क्रोधाद् राजा

तस्याऽङ्गुष्ठं छेदयामास । ततः स चित्रकरः कृतोपवासो गत्वा तं यक्षं सिषेवे । ततो यक्षो 'वामहस्तेनैव प्राग्वच्चित्रं करिष्यसी"ति वरं ददौ । लब्धवरश्चित्रकरो दध्यौ-"अहं निरपराधोऽपि नृपेणेमां दशां प्रापितोऽस्मि । तत्केनाऽप्युपायेन तं प्रतिकरिष्यामि" ।

अथैवं निश्चित्य स चित्रकरः फलके साभूषणां **मृगावती**-मनुपमसुन्दरीं लिखित्वा गत्वा स्त्रीलम्पटस्य **चण्डप्रद्योत**नृपस्य दर्शयामास । **चण्डप्रद्योत**श्च चित्रं चित्रकरं च प्रशस्य जातरागश्चित्र-कराद् **मृगावतीं** ज्ञात्वा **शतानीका**द् **मृगावतीं** सिंहो मृगाद् मृगीमिव ग्रहीष्यामीत्युक्त्वा **वज्रजङ्घा**ख्यं दूतमनुशिष्य **शतानीक**-नृपान्तिकं प्रेषयामास । दूतश्च गत्वा **शतानीक**नृपं 'राज्यं प्राणाश्च ते प्रियाश्चेद् **मृगावतीं** शीघ्रमस्मभ्यं प्रेषये"ति **चण्डप्रद्योता**देशमुवाच। **शतानीके**न च कोपात् कटूक्त्या निर्भर्त्सितः स दूतोऽ**वत्त्या**मागत्य **चण्डप्रद्योत**स्य सर्वं वृत्तं कथयामास । ततः क्रुद्धश्**चण्डप्रद्योतो** महता सैन्येन **कौशाम्बीं** प्रति प्रतस्थे । **शतानीक**श्च **प्रद्योत**मायान्तं श्रुत्वा जातातिसारो भयाद् मृत्युमाप ।

ततः पतिव्रता **मृगावती** दध्यौ-"पतिर्मे मृतः । बाल **उदयनः** पुत्रश्च स्वल्पबलः । तदस्मिन् स्त्रीलम्पटे कपट एव स्वकलङ्क-निवारणाय विधेयः । अवसरं प्रतीक्षमाणाऽहमनुकूलैः सन्देश-वचनैस्तं प्रलोभ्य कथमपि कालं नेष्यामि" । एवं विचार्य च सा दूतमनुशिष्य प्रेषयामास । स दूतश्च गत्वा शिबिरस्थं **चण्डप्रद्योत**-मुवाच-"देव ! **मृगावती** त्वां ब्रूते-**शतानीके** मृते पुत्रे चाऽल्पबले बाले त्वमेव शरणं मम । किन्तु मया त्यक्तोऽयं प्रत्यासन्न-नृपैरभिभविष्यते" । तद्वचसा प्रीतः **प्रद्योत** उवाच-मयि रक्षके को नाम तत्पुत्रमभिभवितुमीशः ?"



ततो दूत उवाच-"देव ! देव्यप्येवं मन्यते । किन्तु भवन्तो दूरे सीमनृपाश्च समीपे । तद्यदि देव्या निर्विघ्नं योगमिच्छसि तदो**ज्जयिन्या** इष्टकाभिः **कौशाम्ब्यां** विशालं दृढं च प्राकारं कुरु" । **चण्डप्रद्योत**श्च तत् प्रपद्य मार्गे श्रेणिरूपेण निजान् चतुर्दशाऽपि नृपतीन् सपरिच्छदान् मुमोच । ततः पुरुषपरम्परयाऽ**वन्त्या** इष्टका समानीय **कौशाम्ब्या** दृढं प्राकारं कारयामास । **मृगावत्या** पुनर्धन-धान्यादिभिः पुरं पूरयेति सन्दिष्टश्च **प्रद्योतः** सर्वं शीघ्रमेव चकार । ततो **मृगावती**नगरीं रोधक्षमां ज्ञात्वा द्वाराणि पिधाय तत्र तस्थौ । प्राकारे च भटानारोपयत् । ततश्च **चण्डप्रद्योतो** भृशं विषण्णोऽभितः पुरीं रुद्ध्वा तस्थौ ।

अथाऽन्यदा वैराग्यमुद्वहन्ती **मृगावती** दध्यौ-"यदि प्रभु**र्वीरः** समायाति तदाऽहं प्रव्रजामि" । **वीर**जिनश्च तस्या भावं विज्ञाय सपरिवारस्तत्र शीघ्रमेव समाययौ । **मृगावती** च बहिः प्रभुं समवसृतं श्रुत्वा निर्भया द्वाराण्युद्घाट्याऽऽगत्य प्रभुं वन्दित्वा यथास्थानं तस्थौ । **प्रद्योतो**ऽपि समागत्य प्रभुं नत्वा त्यक्तवैरः समुपाविशत् । प्रभुश्च धर्मदेशनां चकार ।

तदानीं च लोकात् सर्वज्ञोऽयमिति श्रुत्वा कश्चिद् धनुर्धरः पुरुषोऽदूरस्थ एव मनसा प्रभुं संशयं पप्रच्छ । ततः प्रभुरुवाच-"वचसा स्वसंशयं ब्रूहि । यथाऽन्येऽपीमे भव्याः प्रतिबुध्यन्ते" । प्रभुणैवमुक्तोऽपि लज्जालुः स स्पष्टं वक्तुमसमर्थो या या सा सेत्यल्पाक्षरं पप्रच्छ । प्रभुश्चाऽप्येवमेतदित्यल्पाक्षरमेव प्रत्युवाच । ततो **गौतमो** या या सा सेति किं वच इति प्रभुं पप्रच्छ। ततो **वीर**जिन उवाच-

इह **भरते चम्पा**यां नगर्यामेकः स्वर्णकारः स्त्रीलम्पटोऽभूत्। स च यां यां रूपवतीं कन्यामपश्यत् तां तां पञ्चस्वर्णशतीं दत्त्वा परिणिनाय। एवं स स्त्रीणां पञ्चशतीं परिणीय तासां प्रत्येकं सर्वं स्वर्णाभरणं ददौ। वारक्रमेण च ता विभूषितास्तेन रन्तुं सज्जिता अभूवन्। एकदा च ताः सर्वाः स्त्रियो निराभरणा एव तस्थुः। ततः स तास्तर्जना-ताडनादिभिरशिक्षयत्। अतीर्ष्यालुतया च स तासां रक्षणार्थं सयत्नः सौविदल्ल इव कदाऽपि द्वारं नाऽमुचत्। अन्यदा च सोऽनिच्छन्नपि प्रियमित्रेण भोक्तुं कथञ्चित् स्वगृहं नीतः।

तदानीं च तत्पत्न्यो दध्युः-''मम यौवनं कारानियन्त्रितमिव जीवनं च धिक्, यमदूत इव पापोऽयमस्माकं पतिर्द्वारं न मुञ्चति। अद्याऽस्याऽन्यतो गमनं साधु। अद्य क्षणं स्वेच्छया तिष्ठामः''। एवं विचार्य ताः स्नात्वाऽऽभरणादि परिधाय दर्पणमादाय यावत् स्वं ददृशुस्तावत् स स्वर्णकारः समागमत्। तास्तथाविधा दृष्ट्वा च स एकां स्त्रियं तथा ताडयामास यथा सा मृता। ततोऽयमस्मानपि हनिष्यत्येवेति सम्भूय वयमेनं हन्मीति विचार्य ता दर्पणानामेकोनानि पञ्चशतानि चक्राणीव तस्मै प्रचिक्षिपुः। तेन स सद्यो मृतः। ततश्च पश्चात्तापशीलास्ताः स्त्रियश्चितावद् गृहं ज्वालयित्वा विपेदिरे।

पश्चात्तापमागतास्ता अकामनिर्जरया मृताः सर्वा अपि मनुष्य-भवमापन्नाः कर्मविपाकाच्चौर्यजीविनः पुरुषा अभूवन्। क्रमाद् मिलिताश्च ते सर्वे एकत्र दुर्गे तिष्ठन्तः सम्भूय चौर्यं कुर्वन्ति स्म। स्वर्णकारश्च तिर्यक्षूत्पेदे। प्राङ् मृता सा तत्पत्नी च तिर्यक्षूत्पद्य द्विजकुले पुत्रोऽभवत्। यदा स पञ्चवर्षो जातस्तदा स स्वर्णकारजीवस्तिर्यग्योनेर्निर्गत्य तद्द्विजकुल एव द्विजपुत्रस्य



स्वसृरूपेणोत्पन्नः। तस्याश्च स एष बालकः पालकत्वेन पितृभ्यां नियुक्तः। किन्तु तेन पाल्यमानाऽपि साऽतिदुष्टतयाऽरोदीदेव।

तेन बालेनाऽन्यदोदरस्पर्शनक्रमात् कथञ्चिद् गुह्ये स्पृष्टा च सा रोदनाद् विरता। ततः स बालस्तस्यास्तद्रोदनप्रतीकारं ज्ञात्वा रोदननिवृत्तये यथासमयं गुह्यस्थानस्पर्शात्मकप्रतिकारमेव चकार। तथा कुर्वंश्चैकदा स पितृभ्यां दृष्टस्ताडयित्वा गृहाद् निर्वासितश्च गिरिगह्वरं जगाम। तथैकोनशतपञ्चकदस्युपूर्णां पल्लीं प्राप्य स तैश्चौरैर्मिलितवान्। तस्य भगिनी चाऽप्राप्तयौवनाऽपि कुलटा स्वैरिणी क्वाऽपि ग्रामे गता। तदैव च स ग्रामस्तैश्चौरैर्लुण्टितः। तत्र सा तैर्गृहीता सर्वैरपि स्त्रीकृता।

एकदा च ते चौरा दध्युः-''इयमेका सर्वानस्मान् सेवमाना शीघ्रमेव मृत्युमेष्यति''। एवं विचार्य तेऽन्यामपि स्त्रियमानैषुः। ततः पूर्वभार्या सेर्ष्यया तच्छिद्राणि मार्गयते स्म। अन्यदा चौरेषु चौर्यार्थमन्यत्र गतेषु सा छलं कृत्वा तां सपत्नीं कूपसमीपं नीत्वा तत्र तद्वचसाऽन्तः किमपि पश्यन्तीं चिक्षेप। आगतैश्चौरैः पृष्टा च साऽपरा क्व गतेति न वेद्मीत्यवोचच्च। ततस्तैरनयेर्ष्यया सा मारितेति ज्ञातम्। स द्विजपुत्रश्च तां दुःशीलां स्वस्वसारमाशङ्क्य लोकाद् मां सर्वज्ञमिहाऽऽगतं ज्ञात्वेहाऽऽगतो लज्जया प्राङ्मनसाऽपृच्छत्। मया 'वचसा पृच्छे'ते प्रेरितश्च या या सा सेति पृष्टवान्। अस्माभिश्चैवमित्युक्त्वा स तव भगिन्येवेत्ययं ज्ञापितः। एवमेव प्राणिनो राग-द्वेषाद्याक्रान्ता नानादुःखं भजमाना भवे भवे भ्रमन्ति। स पुरुषश्च तदाकर्ण्य परं संविग्नः प्रभुपार्श्वे प्रव्रज्य तां पल्लीं गतस्तामेकोनां चौरपञ्चशतीं प्रतिबोध्य प्राव्राजयत्।

अथ **मृगावती** भवोद्विग्ना समुत्थाय स्वामिनं प्रणम्य **चण्डप्रद्योतं** पुत्रं समर्प्याऽऽपृच्छ्य च दीक्षां जग्राह । **प्रद्योतश्चोदयनं कौशाम्ब्यां** नृपमकरोत् । तदानीं च **प्रद्योत**नृपस्याऽ**ङ्गारवत्या**द्या अष्टौ भार्या अपि **मृगावत्या** सह प्रवव्रजुः । प्रभुश्चाऽनुशिष्यता **मृगावत्याद्याश्चन्दना**याः समर्पयामास ।

❀ ❀ ❀

इतश्च सर्वर्द्धिसमृद्धे प्रख्याते **वाणिजक**ग्रामाख्ये महानगरे **जितशत्रु**र्नाम नृपो बभूव । तत्र चाऽऽ**नन्दो** नाम चन्द्र इव लोकाह्लादको गृहपतिरासीत् । तस्य च चन्द्रस्य रोहिणीव रूप-लावण्य-सम्पन्ना **शिवानन्दा**ख्या भार्या बभूव । तस्य च कोषे वृद्धौ व्यवहारे च पृथक् पृथक् चतस्रः स्वर्णकोटयो गवां चत्वारो व्रजाश्चाऽभवन् । तन्नगरादुत्तरपूर्वस्यां दिशि **कोल्लाके** उपनगरे **आनन्द**स्य बहवो बन्धुसम्बन्धिन आसन् ।

**वीर**जिनश्च विहारक्रमतस्तत्पुरस्य **पूतिपलाशो**द्याने समवससार । **जितशत्रु**स्तज्ज्ञात्वा सपरिच्छदः प्रभुं नन्तुं जगाम । **आनन्दो**ऽपि च गत्वा नत्वा प्रभोर्देशनां श्रुत्वा प्रबुद्धो द्वादशविधं श्रावकधर्मं जग्राह । स **शिवानन्दां** विना स्त्री-निधि-वृद्धि-व्यवहारगाश्चतस्रश्चतस्रः स्वर्णकोटीरन्तरेण स्वर्णं, चतुरो गोव्रजान् मुक्त्वा गोव्रजान्, हलपञ्चशतीमृते क्षेत्रं दिग्यात्रार्थं रक्षितानां पञ्च पञ्चशतानि विना शकटान्, दिग्यात्रार्थं चत्वारि प्रवहणानि मुक्त्वा प्रवहणानि, गन्धकाषायीं विनाऽङ्गप्रक्षालनवस्त्रमार्द्रमधुयष्टिं विना दन्तधावनं, क्षीरामलकादपरं फलं सहस्रशतपाकतैलादन्यत्तैलं, सुरभिं विनोद्वर्त्तनमष्टौष्ट्रिकदुग्धकुम्भेभ्योऽन्यमज्जनं, क्षौमयुगादन्यद्वासः, श्रीखण्डा-



गरुकुङ्कुमानि विहाय विलेपनं, मालतीमाल्यात् पद्माच्चाऽन्यत्पुष्पं, कर्णिकानाममुद्रे विहाय भूषणं, तुरुष्कागरुधूपं मुक्त्वा धूपं, घृतपूरखण्डखाद्यं विना भोज्यं, काष्ठपेयामृते पेयां, कलमादन्यद् भक्तं, माषमुद्गकलायैर्विना सूपं, शारदगोघृतमृते घृतं, स्वस्तिकमण्डूकीं वालुक्यां च विहाय शाकं, स्नेहाम्लदाल्यम्लमृते तेमनमाकाशजलादृते जलं, पञ्चसुगन्धिताम्बूलादृते मुखवासं चाऽत्यजत् । गृहमागत्य च स सहर्षं प्रतिज्ञातं श्रावकधर्मं **शिवानन्दा**याः कथयामास । ततः **शिवानन्दा**ऽपि यानमारुह्य तत्क्षणं गत्वा प्रभुं प्रणम्य गृहिधर्मं प्रपद्य पुनर्गृहं जगाम ।

अथ **गौतमः** प्रणम्य ''किमयं महात्माऽऽ**नन्दः** प्रव्रजिष्यती''-ति प्रभुं पप्रच्छ । ततः प्रभुराह-''**आनन्द**श्चिरं श्रावकव्रतं पालयित्वा विपद्य **सौधर्म**कल्पेऽ**रुणप्रभे** विमाने चतुःपल्योपमस्थितिर्देवश्रेष्ठो भविष्यति'' ।

अथेतश्चैत्यैर्विराजमानायां **चम्पा**पुर्यां श्रीमान् महाबाहु-**र्जितशत्रु**र्नृपो बभूव । तस्यामेव पुर्यां च **कामदेवो** नाम लोकानामाश्रयप्रदो गृहपतिरासीत् । तस्य च सुरूपाऽपरा लक्ष्मीरिव **भद्रा** नाम भार्या बभूव । तस्य च निधि-वृद्धि-व्यवहारेषु पृथक् पृथक् षट् स्वर्णकोट्यो दशगोसहस्रसमन्विताः षड् व्रजाश्चाऽभवन् । **वीर**जिनश्च विहरंस्तन्नगरे **पूर्णभद्रा**ख्ये उद्याने समवासरत् । **कामदेव**श्च पादाभ्यामागत्य गत्वा नत्वा प्रभोर्धर्मदेशनां श्रुत्वा प्रबुद्धो द्वादशविधं श्रावकधर्मं प्रपेदे । **आनन्द** इव च स्त्र्यादिकं प्रत्याचख्यौ च । गृहं गतात् तस्माज्ज्ञात्वा च तद्भार्या **भद्रा**ऽप्यागत्य प्रभोरग्रे श्रावकधर्मं गृहीत्वा पुनर्गृहं जगाम ।

इतश्च **काश्यां** महापुर्यां **जितशत्रु**र्नृपो बभूव । तस्यां च महेभ्यश्**चुलनी**पिता गृहपतिरासीत् । तस्य च रूप-यौवनसम्पन्ना **श्यामा**ख्या पत्न्यासीत् । तस्य च निधि-वृद्धि-व्यवहारेषु पृथक् पृथगष्टौ स्वर्णकोट्यो दशगोसहस्रसमन्विता अष्टौ व्रजाश्चाऽभवन् । प्रभुश्च **वीर**जिनो विहरंस्तस्यां नगर्यां **कोष्ठका**ख्ये उद्याने समवासरत् । तत्र च सुरा-ऽसुरा **जितशत्रु**नृपश्च प्रभुं नन्तुं समागता: । **चुलनी**पिता-ऽपि मण्डनमण्डित: पदातिरेवाऽऽगत्य भक्त्या प्रणम्योपविश्य धर्मदेशनां श्रुतवान् । सभायामुत्थितायां च **चुलनी**पिता प्रभुं प्रणम्य पप्रच्छ-"प्रभो ! लोकप्रबोधाय महीं विहरन्नयाचितमेव धर्मं ददासि । तच्छ्रावकधर्मदानेन मामनुगृहाण" । तत: स प्रभुणाऽनुज्ञात: श्रावकधर्मं जग्राह । तथा स **कामदेव** इव स्वर्णादीनां नियमं प्रपेदे । तत्पत्नी **श्यामा**ऽपि च प्रभुसमीपे श्रावकव्रतं गृहीतवती ।

तदा **गौतम:** प्रणम्य प्रभुं पप्रच्छ-"अयं **चुलनी**पिता यतिधर्मं ग्रहीष्यति न वा ?" ततो **वीर**जिन आह-"अयं यतिधर्मं न ग्रहीष्यति, किन्तु श्रावकव्रतं पालयन् विपद्य **सौधर्मे**ऽ**रुणाभ**विमाने चतु:पल्योपमस्थिति: सुरो भूत्वा च्युत्वा **विदेहे**षूत्पद्य सेत्स्यति" ।

अथ तत्रैव **सुरादेवो** गृहपतिर्बभूव । तस्य च **धन्या**ख्या भार्याऽऽसीत् । **कामदेव**वदेव च हिरण्यादिकं तस्याऽऽसीत् । सोऽपि गत्वा स्वभार्यया **धन्य**या सह प्रभोरग्रे श्रावकव्रतं हिरण्यादिनियमांश्चाऽग्रहीत् ।

अथ प्रभुर्विहरन् **आलभिकां** नगरीं प्राप्त: **शङ्खवनो**द्याने समवससार । तत्र नगरे च महर्द्धया **कामदेव**तुल्यश्**चुल्लशतिको** नाम गृहपतिर्बभूव । तस्य **बहुला**ख्या प्रियाऽऽसीत् । स गत्वा भार्यया **बहुल**या सह प्रभोरग्रे गृहिधर्मं नियमांश्च प्रपेदे ।



ततश्च विहृत्य प्रभु: **काम्पील्य**पुरे **सहस्राम्र**वणोद्याने समवासार्षीत् । तत्र नगरे च वास्तव्य: **कामदेव**तुल्यर्द्धि: **कुण्डगोलिको** गृही स्वभार्यया शीलादिसमन्वितया **पुष्प**या सह प्रभोरग्रे श्रावकधर्मं नियमांश्चाऽग्रहीत् ।

अथेत: **पोलाश**पुरे **शब्दालपुत्र:** कुलालो गोशालमतादरी बभूव । तस्य भार्याऽ**ग्निमित्रा**ख्याऽऽसीत् । स च हिरण्य-गोव्रजादि-समृद्ध आसीत् । तन्नगराद् बहिश्च तस्य कुलालस्य पञ्च कुम्भ-कारापणशतान्यासन् । तं कुलालम**शोक**वने कश्चिद् देव उवाच-"प्रात: सर्वज्ञ इहाऽऽगमिष्यति, तं फलकपीठ-संस्तरकादिना सेवेथा:" । आजीवभक्तश्च स "मम धर्मगुरु: सर्वज्ञो **गोशाल** इह प्रातरेष्यती" ति बुबुधे । प्रातश्च प्रभु**वीर**जिनस्तत्र समागत: **सहस्राम्र**वणे समवससार । तत: स कुम्भकारो गत्वा प्रभुमवन्दत । **वीर**जिनश्च देशनां कृत्वा तमुवाच-"**शब्दालपुत्र** ! ह्यस्त्वाम**शोक**वने देव:" सर्वज्ञोऽर्हन्नेष्यति, स त्वया पीठादिसमर्पणेनोपास्यइत्यवदत् । त्वं च गोशाल एष्यतीत्यचिन्तय:" ।

तच्छ्रुत्वा च स कुलालो दध्यौ-"अहो ! अयं सर्वज्ञो **महावीर** आगत:, तदयं वन्दनीय: सेवनीयश्च"। एवं विचार्योत्थाय नत्वा च कृताञ्जलि: प्रभुमुवाच-"एतत्पुराद् बहिर्मम कुम्भकारापणेषु पीठाद्यादाय मामनुगृहाण" । प्रभुश्च तद्वच: प्रपन्नवान् । **गोशाल**-शिक्षावशाद् गृहीताद् नियतिवादाच्च तं युक्तिभि: प्रबोध्य न्यवर्त्तयत् । तत: स नियतिवादमपहाय पुरुषार्थं स्वीकृत्याऽऽ**नन्द** इव प्रभोरग्रे श्रावकव्रतं नियमांश्च प्रपेदे । तद्भार्याऽ**ग्निमित्रा** चाऽपि तेन प्रतिबोधिताऽऽगत्य प्रभोरग्रे श्रावकव्रतं जग्राह । ततो **वीर**जिनोऽन्यत्र विजहार ।

अथ **गोशालको** जनश्रुत्या "**शब्दाल**पुत्र **आजीवक**मतं त्यक्त्वा निर्ग्रन्थश्रमणमतं प्रपन्नवानि"ति श्रुत्वा **शब्दाल**पुत्रकं पुनराजीवकमते स्थापयामीति विचार्याऽऽजीवकैः सह तत्राऽऽगात् । किन्तु **शब्दाल**पुत्रस्तं न सत्कृतवान् । ततः सोऽफलमनोरथस्ततो निर्गतवान् ।

इतश्च **वीर**जिनो **राजगृहे गुणशिला**ख्ये चैत्ये समवससार । तन्नगरे च **चुलनी**पितृसमर्द्धिर्**महाशतक**नामा गृहपतिर्बभूव । तस्य च **रेवत्या**द्यास्त्रयोदश भार्या अभूवन् । तत्र **रेवत्या** अष्टौ हिरण्यकोट्यो व्रजाश्चाऽभूवन् । अन्यासां च प्रत्येकमेकास्वर्णकोटिरेको व्रजश्चाऽभूत् । सोऽपि च प्रभोरग्रे **चुलनी**पितृवद् धर्मं नियमांश्चाऽग्रहीत् ।

अथाऽन्यदा विहरन् **वीर**प्रभुः **श्रावस्तीं** नगरीं प्राप्य **कोष्ठक**संज्ञके उपवने समवससार । तन्नगरे चाऽऽ**नन्द**तुल्यसमृद्धिको **नन्दिनी**पिता गृहपतिरभूत् । तस्य च चन्द्रस्याऽश्विनीवाऽ**श्विनी** भार्याऽऽसीत् । स गत्वा प्रणम्य देशनां श्रुत्वा प्रभोरग्रे **आनन्द** इव धर्मं नियमांश्च शिश्राय । तथा तत्र स **आनन्द**तुल्यर्द्धिको गृहपति**र्लान्तका**पिताऽपि **फाल्गुन्या**ख्यया स्वभार्यया सह प्रभोरग्रे देशनां श्रुत्वा धर्मं नियमांश्चाऽग्रहीत् । तदेवं **वीर**प्रभोर्दृढाशया धीरा दश श्रावकचरा अभूवन् ।

❀ ❀ ❀

अथ **वीर**प्रभुर्विहरन् **कौशाम्बीं** पुरीं जगाम । तत्र च चरमपौरुष्यां चन्द्रा-सूर्यौ स्वविमानस्थौ युगपदेव प्रभुं वन्दितुं समेयतुः । लोकश्च नभसि विमानतेजसा प्रकाशिते सति कौतुकात्



तत्र तस्थौ । **चन्दना** साध्वी चोत्थानसमयं ज्ञात्वा **वीर**जिनं प्रणम्य सपरिच्छदा स्वां वसतिं ययौ । **मृगावती** तु सूर्यप्रभातेजसाऽऽगतां रात्रिमज्ञात्वा दिनभ्रमात् तत्रैव तस्थौ । चन्द्रा-सूर्ययोर्गतयोश्च रात्रिं ज्ञात्वा **मृगावती** कालात्ययाच्चकिता प्रतिश्रयमागता ।

तत**श्चन्दना** तामुवाच-"साध्वि ! कुलीनायास्तव रात्रौ बहिरेकाकिन्याः स्थितिर्न युज्यते" । तत**श्चन्दनां** मुहुर्मुहुः क्षमयन्त्यास्तस्या **मृगावत्या** घातिकर्मक्षयाद् निर्मलं केवलमुत्पन्नम् । सा च शयानायाः साध्व्याः पार्श्वे गच्छन्तं सर्पं केवलाज्ज्ञात्वा पृथिव्या बाहुमुदक्षिपत् । ततः प्रबुद्धया **चन्दन**या किं बाहुरुत्क्षिप्त इति पृष्टा महासर्प इह गच्छतीति कथयामास । ततो गाढेऽन्धकारे त्वया सर्पः कथं दृष्ट इति **चन्दन**या पृष्टा मया केवलज्ञानेनैतज्ज्ञातमिति **मृगावत्यु**वाच । ततश्च **चन्दना**या अपि केवल्याशातनीं मां धिगिति मुहुर्मुहुः स्वं निन्दन्त्याः केवलमुत्पेदे ।

इतश्च **गौतमः** प्रभुमपृच्छत्-"किं भावाः स्वभावतोऽन्यत्वं गच्छन्ति, यच्चन्द्र-सूर्ययोर्विमाने इहाऽऽजग्मतुः ?" ततः प्रभुरुवाच- "दशाऽऽश्चर्याणि स्युः-तत्राऽर्हतामुपसर्गाः, गर्भापहारश्चन्द्र-सूर्यविमानावतरणं, चमरोत्पातो, भव्यरहिता परिषदष्टोत्तरं शतं सिद्धा, अपरकङ्कायां कृष्णगमनमसंयतपूजा, स्त्रीतीर्थं हरिवंशकुलोत्पत्तिश्च । तस्माच्चन्द्रसूर्यविमानावतारः सङ्गतः एव" ।

एवमुक्त्वा ततो विहरन् प्रभुः **श्रावस्तीं** गत्वा **कोष्ठका**ख्ये उद्याने समवससार । तन्नगरे च पूर्वमेवाऽऽगतस्तेजोलेश्याविनाशितविरोधकोऽष्टाङ्गनिमित्तज्ञानवशाल्लोकमनोभावज्ञाता जिनम्मन्य स्वं जिनं ख्यापयंश्च **गोशालो हालाहला**कुम्भकार्या आपणे वसति स्म ।

लोकश्च सरलमतिस्तस्याऽर्हन्निति ख्यातिं श्रुत्वाऽऽगत्याऽऽगत्य तमुपास्ते स्म । इतश्च **गौतमो** यथाकालं प्रभोराज्ञया षष्ठपारणं चिकीर्षुर्भिक्षार्थं पुरं प्रविश्य सर्वज्ञोऽर्हन् **गोशालो**ऽत्राऽस्तीत्याकर्ण्य च सविषादो भिक्षामादाय प्रभोरन्तिकं जगाम । विधिवत् पारणं विधाय समये नागराणां पश्यतामेव प्रभुमपृच्छत्-"प्रभो ! पुर्यामस्यां जना **गोशालं** सर्वज्ञं कथयन्ति, तत् सत्यं न वा ?"

ततः प्रभुरुवाच-"**गोशालो** मङ्खलेर्**मङ्खस्य** पुत्रोऽजिनोऽपि जिनंमन्यः कपटी, अयं मयैव दीक्षित्वा शिक्षितः । किन्त्वयं मिथ्यात्वं गतो न सर्वज्ञः" । ततो नागराः प्रभोस्तद्वच आकर्ण्य सर्वत्रोचुः-"इहाऽऽगतोऽर्हन् **वीर**प्रभुः कथयति यद् **गोशालो मङ्खलि**पुत्रो न सर्वज्ञः" । **गोशाल**श्च किम्वदन्त्या तच्छ्रुत्वा क्रुद्ध आजीवकैरावृतस्तस्थौ ।

इतश्च प्रभोः शिष्यः स्थविरमुख्य **आनन्दः** षष्ठपारणार्थं भिक्षायै पुरं प्राविशत् । हालाहलाशालास्थो **गोशाल**श्च त**मानन्द**मुनिमाहूय साधिक्षेपमुवाच-"भो ! **आनन्द** ! तव गुरु**र्वीरो** लोकात् स्वसत्कार-मिच्छन् सभासमक्षं मां निन्दति, मां **मङ्ख**पुत्रमजिनमसर्वज्ञं च कथयति । तदरिनाशक्षमां मम तेजोलेश्यां न वेत्ति किम् । तमहं सपरिच्छदं भस्मसात् करिष्यामि, केवलं त्वां त्यक्ष्यामि । अत्र दृष्टान्तं श्रृणु-

"पुरा **क्षेमिला**यां पुर्याम**वसरः प्रसरः संवादः कारको भलन**श्चेति वणिजोऽभूवन् । ते च पञ्चाऽपि व्यापारार्थं भाण्डैः शकटान् भृत्वा निर्गता मार्गे निर्जलमरण्यं प्रविष्टाः । पिपासाकुलाश्च ते जलान्वेषणायेतस्ततो भ्राम्यन्ति स्म । तत्रा**ऽवसरः** पञ्चशिखरं वल्मीकं दृष्ट्वाऽन्यान्यपि चत्वारि मित्राणि तददर्शयत् । ततस्ते



सम्भूय तद्वल्मीकस्य पूर्वशिखरं भित्त्वा जलं प्राप्य पीत्वा च सौस्थ्यमापुः ।

ततः **प्रसर** उवाच-"अस्य वल्मीकस्य दक्षिणशिखरोऽपि भेदनीयः, अत्राऽपि किमप्यन्यद् वस्तु लब्धं स्यादेव" । ततो-**ऽवसरः** प्रत्युवाच-"अस्य शिखरस्य भेदनं न युक्तं, सर्पाणां वल्मीकं गृहं भवति, तत्तदुत्थानभयं सम्भाव्यते" । ततः **संवाद** उवाच-"भेदिताच्छिखरात् सर्पानुत्थानात् तद्भयमस्थान एव" । ततो-**ऽवसरः** पुनर्दैवादिह जलमभवदित्युवाच । **कारक**श्च दैवादिह द्रम्मा भवेयुरित्युक्त्वा तत् खनितुमारभत । ततो**ऽवसरो** नेदं मम मतमित्युक्त्वा स्वशकटं जगाम । ततो **भलन** उवाच-"**अवसरो** बाढं यातु, तं विनाऽपि शिखरं खनिष्यामः" ।

ततस्ते सर्वे तं शिखरं चख्नुः । भिन्नाच्च तद्वल्मीकशिखराद् द्रम्मा निर्गताः । ततस्ते**ऽवसरं** विना तान् विभज्य जगृहुः । ततो लोभवशात् ते तृतीयमपि शिखरं खनित्वा रूप्यं प्रापुः । ततस्ते द्रम्मान् विहाय तद्रूप्यं जगृहुः । ततस्ते चतुर्थं नाकुशिखरं भित्त्वा स्वर्णं प्रापुः । रजतं त्यक्त्वा तद् जगृहुश्च । ततः पञ्चमे शिखरे नूनं रत्नानि भविष्यन्तीति बुद्ध्या लोभान्धास्ते तच्छिखरं भेत्तुमारभन्त । भिद्यमानात् तच्छिखराच्च समुद्रात् कालकूट इवोत्थितो दृग्विषः सर्पः पूर्वं सूर्यं दृष्ट्वा पश्चात् तांश्चतुरः शकटवृषभांश्चाऽपि भस्मीचकार । तत्सर्पाधिष्ठात्री देवी च निर्लोभोऽयमित्य**वसरं** सशकटवृषमिष्टं स्थानं प्रापयामास" । तदहं तांश्चतुरो वणिजान् सर्प इव त्वद्गुरुं धक्ष्यामि, सर्पो**ऽवसर**मिव च त्वां त्यक्ष्यामि ।

तच्छ्रुत्वा चाऽऽ**नन्दो** मुनिर्भिक्षामपि विहाय गत्वा प्रभुं **गोशालो**क्तं निवेद्य शङ्कितोऽपृच्छत्-"**गोशाल**स्येदृशी शक्तिरस्ति न

वा ?" ततः प्रभुरुवाच-"जिनान् विहायाऽन्यत्र तस्य तथाकरणे शक्तिरस्ति । जिनानपि च स कुमतिः सन्तापं कर्तुं प्रभवत्येव । तद्गत्वा **गौतमा**दीन् ब्रूहि-यदिहाऽऽगतो **गोशालो** धर्मवचसाऽपि न प्रेरणीयः" । तत **आनन्दो** गत्वा **गौतमा**दीन् तत् कथयामास । **गोशाल**श्च तत्राऽऽगत्य प्रभोरग्रे स्थित्वाऽवदत्-"भोः **काश्यप** ! **गोशालो मङ्खलि**पुत्रो मम शिष्य इति तव सम्भाषितं मिथ्या । यतस्तव शिष्यो **गोशालः** शुक्लजातिको धर्मध्यानस्थो विपद्य देवो जातः । अहं तूपसर्गपरीषहक्षमे तद्देहे निजं कायं परित्यज्य प्रविष्ट **उदाय**नामा मुनिरस्मि । त्वं न मम गुरुर्न वाऽहं **गोशालः** । तन्मामजानं त्वं मिथ्यावागसि" ।

ततः प्रभुरुवाच-"त्वं **गोशाल** एवाऽसि, मिथ्या किमर्थं भाषसे ?" ततः क्रुद्धो **गोशालः** प्रभुमुवाच-"अद्य तव नाशो निश्चितः" । ततः प्रभोः शिष्यः **सर्वानुभूति**रसहिष्णु**र्गोशाल**मुवाच-"गुरुणाऽनेन दीक्षितः शिक्षितश्च किमपलपसि ? त्वं **गोशाल** एवाऽसि" । ततः कुपितो **गोशालः सर्वानुभूत**ये तेजोलेश्यां मुमोच । तेन च दह्यमानोऽपि शुभध्यानस्थः स विपद्य **सहस्रारे** देवो बभूव ।

अथ ततो **गोशालः** स्वलेश्याशक्तिगर्वात् प्रभुं पुनः पुनर्निर्भर्त्सयामास । ततः प्रभुशिष्यमनुशासतं **सुनक्षत्र**मपि **गोशाल**स्तेजोलेश्यया ददाह । सोऽपि चाऽऽलोचनादिपूर्वकं विपद्याऽ**च्युत**कल्पे सुरोऽभवत् ।

ततो विजयगर्वितं **गोशालं वीर**प्रभुः करुणयोवाच-"मया दीक्षितः शिक्षितश्च मामेव निन्दसि, कोऽयं ते मतिविपर्यासः" । प्रभुणैवमुक्तश्चाऽत्यन्तं कुपितो **गोशालो वीर**जिनं प्रति तेजोलेश्याममुचत् । सा तेजोलेश्या च प्रभौ प्रभावहीना भक्त्या प्रदक्षिणापरा प्रभोरङ्गे सन्तापमात्रं विधायाऽकार्यायाऽनेन प्रयुक्ताऽहमिति निवृत्य कोपाद् बलाद् **गोशाल**स्य शरीरे प्राविशत् । तयाऽन्तर्दह्यमानोऽपि च **गोशालो** धृष्टो **वीर**जिनमुवाच-"मत्तेजोलेश्यया सन्तप्तः षण्मासान्ते पित्तज्वराभिभूतोऽवश्यं छद्मस्थोऽपि मृत्युमेष्यसि" ।



ततः प्रभुरुवाच-"**गोशाल** ! त्वद्वचो मिथ्या । यतोऽहं केवल्यपराणि षोडशाब्दानि विहरिष्यामि । प्रत्युत त्वमेव स्वतेजोलेश्यया पित्तज्वरग्रस्तः सप्तदिनान्ते मृत्युमेष्यसि" । अत्राऽन्तरे च **गोशाल**स्तेजोलेश्यापीड्यमानशरीरो विलपन् भूमौ पपात । ततो गुर्वाज्ञाप्रकुपितै**र्गौतमा**दिभिर्निर्भर्त्सितः स्वामिसभातो निष्क्रम्य **हालाहला**कुम्भकार्या आपणं जगाम ।

ततः प्रभुर्मुनीनुवाच-"**गोशाल**स्योग्रेण तपसा साधिता तेजोलेश्या सद्योत्तरान् **वत्सा**दीन् षोडशदेशान् दग्धुं समर्था" । तच्छ्रुत्वा च **गौतमा**दयो विस्मयं गताः । **गोशालक**श्च तेजोलेश्यया दह्यमानो मद्यं तापशान्त्यै पीत्वोन्मत्तवच्चेष्टमानो विरुद्धमसम्बद्धं च जल्पति स्म । शिष्याणां च सशोकं तदुपचारपरायणानां दिनं व्यतीयाय । **गोशालो**पासकश्चाऽ**यंपुल**स्तत्र धर्मजागरं कुर्वाणो निशीथे दध्यौ-"तृणगोपालिका किं संस्थानेति न वेद्मि । तत्सर्वज्ञं स्वगुरुं **गोशालं** गत्वा पृच्छामि" । एवं विचार्य स प्रातर्भूषणान्यादाय **हालाहला**गृहं गतो **गोशालं** तथावस्थं दृष्ट्वा लज्जया निवृत्तो गोशालशिष्यैः स्थविरैर्दृष्ट उक्तश्च-"**अयंपुल** ! तव रात्रौ तृणगोपालिकासंस्थानविषयः संशयो जातः" । तेन विस्मितश्च स एवमेतदित्युवाच ।

ततस्ते **गोशाल**चेष्टितं गोप्तुं पुनरूचुः-''तव गुरोर्गानादिकं कर्म निर्वाणप्राप्तिलिङ्गम्'' । यदि तव संशयस्तर्हि सर्वज्ञममुं तव गुरुं चतुर्विंशमर्हन्तं पृच्छ'' । ततः स उपगन्तुं प्रावर्त्तिष्ट । ते चाऽ**यंपुल**स्याऽऽगमं संशयं च **गोशाल**स्याऽग्रे ऊचुः। तथा मद्यपात्रादिकमपनीय **गोशाल**मासने उपवेशयामासुः । ततो **गोशालो**ऽग्रे समुपविष्ट**मयंपुल**मुवाच-''तृणगोपालिका किं संस्थानेति तव संशयः । सा च वंशीमूलतुल्याकृतिः'' । तच्छुत्वा च प्रसन्नोऽ**यंपुलः** स्वगृहं ययौ ।

अन्यदा च चैतन्यं प्राप्य स्वमृत्युकालं ज्ञात्वा **गोशालः** शिष्यानाहूयोवाच-''मृतस्य मम शरीरं गन्धजलैः स्नपयित्वा विलेपनैरुत्तमैर्विलिप्योत्कृष्टवस्त्रेणाऽऽच्छाद्य दिव्यैर्भूषणैर्भूषयित्वा सहस्रवाह्यां शिबिकामारोप्य सोत्सवं निःसार्यम् । अत्राऽवसर्पिण्यां चतुर्विंशो जिनेश्वरोऽयं **गोशालो** मोक्षं ययाविति पुरे घोषणीयं च''। ते चाऽपि तत् स्वीचक्रुः । ततः सप्तमे दिने **गोशालो** जातनिर्मलाशयः सपश्चात्तापं दध्यौ-''अहो ! अहं पापः । यज्जिनं निजं धर्मगुरुं **वीर**माशातितवान् । आत्मानं सर्वज्ञं ख्यापयंश्च मिथ्योपदेशैर्लोकं प्रतारितवान्'' ।

एवं स्वकृतं बहु दुष्कृतं स्मृत्वाऽऽत्मानं गर्हयित्वा च पश्चात्तापशुद्धाशयः शिष्यानाहूयोवाच-''अहं **मङ्खलि**पुत्रो **गोशालो** **वीर**शिष्यः । नाऽहं केवली न वा सर्वज्ञः । मयेयत्कालं दम्भाल्लोको वञ्चितः । तेजोलेश्यया दह्यमानच्छद्मस्थोऽहं विपत्स्ये । अहं वामपादे रज्जुभिर्बद्ध्वेह नगरे कर्षणीयः । तथाऽयं **मङ्खलि**पुत्रो **गोशालो** दोषनिधानं लोकवञ्चको **वीर**जिनं सर्वज्ञं सर्वहितं मुधैव



दूषयामासेत्येवं घोषणीयम्'' । एवं सशपथं शिष्यानादिश्य पीडया मृतः । तच्छिष्याश्च लज्जया कुलालगृहद्वाराणि पिदधुः । तथा **गोशालो**पदिष्टं सर्वं रज्जुकर्षणघोषणादिकं विधाय तद्वपुर्महत्या समृद्ध्या भस्मसाच्चक्रुः ।

अथ **वीर**जिनो विहारक्रमेण **मेण्ढक**ग्रामं गतः **कोष्टका**ख्योद्याने समवससार । तत्र च समयं प्राप्य **गौतमः** प्रभुमपृच्छत्-''**गोशालः** कां गतिमगमत्'' । ततः प्रभुरुवाच-'सोऽ**च्युतं** गतः'। भूयोऽपि पापात्माऽपि स कथं देवत्वं प्राप्त इति **गौतमे**न पृष्टः प्रभुरुवाच-''पर्यन्तकाले पश्चात्तापयुतस्य देवत्वं सुलभम् । तत एव **गोशालो** देवत्वं गतः'' । 'पुनश्च्युत्वा कां गतिमाप्स्यति ? **गोशालः** कदा च सिद्धिमेष्यती'ति **गौतमे**न पृष्टो **वीर**जिन उवाच-

''**जम्बूद्वीपे भारते विन्ध्य**समीपे **पुण्ड्रेषु** शतद्वारं महापुरं भविष्यति । तत्र **संमुचि**भूपस्य **भद्रा**यां **महापद्म**नामा पुत्रो **गोशाल**जीवो राजा भविष्यति । तस्य द्वौ यक्षश्रेष्ठौ **पूर्णभद्र-मणिभद्रौ** सेनान्यौ भविष्यतः । ततश्च **महापद्म**स्य प्रजा **देवसेन** इति नाम करिष्यन्ति । तथा तस्य चक्रिण इव चतुर्दन्तः श्वेत हेरावत इव हस्ती भविष्यति । तेन च प्रजास्तस्य तद्गजमधिरूढस्य **विमलवाहन** इति नामान्तरं करिष्यन्ति । तस्य चाऽन्यदा पूर्वभवाभ्यस्तमुनिद्वेषतः श्रमणेषु द्वेष उत्पत्स्यते । तेन च स मुनीन् ताडनाद्यैर्बहुधा पीडयिष्यति । तदा पौरसचिवादैरनपराधमुनिनिग्रहो नोचित इति प्रतिबोधितोऽनिच्छन्नपि मुनिपीडनं त्यक्ष्यति ।

अन्यदा च रथारूढः क्रीडोद्यानं गतस्तेजोलेश्यासमृद्धं त्रिज्ञानं कायोत्सर्गस्थितमातापनापरं **सुमङ्गलं** दृष्ट्वा निष्कारणं क्रुद्धो

रथाग्रेणाऽऽहत्य तं पातयिष्यति । मुनिश्चोत्थाय पुनः कायोत्सर्गं करिष्यति । पूर्ववदेव च स तं पुनः पातयिष्यति । तत उत्थाय कायोत्सर्गं प्रपन्नो मुनिरवध्युपयोगेन तत्पूर्वभवान् ज्ञात्वा तांस्तस्मै बोधयिष्यति, निष्कारणमपराधिनं त्वां तेजोलेश्यया धक्ष्यामीति भापयिष्यति च । स च तद्वचसाऽधिकं क्रुद्धः पुनर्मुनिं पातयिष्यति। एवं पुनः पुनरनुष्ठिते मुनिस्तं **महापद्मं** तेजोलेश्यया साश्वरथसारथिं धक्ष्यति ।

मुनिश्च तत्कर्माऽऽलोच्य चिरं व्रतं पालयित्वा पर्यन्ते मासमनशनं चकार । ततो विपद्य **सर्वार्थे** त्रयस्त्रिंशत्सागरोपमायुः सुरो भूत्वा च्युत्वा **महाविदेहे**षूत्पद्य व्रतं गृहीत्वा मोक्षमेष्यति । **महापद्म**श्च दग्धः सप्तमीं नरकावनिं प्राप्योद्वृत्त्य क्रमाद् द्विर्द्विः सर्वेषु नरकेषूत्पद्य तिर्यग्योनिषु च सर्वासु मुहुर्मुहुरुत्पत्याऽन्ते **राजगृह**नगराद् बहिर्वेश्या जाता । सा ततो मृत्वा **विन्ध्य**मूले **उभेले** सन्निवेशे विप्रकन्या भविष्यति । विप्रेण केनाऽपि परिणीता गुर्विणी श्वशुरगृहादागच्छन्ती मार्गे दवाग्निना दग्धाग्निकुमारेषु सुरेषूत्पेदे । ततश्च्युत्वा पुनर्मर्त्यभवान् प्राप्य प्रव्रज्य विपद्य श्रमणातिचार-दोषादसुरेषूत्पद्य पुनर्मनुष्यो जातः । तत्राऽनतिचारं व्रतं पालयित्वा **सौधर्मे** देवो भविष्यति ।

एवं सप्त भवान् यावद् व्रतं पालयित्वा क्रमात् **सर्वार्थं** गत्वा च्युत्वा **विदेहे**षु श्रेष्ठिपुत्रो नाम्ना **दृढप्रतिज्ञो** विरज्य प्रव्रजितः । तत्र सोऽनाप्तकेवलो निजान् गोशालादिभवान् जानन् शिष्यान् स्वानुभवसाक्षिकं सर्वथा गुरुविराधनादिपरिहारमुपदिदेश । ततो महीं विहरन् कर्मक्षयवशात् स **गोशाल**जीवः सिद्धिमेष्यति'' ।



अथ **गौतमो** भूयोऽपि प्रभुमपृच्छत्-''भगवन् ! **गोशालः** केन प्राक्कर्मणा तव विरोधी जातः ?'' ततो **वीर**जिन उवाच-''**जम्बूद्वीपे भारते** पूर्वचतुर्विंशता**वुदायो** नाम जिनोऽभवत् । तस्य मोक्षमहिमानं कर्तुं सुरा-ऽसुराः समाजग्मुः । तान् दृष्ट्वैक आसन्नवास्तव्यो जातिस्मरो जातः । प्रत्येकबुद्धः स तदैव प्रव्रजितः शासनदेवतार्पितलिङ्गस्तीव्रं तपस्तप्यमानो लोकपूज्यो बभूव । तं दृष्ट्वे**श्वरो** नाम कोऽपि दुर्मतिरुपेत्य पप्रच्छ-''त्वं केन दीक्षितः, कुत्र जातः, किं तव कुलं, कुतः सूत्रमर्थं च लब्धवानसि ?'' ततः स मुनिः प्रत्येकबुद्धः सर्वमाख्यत् ।

तत ईश्वरो दध्यौ-''नूनमयं दम्भात् प्रजाः प्रतारयति । तज्जिनं पृच्छामि । यद्वेदृक्षं मां न वदेत्, तद्दीक्षां गृह्णामि'' । एवं ध्यात्वा गत्वा जिनमदृष्ट्वा स मोहगर्भवैराग्यो गणधरस्य पार्श्वे प्रव्रज्यां गृहीतवान् । तदा जिने मोक्षप्राप्ते पर्षद्यासीनो गणभृदुवाच-''य एकमपि पृथिवीजीवं विनाशयति स जैनेन्द्रशासनेऽसंयतः कथितः'' । तत ईश्वरो दध्यौ-''पृथिवीकायिका जीवाः सर्वत्राऽपि विमृद्यन्ते, कस्तान् रक्षितुं समर्थः ? तदुन्मत्तजल्पितकल्पमिदमस्य वाक्यम-श्रद्धेयम् । यद्यसाविदं त्यक्त्वा मध्यमार्गात्मकं किञ्चिदुपदिशति तदा सर्वो लोकोऽनुरक्तः स्यात् । यद्वा मयाऽनुचितं चिन्तितम् । न ह्यहं नाऽनुतिष्ठामीति लोकोऽपि नाऽनुतिष्ठेत् । एतद्धि सर्वज्ञैर्भाषितम्। तदर्हद्वाक्यविराधना मया कृता । अधुना प्रायश्चित्तं ग्राह्यम्'' । एवं विचार्य स प्रत्येकबुद्धं मुनिमुपजगाम ।

तत्राऽपि तद्व्याख्याने ''मुनिः पृथिवीकायादीनां त्रिधाऽपि समारम्भं त्यजेदि''ति श्रुत्वे**श्वरो** दध्यौ-''क एवं कुर्यात् ? अयं मुनिरपि च पृथिव्यामुपविशति भुङ्क्तेऽग्निपक्वं जलं च

पिबति" । तत्स्वयं विरुद्धमाचरन्नयं न साधुवक्ता । तत्स्वयं तं धर्मं वक्ष्यामि, यं जनः सुखमविरतोऽनुष्ठास्यति" । एवं चिन्तयत एव तस्य मस्तके विद्युत् पपात । तेन विपद्य च स सप्तमीं नरकावनिं जगाम ।

तत्र विविधं दुःखमुपभुज्योद्वृत्त्य समुद्रे मत्स्यो भूत्वा पुनर्नरकं प्राप्योद्वृत्त्य काको जातः । ततो विपद्य प्रथमं नरकं प्राप्योद्वृत्त्य पुनः खगो भूत्वा भूयः प्रथमं नरकं प्राप्योद्वृत्त्य षड् भवान् गर्दभो जातः । ततो विपद्य मनुष्यो भूत्वा मृतो वनेचरो मनुष्यो मृत्वा बिडालो भूत्वा विपद्य नरकं जगाम । तत उद्वृत्त्य कुलालो भूत्वा विपद्य कुष्ठीबभूव । पञ्चाशतं वर्षाणि कुष्ठ-कृमिपीडितो विपद्याऽकामनिर्जरावशाद् देवत्वं प्राप । ततश्च्युत्वा नृपो भूत्वा विपद्य सप्तमं नरकं प्राप्योद्वृत्त्य **गोशालो**ऽभवत् । एवं पूर्वभवाभ्यासवशात् स तीर्थकरधर्मसाधूनां विरोधी बभूव । एवं **वीर**जिनवचः श्रुत्वा प्रबुद्धा बहवो जना विरक्ताः प्राव्रजन् । केचन श्रावकत्वं च प्रपेदिरे ।

अथ प्रभु**र्वीर**जिनो **गोशाल**तेजोलेश्यया रक्तातीसारपित्तज्वर-वशात् कृशोऽपि भेषजं न चकार । प्रभोस्तादृग्व्याधिदर्शनाच्च **वीर**जिनो **गोशाल**तेजसा षण्मासाभ्यन्तरे विपत्स्यते इति लोकप्रवाहो जातः । तच्छ्रुत्वा च प्रभोः शिष्यो भक्तः **सिंह** एकान्ते गत्वोच्चै रुरोद । प्रभुश्च केवलेन तज्ज्ञात्वा तमाहूयोवाच-"लोकप्रवादाद् भीतः किं सन्तप्यसे ? तीर्थकरा आपदा न विपद्यन्ते । अत एव सङ्गमादिकृता उपसर्गा मुधा जाताः" ।

ततः **सिंह** उवाच-"प्रभो ! यद्यप्येवं, तथाऽपि भवदापदा सर्वो लोकः संतप्यते, तन्मादृशानां तत्सन्तापशान्त्यै भेषजं गृहाण"।



ततस्तस्योपरोधात् प्रभुरुवाच-श्रेष्ठिभार्यया **रेवत्या** मदर्थं पक्वं कुष्माण्डकटाहं परित्यज्य गृहार्थं पक्वं बीजपूरकटाहं गृहीत्वा समागच्छ । तेन वः सन्तोषयिष्यामि"। ततः **सिंहो** गत्वा तया **रेवत्या** दत्तं कल्प्यं भेषजं गृहीतवान् । तेन च हृष्टैर्देवैस्तत्र स्वर्णवृष्टिः कृता । प्रभुश्च **सिंहा**नीतं भेषजं सेवित्वा शीघ्रमेव शरीरस्वास्थ्यं प्राप ॥ ८ ॥

*इति दशमे पर्वणि ऋषभदत्तदेवानन्दाप्रव्रज्या-*
*जमालि-गोशालकविप्रतिपत्तिविपत्ति-*
*भगवदारोग्यवर्णनात्मकोऽष्टमः सर्गः ॥८॥*

## नवमः सर्गः

अथ यः **सुदंष्ट्रो** नागकुमारो नावमारूढस्य **वीर**प्रभोरुपसर्गान् कृतवानासीत्, स क्वचिद् ग्रामे हालिको बभूव । एकदा च स कृषीवलो हलेन यावद् महीमकृक्षद् तावद् **वीर**जिनस्तं ग्राममाययौ । तथा तस्य हालिकस्य प्रतिबोधाय प्रभुणा प्रेषितो **गौतमो** गत्वोवाच–"किमिदं क्रियते ?" ततः स 'दैवनियोगं कर्म करोमी'ति प्रत्युवाच। ततो **गौतमः** पुनस्तमुवाच–"अनया क्षुद्रवृत्त्या न तव किमपि सौख्यं न वैतत् सुकर्म । नैतेन कर्मणेहैव दुःखं किन्तु भूयः प्राणातिपातानुषङ्गाज्जन्मान्तरेऽप्येतत् कर्म कष्टाय । एतदपेक्षया-ऽत्यल्पमपि धर्मकार्ये कृतं कष्टं सर्वकष्टान्ताय स्यात्" ।

एवं **गौतमे**नोक्तः स तमभिनन्द्य स्वप्रव्रज्येच्छां न्यवेदयत् । **गौतमो**ऽपि च तं प्रबुद्धं ज्ञात्वा दीक्षितवान् । तथा स हालिको **गौतमे**न वर्णितं **वीर**जिनस्य माहात्म्यं श्रुत्वा तस्मिन् भूरिभक्तिमानु-पार्जितबोधिबीजो **गौतम**मनुसरन् प्रभुं प्राप्तवान् । दृष्ट्वा च **वीर**जिनं सिंहादिप्राग्जन्मवैरतः कुपितो **गौतम**मपृच्छत्–'कोऽयं पुरतः स्थितः ?' ततो **गौतमे**न गुरूणामपि गुरु**र्वीर**जिनोऽयमिति कथितोऽत्यन्तमुद्दिप्तो दीक्षया त्वया चाऽप्यलमित्युक्त्वा रजोहरणा-दिकं त्यक्त्वा निजक्षेत्रं गत्वा हलादिकं गृहीतवान् ।

अथ **गौतमो** भगवन्तमपृच्छत्–'त्वय्यप्ययं लोकहिते द्वेषी-त्येतदाश्चर्यम् । त्वां दृष्ट्वैवाऽयं प्रतिपन्नमपि व्रतं त्यक्तवान् । तत्र



को हेतुः ? मय्यसौ भक्तिमान् । अयं मद्गुरुरिति मदुक्तिमात्रेण त्वयि मयि च विप्रीतो जातः" । ततो भगवानुवाच–"मया **त्रिपृष्ठे**न पुराभवे यः सिंहो दारितः, त्वया सारथिना च साम्ना कुप्यन् स शमितः । तदारभ्यैवाऽयं मयि द्वेषी त्वयि प्रीतश्च । तत एवाऽस्य बोधाय त्वामहं प्रेषितवान् ।

प्रभुरेवमुक्त्वा विहृत्य **पोतनं** पुरं गत्वा ततो बहि**र्मनोरमा**-ख्योद्याने समवससार । तत्पुरेश्वरः **प्रसन्नचन्द्रो** नृपश्चाऽऽगत्य वन्दित्वा प्रभोर्देशनां श्रुत्वा प्रबुद्धो भवोद्विग्नो बालमपि पुत्रं राज्ये न्यस्य प्रव्रजितवान् । तथा प्रभुणा सार्धं विहरन् तपस्तप्यमानः स राजर्षिः क्रमाद् गीतार्थो जातः ।

अथ प्रभुस्तेन राजर्षिणाऽन्यैश्च मुनिभिः समन्वितो विहरन् **राजगृहं** जगाम । ततः **श्रेणिक**नृपः पुत्रसमन्वितो महता समृद्ध्या प्रभुं वन्दितुं प्रतस्थे । तस्याऽग्रसैन्ये द्वौ मिथ्यादृष्टी सुमुख-दुर्मुखौ मिथ आलपन्तौ गच्छन्तौ मार्गे एकपादप्रतिष्ठितमूर्ध्वबाहुमातापनापरं **प्रसन्नचन्द्रं** दृष्टवन्तौ । ततः **सुमुखो**ऽवदत्–'मुनेरस्याऽऽतापनापरस्य स्वर्गा-ऽपवर्गौ न दुर्लभौ" । तच्छ्रुत्वा **दुर्मुख** आह–'अयं **पोतने**श्वरः **प्रसन्नचन्द्रो**ऽस्ति । अस्य न धर्मसम्भवो यतोऽनेन वत्सतरो महाशकट इव राज्ये बालः पुत्रो न्यस्तो मन्त्रिभि**श्चम्पे**शेन **दधिवाहन**राजेन मिलित्वा राज्याद् भ्रंशयिष्यते । अनेन राज्यधर्मो लोपितः, अस्य भार्या अपि क्वाऽपि गताः । तदयं पाखण्डिदर्शनानुरागी न दर्शनीयोऽपि" ।

तच्छ्रुत्वा ध्यानाच्चलितः **प्रसन्नचन्द्रो** दध्यौ–"धिक् तान् मन्त्रिणः, ये मया सदा सत्कृता अपि मत्पुत्रस्याऽहितमकार्षुः ।

यद्यद्याऽहं तत्राऽभविष्यं तदा तांश्चार्वशिक्षयिष्यम्" । एवं विकल्पैर्विप्रीतः **प्रसन्नचन्द्रो** व्रतं विस्मृत्य नृपंमन्यो मनसैव मन्त्रिभिर्योद्धुं प्रवृत्तः **श्रेणिके**नाऽऽगत्य वन्दितः । तथा सद्ध्यानवानयमिति ध्यायन् **श्रेणिको** गत्वा प्रभुं नत्वाऽपृच्छत्-"मया यदा **प्रसन्नचन्द्रो** ध्यानस्थो वन्दितस्तदानीं मृतः स कां गतिं गच्छेत्" । सप्तमं नरकं गच्छेदिति प्रभुणोक्तश्च स दध्यौ-"साधोर्न कदाऽपि नरकः, तन्मम श्रवणे त्रुटिः" । अथ क्षणान्तरं स भूयः प्रभुं पप्रच्छ-"अधुना चेत् स **प्रसन्नचन्द्रो** म्रियेत तदा क्व गच्छेत् ?" ततः **सर्वार्थसिद्धं** गच्छेदिति प्रभुः प्रत्युवाच ।

ततः **श्रेणिकः** पुनर्द्विधा किमुत्तरमिति प्रभुं पप्रच्छ । ततो **वीर**जिन उवाच-'ध्यानभेदेन द्विधोत्तरम् । तव वन्दनकाले **दुर्मुख**-वचसा क्रुद्धः **प्रसन्नचन्द्रो** मनसा मन्त्र्याद्यैर्युध्यमानो नरकयोग्य आसीत् त्वय्यत्राऽऽगते च स्वान्यस्त्राणि भग्नानि मत्वा शिरस्त्रेण रिपुं हन्मीति करेण लुञ्चितं मस्तकं स्पृशन् स्मृतव्रतोऽकार्यं मया चिन्तितम् । एवं स्वं निन्दित्वा कृतालोचनप्रतिक्रमणः शुभध्यानं प्राप्तस्तव द्वितीयप्रश्नकाले **सर्वार्थसिद्धि**योग्यो जातः" । तत्राऽन्तरे च **प्रसन्नचन्द्र**समीपे देवदुन्दुभिध्वानद्विगुणितो महान् कोलाहलो बभूव । किमिदमिति **श्रेणिके**न पृष्टश्च प्रभुरुवाच-"ध्यान-विशेषस्थस्य तस्य **प्रसन्नचन्द्र**स्य केवलमुत्पन्नम् । देवास्तत्केवल-महिमानं कुर्वन्ति" ।

❁ ❁ ❁

अथ **श्रेणिकः** प्रभुं पुनः पप्रच्छ-"इह केवलज्ञानं क्व व्युच्छेत्स्यति ?" तदानीमेव च **ब्रह्मलोकेन्द्र** सामानिको देवी-चतुष्टयसहितो **विद्युन्माली** प्रभुं नन्तुं समाजगाम । तं दर्शयन्



प्रभुरुवाच-"अस्मिन्नेव केवलमुच्छेदं यास्यति" । ततो देवेषु केवलं स्यात् किमिति **श्रेणिके**न पुनः पृष्टो **वीर**जिन उवाच-"अयं देवश्च्युत्वा सप्तमे दिने त्वन्नगरवासिन **ऋषभदत्त**श्रेष्ठिनः पुत्रो भविष्यति । अनन्तरं चाऽयं मम शिष्यस्य **सुधर्मणो जम्ब्वाख्यः** शिष्यो भूत्वा केवलं प्राप्स्यति" । ततः **श्रेणिकः** पप्रच्छ-'सन्निहितच्यवनोऽप्यसौ कुतोऽमन्दतेजाः ?" । ततः प्रभुरुवाच-"अधुनाऽयं देवोऽमन्दतेजाः । पुराऽस्य पूर्वपुण्यैरुत्कृष्टं तेजो भवति" । एवमुक्त्वा प्रभुर्धर्मदेशनां चकार ।

अथ तदानीं कश्चित् कुष्टस्तत्राऽऽगत्य नत्वोपविश्य प्रभोः पादौ स्वपूयरसेन चन्दनेनेव निःशङ्कं पूजयामास । तद् दृष्ट्वा कुपितः **श्रेणिको** 'वध्योऽयं पापीयानि'ति दध्यौ । अत्राऽवसरे च जिनेशेन क्षुते म्रियस्वेति **श्रेणिके**न क्षुते च जीवेति चाऽ**भय-कुमारे**ण क्षुते जीव म्रियस्व वेति **कालसौकरिके**ण क्षुते मा जीव मा मृथा इति च स कुष्टिकः प्रोवाच । ततो जिनं प्रति म्रियस्वेति गिरा रुष्टः **श्रेणिकः** स्वान् भटानित उत्थितोऽयं कुष्ठिको ग्राह्य इत्यादिशत् । कुष्ठिकश्च देशनान्ते **वीर**जिनं नत्वोत्थितः **श्रेणिक**-भटैर्भिल्लैः शूकर इव रुद्धः सद्यो दिव्यरूपधरो वियत्युत्पपात । **श्रेणिक**श्च तज्ज्ञात्वा विस्मितः कः स कुष्ठीति प्रभुं द्वितीयदिने पप्रच्छ । ततः प्रभुरुवाच-'स देवः' । ततः **श्रेणिकः** प्रभुं कथमसौ कुष्ठी बभूव, किं कारणमत्रेति पप्रच्छ।

अथ **वीर**प्रभुरुवाच-"विश्वविश्रुतायां **कौशाम्ब्यां** नगर्यां **शतानीको** नृपोऽभूत् । तस्यामेव नगर्यां **सेडुको** नामाऽतिदरिद्रः परममूर्खश्च द्विजोऽभूत् । अन्यदा गर्भिण्या भार्यया प्रसवार्थं घृतानयनाय प्रेरितो द्विजः स उवाच-'मूर्खस्य मम क्वाऽपि कोऽपि

लाभो न सम्भाव्यते" । ततः सोवाच-गत्वा नृपमेव याचस्व, मह्यां हि नृप एव कल्पतरुः" । ततः स द्विजस्तत् प्रतिपद्य रत्नार्थी समुद्रमिव पुष्प-फलादिना नृपं सेवितुं प्रावर्त्तत ।

एकदा च **चम्पेशो**ऽतुलैः सैन्यैः **कौशाम्बीं** समन्ताद् रुरोध। **शतानीक**श्च ससैन्यो बिले सर्प इवाऽवसरं प्रतीक्षमाणो नगर एव तस्थौ । तत**श्चम्पे**शो द्राघीयसा कालेन सैनिकनाशात् प्रावृषि प्रवृत्तायां राजहंस इव स्वाश्रयं प्रस्थितवान् । तदानीं चोद्याने पुष्पार्थं गतः **सेडुक**स्तं क्षीणसेन्यं दृष्ट्वा सत्वरमागत्य **शतानीक**मुवाच- "नष्टदंष्ट्रोऽहिरिव नष्टसैन्यस्तव शत्रुर्याति, अधुनोत्थितेन त्वया स सुनिग्राह्यः" । **शतानीक**श्च तद्वचः साध्विति मत्वा ससैन्यः सर्वाभि-सारेण शरान् वर्षन् नगराद् निर्जगाम । तत**श्चम्पेश**सैनिका भयात् काकनाशं प्रणष्टाः । **चम्पेश**श्चैकाकी कान्दिशीकः पलायितवान् ।

**शतानीक**श्च तद्धस्ति-हय-कोशादि गृहीत्वा हृष्टः **कौशाम्बीं** प्रविश्य तुभ्यं किं ददानीति **सेडुक**मुवाच । स द्विजश्च निजभार्यां पृष्ट्वा याचिष्ये इत्युक्त्वा हृष्टो गत्वा ब्राह्मण्यै सर्वं वृत्तं कथयामास । ततो धीमती सा दध्यौ-"यदि नृपाद् ग्रामादिकान् याचितुं प्रेरयामि तदाऽसौ विभवमत्तोऽपराः स्त्रियः करिष्यति" । एवं विचार्य सा "प्रतिदिनमेकवारं दर्शनमग्रासनभोजनं दीनारो दक्षिणा च याच्यतामि"ति पतिमुवाच । विप्रेण तथा याचितश्च नृपो घटः समुद्रमपि प्राप्य स्वयोग्यं जलमेव गृह्णातीति वदंस्तत् प्रादात् ।

ततः स द्विजः प्रतिदिनं स्वयाचितं सम्मानं च प्राप । नृपमान्यत्वाच्च स लोकैः प्रतिदिनं न्यमन्त्र्यत च । ततः स पूर्वं भुक्तं वमयित्वाऽपि दक्षिणालोभात् प्रतिदिनमनेकवारमभुक्त । तेन च दक्षिणाधनेन स नित्यं वृद्धिमापत् । शाखाभिर्न्यग्रोधपादप इव च



पुत्र-पौत्राद्यैः प्रसृतोऽभूत् । किन्तु प्रतिदिनमपक्वान्नवमनादामानां रसानामूर्ध्वगमनाल्लाक्षया पिप्पल इव दूषितः क्रमात् कुष्ठी जातोऽपि नृपाग्रे प्रत्यहमतृप्ताग्निरिव बुभुजे ।

तदैकदा सचिवा नृपमूचुः-"देव ! कुष्ठ्यसौ जातः, कुष्ठरोगश्च सङ्क्रमणशील इत्यस्येह भोजनं नोचितम् । अस्य कोऽपि नीरोगः पुत्र एवेह भोज्यताम्" । राज्ञि च तत् प्रतिपेदाने सचिवैस्तथोक्तो द्विजः स्वस्थाने पुत्रं स्थापयित्वा स्वयं गृह एव तस्थौ । अनन्तरं च कुष्ठेऽत्यन्तं प्रकुपिते मक्षिकामालाभिरुपद्रुतः स पुत्रैरपि बहिः कुटीरे स्थापितः । तत्र च तं पुत्रवध्वः सजुगुप्सा भोजयितुं जग्मुः। पुत्राश्चाऽपि बहिःस्थितास्तदाज्ञां न मेनिरे । काष्ठपात्रे च तस्य शुन इव भोजनं ददुः ।

ततः **सेडुको** द्विजो दध्यौ-"मयेमे धनाढ्याः कृताः । किन्तु तीर्णजलैर्नौकेवैभिरहमिदानीमनादराद् मुक्तोऽस्मि । मां वचनेनाऽपि न सम्भावयन्ति, किन्तु कटुवाग्भिर्मां रोषयन्त्येव । तद्यथेमे मां जुगुप्सन्ते तथेमेऽपि जुगुप्स्याः स्युरिति मया कर्त्तव्यमि"ति ध्यात्वा पुत्रानुवाच-"अहं जीवितादुद्विग्नोऽस्मि, किन्तु मुमूर्षुभिर्मन्त्रोक्षितः पशुः कुटुम्बस्य देय इति स्वकुलाचारोऽस्ति । तदेकः पशुरानीय-ताम्", ते च पशुवज्जडाः पशुमानिन्युः । ततः स **सेडुकः** पशुं चारयन् स्वाङ्गरसादिसम्पर्कात् तं कुष्ठिनं कृत्वा हत्वा च स्वपुत्रेभ्यो ददौ । ते च मूर्खास्तस्याऽऽशयमविद्वांसस्तं पशुं बुभुजिरे ।

ततः स द्विज आत्मकल्याणार्थं तीर्थं गमिष्यामीति पुत्राना-पृच्छ्योर्ध्वमुखो वनं गतस्तृषार्त्तो जलार्थं चिरं भ्राम्यन् नानाद्रुमावेष्टिते देशे ह्रदं दृष्ट्वा तीरवृक्षपतितपत्राद्यनुगतं ग्रीष्मे माध्यन्दिनार्ककर-क्वथितं जलं पपौ । तृषातुरश्च स यथा भूयो भूयो जलं पपौ तथा

तथा तस्य कृमिभिः सह विरेचनमभूत् । एवं कतिपयैर्दिनैः पीतेन ह्रद्जलेन नीरोगो वसन्तर्तुना वृक्ष इव मनोहरावयवो जातः स द्विजो हृष्टो वलित्वा शीघ्रं स्वगृहं प्रतस्थे । नगरे प्रविशंश्च विस्मितैर्नागरैस्तथा दीप्यमानतनुर्दृष्टः कथं नीरोगो जातोऽसीति पृष्टश्च स द्विजो देवताराधनफलमेतदित्युवाच । स्वगृहं गत्वा च पुत्रान् कुष्ठिनो दृष्ट्वा मुदितो मयाऽपमानफलं साधु प्रापिता इति तानवदत् ।

ततः पुत्रास्तमूचुः-"पितर्विश्वस्तेष्वस्मासु निष्कृपेण शत्रुणेव त्वयेदं किमाचरितम् ?" ततः स लोकैराक्रुश्यमानस्तव पुरमागत्य निराश्रयो द्वारपालं जीविकारथमशिश्रियत् । तदानीं चाऽत्राऽऽगतस्य मम धर्मदेशनां श्रोतुं द्वारपालस्तं द्विजं स्वस्थाने मुक्त्वा प्रचलितः ।

स द्विजश्च द्वारोपविष्टो द्वारदुर्गाग्रे क्षुधार्त्तो यथेष्टं बलिं भुक्त्वाऽन्नदोषाद् ग्रीष्मोष्मणा च मरुपान्थ इव तृष्णयाऽऽकुलीकृतः । द्वारपालभयाच्च स्थानं त्यक्त्वा प्रपादिषु न जगाम । ततस्तृषार्त्तः स जलं जलमित्यारटन् वारिचरान् जीवान् धन्यान् भावयन् विपन्न इहैव नगरद्वारवाप्यां भेको जातः । विहारक्रमाद् मयि पुनरिहाऽऽगते चाऽस्मद्वन्दनार्थं ससम्भ्रमं लोकाः प्रचेलुः । स दर्दुरश्च जलहारिणीमुखादस्मदागमनवृत्तान्तं श्रुत्वा दध्यौ-"अहमेतत् क्वाऽपि श्रुतपूर्वी" । एवमूहापोहं कुर्वतस्तस्य स्वप्नस्मरणवत् तत्क्षणं जातिस्मरणमुत्पन्नम् ।

ततः स भेकः पुनर्दध्यौ-'पुरा मां द्वारे स्थापयित्वा द्वारपालो यं वन्दितुमगात्, स भगवान् पुनरिहाऽऽगतोऽस्ति, तदहमपि तं द्रष्टुं यास्यामि" । ततः सोऽस्मद्वन्दनार्थमुत्प्लुत्योत्प्लुत्य मार्गे समागच्छंस्तवाऽश्वखुरक्षुण्णो विपन्नोऽस्मद्भक्तिभावनयाऽयं **दर्दुराङ्को** देवो जातः । इन्द्रश्च सभायामार्हताः **श्रेणिकाद्** हीना इत्युवाच ।



तदश्रद्दधानश्चाऽयं त्वत्परीक्षार्थमागतो गोशीर्षचन्दनैर्मम चरणौ पूजयंस्त्वदृष्टिमोहनाय सर्वमन्यद् वैक्रियं चकार ।

ततः **श्रेणिकः** प्रभुमुवाच-"प्रभोः क्षुतेऽमङ्गल्यमन्येषां तु मङ्गल्यामङ्गल्यानीत्येवमेष किमभ्यधात् ?" ततः प्रभुरुवाच-"अयं मामवदत्-प्रभो ! किमद्याऽपि भवे तिष्ठसि, शीघ्रं मोक्षं व्रज, म्रियस्व। त्वां च जीवेत्यवोचत्, यतस्तव जीवतः सुखं, विपन्नस्य हि तव नरके गतिः । **अभय**श्च जीवन् धर्ममाचरन् विपन्नो**ऽनुत्तरं** विमानं यास्यति । तेनाऽय**मभय**स्य जीव म्रियस्व वेति जगाद । **कालसौकरिक**श्च जीवन् पापपरायणो मृतः सप्तमं नरकं गमीति तस्य मा जीव मा मृथा इत्युक्तवान्" ।

अथ तच्छ्रुत्वा **श्रेणिको** नत्वा भगवन्तमुवाच-"प्रभो ! त्वद्भक्तस्य मम कथं नरके गतिः ?" ततो **वीर**प्रभुरुवाच-"नृप ! त्वं पुरा बद्धनरकायुरसि । तत्तव गतिस्तत्राऽवश्यं भविष्यति, शुभाऽशुभकर्मफलमवश्यमेव भोक्तव्यम् । वयमपि तद् नाऽन्यथाकर्त्तुमीश्महे। त्वं भाविजिनचतुर्विंशतावाद्यः **पद्मनाभा**भिधो भविष्यसि । तत्खेदं मा गाः" । ततः **श्रेणिक** उवाच-"प्रभो ! नरकतः कोऽपि रक्षोपायोऽस्ति किम्" । ततो भगवानुवाच-'यदि **कपिल**या ब्राह्मण्या साधुभ्यो भक्तिपूर्वकं भिक्षां दापयसे,तथा **कालसौकरिके**ण हिंसां त्याजयसे तदा तव नरकाद् मोक्षो नाऽन्यथा" । तच्छ्रुत्वा स **श्रेणिक**स्तमुपदेशं सम्यगिति हृदि निधाय **वीर**जिनं प्रणम्य स्वस्थानं प्रति प्रतस्थे ।

अत्राऽवसरे च नृपस्य परीक्षार्थं **दर्दुराङ्को** देवः साधुवेषः स्वं धीवरमिवाऽकार्यं कुर्वन्तं दर्शितवान् । नृपश्च तं दृष्ट्वा प्रवचनस्य मालिन्यं मा भूदिति साम्ना तमकार्यतो निवार्य स्वगृहमगात् । ततः

स देवः साध्वीं गर्भवतीं नृपस्य दर्शयामास । नृपश्च शासनभक्तस्तां स्वगृहे जुगोप । ततो देवः प्रत्यक्षीभूय तं नृपं साधु साध्वित्यभिनन्द्य 'गिरिः स्वस्थानादिव सम्यक्त्वाद् न चालितोऽसि । नृप ! शक्रः सभायां यादृशं त्वामवर्णयत् तादृश एव दृष्टोऽसी'त्युक्त्वा दिनेऽपि नक्षत्रश्रेणिवद् विराजमानं हारं गोलकद्वयं च **श्रेणिकाय** दत्त्वा योऽमुं हारं त्रुटितं संधास्यते स मरिष्यतीत्युपदिश्य स्वप्नदृष्ट इवाऽन्तर्दधौ ।

नृपश्च दिव्यं मनोहरं हारं **चेलणायै** गोलकद्वयं च **नन्दायै** प्रादात् । तदा **नन्दा** हाराप्राप्तेः सेर्ष्या तद्गोलकद्वयं स्तम्भे आस्फाल्य स्फोटयामास । तेन चैकस्माद् गोलकाच्चन्द्रयुग्ममिव निर्मलं कुण्डलद्वयं परस्मात् क्षौमद्वयं च निर्गतम् । ततः सानन्दा **नन्दा** तानि दिव्यानि रत्नान्यग्रहीत् ।

अथ नृपः **कपिला**मुवाच-"श्रद्धया साधुभ्यो भिक्षां देहि, तथाकृते च त्वां धनैर्धनाढ्यां करिष्यामि" । ततः **कपिलो**वाच-'त्वं मां सर्वाङ्गं स्वर्णमयीं करोषि हंसि वा तथाऽप्येतत् कुकर्म कर्तुं नाऽहं प्रभवामि" । ततो नृपः **कालसौकरिकं** कथयामास-"प्राणिहिंसां त्यज, तुभ्यं प्रभूतमर्थं दास्यामि, लोभादेव हि त्वं प्राणिहिंसां करोषि" । ततः **कालसौकरिक** उवाच-"प्राणिहिंसा न दोषाय, तया हि बहवो मनुष्या जीवन्ति, तत्तां जातुचिद् न त्यजामि" । ततो नृपः कूपे प्राणिहिंसाव्यापारं कर्त्तुं नाऽयं क्षम इति **कालसौकरिक**-महोरात्रं कूपे क्षिप्त्वाऽधारयत् । तथा **कालसौकरिको**ऽहोरात्रं सूनां त्याजित इति गत्वा **वीराय** भगवते निवेदयामास । ततः सर्वज्ञः प्रभुरुवाच-"नृप ! सोऽन्धकूपेऽपि महिषाणां मृन्मयीं पञ्चशतीं



विधायाऽवधीत्" । ततः **श्रेणिको** गत्वा तत्तथैव दृष्ट्वोद्विग्नः स्वपुराकृतं निनिन्द ।

❋ ❋ ❋

अथ **वीर**प्रभुः सपरिच्छदो विहृत्य **पृष्ठचम्पा**पुरीं जगाम । तत्र च **सालो** नृपस्तद्बन्धुर्युवराजो **महासाल**श्च समुपगम्य **वीर**जिनं प्रणम्य देशनां श्रुत्वा प्रबुद्धौ **यशोमती-पिठरयोः** पुत्रं भागिनेयं **गागलिं** स्वयं राज्येऽभिषिच्य भववासविरक्तो **वीर**जिनपार्श्वे व्रतं जगृहतुः ।

अथ विहरन् प्रभु**र्वीरः** सपरिच्छदः कालान्तरे **चम्पापुरीं** जगाम । तथा ततो **गौतमः** प्रभोरनुज्ञया **साल-महासाल**सहितः **पृष्ठचम्पा**पुरीं ययौ । तत्र च **गागलि**र्नृपो भक्त्या **गौतमं** ववन्दे । तत्पितरावन्ये सचिव-नागरादयश्च **गौतमं** ववन्दिरे । तथा तत्र चतुर्ज्ञान **इन्द्रभूति**र्देवकृते सौवर्णे कमलासने समासीनो धर्मदेशनां चकार ।

तेन प्रतिबुद्धो **गागलिः** पुत्रं राज्ये न्यस्य पितृभ्यां सह **गौतम**गणधरपादान्ते दीक्षां ललौ । ततस्तैस्त्रिभिः **साल-महासाला**भ्यां च समन्वितो **गौतमो** गणभृच्**चम्पा**यां प्रभुं वन्दितुं प्रतस्थे । **गौतम**मनुसरतां च तेषां पञ्चानामपि भावशुद्धिवशात् केवलमुत्पन्नम् । ततस्ते सर्वेऽपि **चम्पां** प्राप्ताः । ते पञ्चाऽपि प्रभुं प्रदक्षिणीचक्रुः । **गौतम**श्च प्रभुं प्रणनाम । ते पञ्चाऽपि तीर्थं नत्वा केवलिपर्षदि प्रचेलुः । ततो **गौतम**स्तान् प्रभुं वन्दध्वमित्युवाच । ततो **वीर**प्रभुरुवाच-"**गौतम** ! केवल्याशातनां मा कृथाः" । ततो **गौतम**स्तान् मिथ्यादुष्कृतपूर्वकमक्षमयत् ।

अथ खिन्नो **गौतमो** दध्यौ-"किं मम केवलं नोत्पत्स्यते ? इह भवे किं न सेत्स्यामि ?" तथा स योऽ**ष्टापदे** जिनान् नत्वा रात्रिं वसेत् सोऽत्रैव भवे सिद्धयेदित्यर्हदुक्तमि'ति सुरोक्तं सस्मार । देवतावचो विश्वासाच्च तदानीमेव स **गौतम**स्तीर्थकृद्वन्दनार्थ**मष्टापदं** गन्तुमैच्छत् । प्रभुश्च सर्वज्ञस्तदाशयं विज्ञायाऽ**ष्टापदे**ऽर्हद्वन्दनाय **गौतम**मादिदेश । स्वमनोरथानुरूपां प्रभोराज्ञां प्राप्य **गौतमो** मुदितश्चारणलब्ध्या वायुवत् क्षणादेवाऽ**ष्टापदं** जगाम ।

इतश्च तपस्विनोऽ**ष्टापदं** मोक्षसाधकं श्रुत्वा तदारोढुं **कौण्डिन्य-दत्त-शेवालाः** समुपस्थिताः । तेष्वाद्यः सदा चतुर्थकृदार्द्रकन्दादिपारणकृच्च तपस्विनां पञ्चशत्या सार्धमाद्यां मेखलां प्राप । द्वितीयश्च शुष्ककन्दादिपारणेन षष्ठकृत् तपस्विनां पञ्चशत्या सार्धं द्वितीयां मेखलां प्राप । तृतीयश्च शुष्कशेवालपारणेनाऽष्टमकृत् तपस्विनां पञ्चशत्या सह तृतीयां मेखलां प्राप । तत ऊर्ध्वमारोढुमक्षमास्ते यावदुन्मुखास्तस्थुस्तावद् **गौतमं** पुष्टगात्रं सुवर्णकान्ति ददृशुः । ततस्ते परस्परमूचुः-"वयं कृशा अप्येतं गिरिमारोढुं न क्षमाः, अयं स्थूलगात्रः कथमारोक्ष्यति ?" एवं वदत्सु तेषु **गौतम**स्तं महागिरिं समारुरोह, देव इव च क्षणाददृश्यो जातः ।

ततस्ते तपस्विनः पुनरूचुः-"अस्य मुनेः काऽपि शक्तिरस्ति, तद्यद्यसावागमिष्यति तदा वयं तस्य शिष्यीभविष्यामः" । एवं विचार्य ते तापसास्तं प्रत्यागच्छन्तं सौत्सुक्यं प्रतीक्षमाणास्तस्थुः । **गौतम**श्च **भरत**चक्रिनिर्मितं चैत्यं गत्वा चतुर्विंशतिं जिनबिम्बान्यन्यबिम्बानि च परया भक्त्या ववन्दे । ततो निर्गत्य चाऽशोकतरुतले सुरा-ऽसुरैर्वन्द्यमानो **गौतम** उपविश्य धर्मदेशनां चकार । संशयच्छेदाच्च तैरयं केवलीति तर्कितश्च । देशनां कुर्वंश्च स



प्रसङ्गादुवाच-"अस्थिचर्मावशेषा दुःखभाजो ब्रुवन्तोऽपि जीवसद्भावाद् गमनशीला उग्रतपस्विनः साधवो भवन्ति" । तच्छ्रुत्वा च **वैश्रवणो गौतम**स्य स्थौल्यं निरूपयन् स्वस्मिन् विसंवादि वागसाविति स्मितं चकार । ततो मनःपर्ययज्ञा**नीन्द्रभूति**स्तद्भावं ज्ञात्वोवाच-"तपस्विनो नाऽङ्गकृशता प्रमाणं, किन्तु ध्याननिग्रह एव" ।

तथाहि-**जम्बूद्वीपे महाविदेहे पुष्कलावत्यां** विजये **पुण्डरीकिणी**नगर्यां **महापद्मो** नृपो बभूव । तस्य च **पद्मावत्यां** भार्यायां **पुण्डरीक-कण्डरीकौ** पुत्रौ बभूवतुः । एकदा च **नलिनवना**ख्ये उपवने समागतानां साधूनां समीपे **महापद्म**नृपो धर्मदेशनां श्रुत्वा प्रतिबुद्धो राज्ये **पुण्डरीकं** न्यस्य व्रतमग्रहीत् । केवले उत्पन्ने च कर्मक्षयाद् मोक्षमाप च ।

अथाऽन्यदा ते साधवः **पुण्डरीकिण्यां** पुनराययुः । तौ **पुण्डरीक-कण्डरीकौ** च धर्मदेशनां शुश्रुवतुः । तत्र **पुण्डरीकः** प्रबुद्धो भावयतिर्भूत्वा गृहं गत्वा मन्त्रिणां समक्षं **कण्डरीक**मुवाच-"त्वं पैतृकं राज्यं गृहाण, अहं भवोद्विग्नो दीक्षां ग्रहीष्यामि" । ततः **कण्डरीक** उवाच-"किं मां भवे पातयसि, अहं भवोच्छेदाय प्रव्रजिष्यामि" ।

ततो नृपेण पुनः पुनः साग्रहमुक्तोऽपि राज्यमस्वीकुर्वन् **कण्डरीको** व्रतायाऽनुज्ञातः । तथा नृपः **कण्डरीक**मुवाच-"इन्द्रियाणि दुर्निग्रहाणि, मनश्च सदा चञ्चलं, यौवनं च विकारास्पदम् । नराणां प्रमादश्च सहजः, परीषहोपसर्गाश्च दुःसहाः, प्रव्रज्या च दुष्करा । तत्त्वया दृढप्रतिज्ञेन भाव्यम् । अथवा श्रावकधर्मं गृहीत्वा राज्यं कुरु, यौवने गते प्रव्रजिष्यसि" । ततश्च **कण्डरीक**

उवाच-"भवदुक्तं सत्यं, तथाऽपि प्रतिज्ञातं पालनीयमिति निश्चितं प्रव्रजिष्यामि" । ततश्च **कण्डरीकः** प्राव्राजीत्। **पुण्डरीकश्च** सचिवैर्निवारितो भावयतिर्गृहे तस्थौ ।

अथ **कण्डरीको** विविधतपःपरायणः कृशाङ्गः सामाचारी-पालनात् साधूनां प्रियो जातः । अन्यदा च वसन्तर्तौ विजृम्भमाणे चारित्रावरणोदयाद् मुनेः **कण्डरीकस्य** मनः क्षुब्धं जातम् । ततः स दध्यौ-"ममाऽनया प्रव्रज्ययाऽलं, तद्गत्वा पुराऽपि भ्रात्रा दत्तं राज्यं ग्रहीष्यामि" । एवं विचार्य **पुण्डरीकिणीं** गत्वोद्याने तरुतले शाखायां पात्रादिकं लम्बयित्वा हरिततृणशय्यायामलुठत् । वनपालेन च स्वं नृपाय ज्ञापयामास ।

नृपश्च ससचिवस्तत्राऽऽगत्य तमवन्दत । तथा तं वृक्षबद्धोप-करणं हरितस्त्रस्तरस्थं व्रतनिर्विण्णमनुमाय नृप उवाच-"भोः सर्वे ! स्मरथ किम् ? यत् तदाऽयं बालो रभसाद्दीक्षां जिघृक्षुर्मया वारितः"। एवमुक्त्वा स **कण्डरीकं** राज्ये निवेश्य राज्यचिह्नानि दत्त्वा **पुण्डरीको** यतिलिङ्गमुपादाय स्वयं प्रव्रज्य शुद्धमना विजहार ।

अथ **कण्डरीको** भग्नव्रतो रङ्क इवाऽन्नार्थी कृश इति सेवकैर्हस्यमानो मनसि नितान्तं चुकोप । तथा प्रथमं भुक्त्वा पश्चादेषां प्रहासिनां वधादि करिष्यामीति विचारयन् गृहं गत्वा यदृच्छया जघन्य-मध्यमोत्कृष्टान् त्रिधाऽऽहारानाकण्ठं भुक्तवान् । रात्रौ भोगजागरणाद् दुर्जराहाराच्च तस्य विषूचिकोत्पन्ना, महत्यप्रीतिश्च मनसि जाता । तथा तस्य भस्त्रेव वायुपूरितमुदरमुत्फुल्लम्, पवनो निरुद्धः, तृष्णादाहश्च ववृधे । नियोगिभिश्च भ्रष्टप्रतिज्ञोऽसाविति विचार्य न तस्य चिकित्सा कारिता । ततः पीडितः स दध्यौ-"यदि कथञ्चिदिमां रात्रिमतिवाहयामि तदा प्रभाते सर्वानमून् नियोगिनः



सकुटुम्बान् हनिष्यामि" । एवं कृष्णलेश्यावान् रौद्रध्यानी स मृतः सप्तमं नरकं ययौ ।

अथ **पुण्डरीको** लब्धं व्रतं गुरुसाक्षिकं करोमीति ध्यात्वा सद्गुरुं प्रति प्रतस्थे । सुगुरोः समीपं गत्वा च व्रतं पुनरादाया-ऽष्टमस्याऽन्ते पारणां चकार । तथा स वेलातिक्रमेण कृतैः शीत-रूक्षाहारैः पीडितः सुकुमारतनुर्भुवि चलनेन रक्ताक्तचरणो जातश्रमो ग्रामे भिक्षित्वोपाश्रये तृणसंस्तरे उपविष्टः । ततस्स कदा गुरुपार्श्वे प्रव्रजिष्यामीति चिन्तयन् शुभध्यानपरायणः स्थूलतनुरपि विपद्य **सर्वार्थसिद्धं** जगाम ।

तस्मात् स्थूलत्वं कृशाङ्गत्वं वा न तपस्वित्वे प्रमाणम् । यतः शुभध्यानमेव मोक्षसाधनम् । एतदर्थं च कुबेरसामानिकदेव एकनिष्ठया **गौतमो**क्तं **पुण्डरीका**ध्ययनं जग्राह । तथा स सुरः सम्यक्त्वं प्रतिपद्य स्वाभिप्रायज्ञं **गौतमं** नत्वा प्रसन्नः स्वं धाम ययौ।

अथ **गौतमस्वामी** तत्र तां रात्रिमतिवाह्य प्रातः पर्वतादवत-रंस्तैस्तापसैर्दृष्टः । तापसाश्च तं प्रणम्योचुः-"महात्मन् । वयं तव शिष्यीभविष्यामः, त्वमस्माकं गुरुर्भव" । ततो **गौतम**स्तानुवाच-"मम गुरुः सर्वज्ञो **वीर**जिन एव भवतां गुरुरस्तु" । तथा-ऽप्याग्रहपरांस्तान् **गौतमो** दीक्षयामास । देवता च तेषां यतिलिङ्ग-मर्पितवती । ततस्ते **गौतमे**न सह प्रभोः समीपं गन्तुं प्रतस्थिरे । मार्गे चैकस्मिन् ग्रामे भिक्षाकाले **गौतम**स्तान् वः पारणार्थं किमानयामीति पप्रच्छ । तैश्च पायसमित्युक्ते गौतमो लब्ध्या स्वोदरपूरणमात्रं पायसं पात्रे कृत्वाऽऽनीय तानुवाच-"मुनयः ! उपविशन्तु, अनेन पायसेन यूयं सर्वे पारणं कुरुत" । ते सर्वे चाऽल्पं पायसं दृष्ट्वाऽपि गुरुश्रद्धयोपविविशुः ।

ततो **गौतम**स्तान् महानसलब्ध्या सर्वानेव भोजयामास । पश्चाच्च स्वयमपि भुक्तवान्। तेन ते विस्मिता बभूवुः । ततस्तेषां भोजनं कुर्वतां मुनीनां तापसानां शेवालभक्षिणां दिष्ट्याऽस्माभि**र्वीरो** धर्मगुरुः पितृकल्प एष मुनिर्दुर्लभो बोधश्च प्राप्तः, सर्वथा वयं कृतकृत्याः स्मः" । एवं शुभभावनावतां शीघ्रमेव केवलमुत्पन्नम् । तथा प्रातिहार्याणि श्री**वीर**जिनं चाऽवलोकमानानां दत्तादीनां कौण्डिन्यादीनां चाऽमलं केवलं जज्ञे । ततस्ते प्रभुं प्रदक्षिणीकृत्य केवलिपर्षदं जग्मुः । **गौतम**श्च प्रभुं वन्दध्वमिति तानुवाच । ततः प्रभुरुवाच-"केवल्याशातनां मा कार्षीः" । ततो **गौतमो** मिथ्यादुष्कृतपूर्वं तान् क्षमयामास ।

तथा पुनः स **गौतमो** दध्यौ-"गुरुकर्माऽहमत्र भवे न सेत्स्यामि, एते मम शिष्या धन्याः, येषां केवलमुत्पन्नम्" । एवं चिन्तयन्तं **गौतमं** प्रभुरुवाच-"**गौतम** ! सुराणां वचः सत्यं जिनानां वा ?" ततो जिनानामिति **गौतमे**नोक्ते प्रभुरुवाच-"ततोऽसन्तोषं मा कार्षीः, शिष्याणां गुरुषु तृणद्विदलचर्मोर्णाकटतुल्याः स्नेहा भवन्ति । तत्र तवाऽस्मासु चिरसम्पर्काद् दृढतर उर्णाकटतुल्यः स्नेहः, तेन तव केवलं रुद्धमस्ति । तादृशस्नेहाभावे सति तव केवलं भविष्यति" । तथा प्रभु**र्गौतम**स्य प्रबोधायाऽन्येषामनुशासनाय च द्रुमपत्रीयाध्ययनं व्याचख्यौ ।

❀ ❀ ❀

अथ तस्मिन्नवसरे प्रभोरुपासकः परिव्राजको**ऽम्बड**श्छत्र-त्रिदण्डधरस्तत्राऽऽगत्य प्रभुं त्रिः प्रदक्षिणीकृत्य प्रणम्य पुलकिततनुरञ्जलिं विदधे । ततो भक्त्या स्तुत्वा यथास्थानमुपविश्य च देशनां श्रुत्वाऽन्ते प्रभुं पुनर्नत्वा **राजगृहं** प्रति प्रतिष्ठमानः



प्रभुणोक्तः-"तत्र **राजगृहे नागरथि**पत्न्याः **सुलसा**या अस्मदाज्ञया प्रवृत्तिं पृच्छेः" । सो**ऽम्बड**श्चेच्छामीत्युक्त्वाऽऽकाशमार्गेण **राजगृहं** गत्वा **सुलसा**या गृहद्वारे स्थित्वा दध्यौ-सुरेन्द्रादीनामवलोकमानानां सतां प्रभुः किमिति **सुलसा**पक्षपाती, तत्परीक्षणं करिष्ये" ।

एवं विचार्य सो**ऽम्बडो** वैक्रियलब्ध्या रूपान्तरं कृत्वा **सुलसा**गृहे प्रविश्य भिक्षां ययाचे । सा च पात्राय साधवे भिक्षां ददामीति कृतप्रतिज्ञा याचमानायाऽपि तस्मै भिक्षां न ददौ । ततः स नगराद् निर्गत्य गोपुरस्याऽग्रे ब्रह्मणो रूपं विकृत्य समाहितः स्थितो धर्मदेशनया नागराणां मनो जहार । **सुलसा** च बहिः स्वयं ब्रह्माऽस्तीति सखीभिराकारिताऽपि न ययौ । ततो द्वितीयदिने-**ऽम्बडो** विष्णुरूपं विकृत्य दक्षिणस्यां स्थितवान् । तत्राऽपि सम्यग्दृष्टिः सा **सुलसा** न जगाम । तृतीयदिने चा**ऽम्बडः** पश्चिमायां गौरीसहितं शिवरूपं विकृत्य धर्मदेशनया पौराणां मनोऽहार्षीत् । किन्तु **सुलसा** द्रष्टुमपि नाऽऽजगाम ।

चतुर्थदिवसे च सो**ऽम्बडः** उत्तरस्यां समवसरणं विकृत्य तत्र जिनीभूय स्थितवान् । पौराश्च तत्राऽऽगत्य धर्मदेशनामश्रौषुः, तथा-ऽप्यनागतां **सुलसां** क्षोभयितुं स कञ्चित्पुरुषं प्रैषीत् । स च गत्वा तामुवाच-"**सुलसे** ! जिनेश्वरः समवसृतोऽस्ति, तत्तं वन्दितुं किं चिरयसि ?" ततः **सुलसा** तमुवाच-"नाऽयं जिनः, श्री**वीर**प्रभुश्चरमो जिनः" । ततः स तां प्रत्युवाच-"मुग्धे ! अयं पञ्चविंशस्तीर्थ-करोऽस्ति, तत्प्रत्यक्षं पश्य" । ततः **सुलसो**वाच-"न पञ्चविंशो जिनः कदाऽपि भवति, अयं तु भिक्षुको मिथ्यामतिर्लोकान् वञ्चयते" । ततः स पुमानुवाच-"भद्रे ! भेदं मा कार्षीः, शासनस्य प्रभावना भवति, तदेहि, न ह्यनेन तव काऽपि हानिः"।

ततः **सुलसा** पुनरुवाच-असत्यप्रकारेण शासनस्य न प्रभावना किन्त्वप्रभावनैव भवति" । ततोऽ**म्बड**स्तां सर्वथा स्थिरां बुद्ध्वा सञ्जातविश्वासो दध्यौ-"प्रभुः सभायामिमां यत् सम्भावितवान्, तद् युक्तम् । यतो मया माययाऽपीयं सम्यक्त्वाद् न चालिता" । ततः स सर्वं प्रपञ्चं संहृत्य स्वेन रूपेणैव नैषेधिकीं वदन् **सुलसा**गृहं प्राविशत् । **सुलसा** चाऽभ्युत्थाय स्वागतं व्याहृत्य पादौ वत्सला मातेव प्रक्षाल्य निजानि गृहचैत्यानि तं वन्दयामास । सोऽ**म्बड**श्च तच्चैत्यानि वन्दित्वा **सुलसा**मुवाच-"त्वं मम वाचा नित्याऽनित्यानि चैत्यानि वन्दस्व" । ततः सा तथैव चकार ।

ततः सोऽ**म्बडः** पुनः **सुलसा**मुवाच-"त्वं पुण्यशालिन्यसि, यस्या वार्तां **वीर**प्रभुर्मन्मुखेन पृच्छति" । तदाकर्ण्य च मुदिता सा प्रभुं वन्दित्वा पुलकिताङ्गा तुष्टाव । ततश्चतुरोऽ**म्बडः** पुनस्तां परीक्षितुमुवाच-"ब्रह्मादयोऽत्राऽऽगत्य धर्मं व्याचख्युः । तान् वन्दितुं च पौरा जग्मुर्धर्मं च शुश्रुवुः । त्वं कुतूहलेनाऽपि किं न गतवती ?"

ततः **सुलसो**वाच-"महाभाग् ! तान् जानन्नपि किमन्य इवैवं वदसि । के ब्रह्माद्याः ? ते हि हिंसका दारादिपरिग्रहपराश्च स्वयमधर्मपरायणाः कं धर्मं देक्ष्यन्ति । **वीर**जिनमाप्तं दृष्ट्वा तदुक्तधर्मं प्रतिपद्य च कस्तान् द्रष्टुमप्युत्सहेत" । ततोऽ**म्बडः** साधु साध्विति वदन् प्रमुदितः स्वं धाम जगाम । **सुलसा**ऽपि च जैनमनिन्द्यमुत्कृष्टं धर्मं सदा हृदि धारयामास ॥ ९ ॥

*इति दशमे पर्वणि हालिक-प्रसन्नचन्द्र-दर्दुराङ्कदेव-*
*श्रेणिकभावितीर्थकरत्व-सालमहासाल-गौतमाष्टापदारोहण-*
*अम्बड-सुलसाचरितवर्णनात्मको नवमः सर्गः ॥९॥*

## दशमः सर्गः

अथ **वीर**प्रभुश्च**म्पा**पुर्या विहृत्य सुरादिभिः सेवितो **दशार्ण**देशं प्राप । तत्र **दशार्ण**पुराख्ये नगरे **दशार्णभद्रो** नाम महर्द्धिको नृप आसीत् । सभास्थितं तं च चराः सायमेत्य "**वीर**जिनः प्रातरत्र समेष्यतीत्युवाच । राजा च तच्छ्रुत्वा हर्षपुलकिततनुः सभासमक्षं प्रातर्महत्या समृद्ध्या प्रभुं वन्दिष्ये इत्युक्त्वा सचिवादीन् सर्वान् विसृज्याऽन्तःपुरं जगाम । तत्र च प्रातरेवं प्रभुं वन्दिष्ये स्तोष्ये चेति चिन्तयन् कथमपि तां रात्रिं निनाय । प्रातरनुदित एव सूर्ये च नृपो नगराध्यक्षादीनाहूयाऽऽदिशत्–'मद्गृह–प्रभुसमवसरणयोर्मध्ये मद्-गमनयोग्यं सर्वसमृद्ध्या मार्गमण्डनं विधेयम्" ।

इतश्च **वीर**जिनो नगराद् बहिरागतवान् । देवैश्च समवसरणं विकृतम् । नृपस्य तदाज्ञां च राजपुरुषाः सद्य एव चक्रुः । गन्धा-म्बुसिक्तं तोरणमञ्चादिसमन्वितं वितानाद्यावृतं मार्गमभूतपूर्वमिव विधाय च राजपुरुषा नृपाय तद् निवेदयामासुः । राजा च स्नानादि-पूर्वकं शुचिवेषं समलङ्कृतं विधाय गजमारुह्य श्वेतच्छत्रचामरै-र्विराजमानः सहस्रशः सामन्ताद्यैः परिवृतोऽन्तःपुरसहितो बन्दिभिः स्तूयमानः प्रस्थाय क्रमेण समवसरणं प्राप । ततः त्रिःप्रदक्षिणीकृत्य प्रभुं वन्दित्वा यथास्थानमुपविवेश ।

इतस्तस्य समृद्धिगर्वं विज्ञाय तत्प्रबोधार्थं शक्रो जलमयं **जलकान्त**विमानं कल्पद्रुमादिमनोहरं विचक्रे । ततो देवैः सह तदारुह्य सुरस्त्रीभिः सामानिकादिदेवैश्च समन्वितः समवसरणमागत्य **वीर**जिनं भक्त्या ववन्दे । **दशार्णभद्र**श्च शक्रस्य तामृद्धिं दृष्ट्वा नागरद्धर्या ग्राम्य इव स्तम्भितो विस्मितो दध्यौ–"अहो शक्रविमान-स्येयमलौकिकी शोभा, शक्रहस्तिनश्च शुचिवपुष्टमाश्चर्यम् । इन्द्रस्य लोकोत्तरो विभवविस्तारः। मया स्वसम्पदो मुधैवाऽभिमानो व्यधायि । मां धिक्, मम शक्रस्य च गोष्पदसमुद्रयोरिवा-ऽन्तरमस्ति" । एवं भावयतः क्रमाद् वैराग्यं गच्छतश्च तस्य नृपस्या-ऽल्पकर्मणः शुभतरः परिणामो बभूव ।

ततो विवेकी स नृपो 'न केवलं व्रतग्रहणेन शक्रं विजेष्ये किन्तु भवहेतून् कर्मरिपूनपी'ति ध्यात्वा **दशार्णभद्र**स्तत्रस्थ एव किरीटादिकं त्यक्त्वा कर्मद्रुममूलानीव पञ्चभिर्मुष्टिभिः शिरसः केशान् लुञ्चयामास । विस्मिते शक्रे पश्यत्येव च स गणधरसमीपं गत्वा यतिलिङ्गमुपादाय प्रभुसमीपं गत्वा प्रदक्षिणापूर्वकं ववन्दे । ततः शक्र उवाच– "महानुभाव ! तवाऽऽश्चर्यं पौरुषम्, अनेन प्रकारेण हि त्वं मामप्यजैषीः" । एवमुक्त्वा चेन्द्रस्तं नमस्कृत्य स्वं धाम जगाम। मुनि**र्दशार्णभद्र**श्च व्रतं सम्यक् पालयामास । **वीर**जिनोऽपि ततोऽन्यत्र विजहार ।

❀ ❀ ❀

इतश्च **राजगृह**स्य **शालि**ग्रामे **धन्या** नाम काचित् स्त्री विनष्टवंशाऽऽसीत् । सा च **सङ्गमकं** नाम कुक्षिजं बालं पुत्रं सहाऽऽनयामास। स च बालो नागराणां वत्सान् चारयामास ।



अन्यदा चोत्सवे प्रवृत्ते **सङ्गमो** गृहे गृहे पायसं भुज्यमानं दृष्ट्वा स्वगृहं गत्वा स्वमातरं पायसे ययाचे । सा च दरिद्रा पायसाभावादज्ञतया बालेन पुनः पुनर्याच्यमाना च पूर्वविभवं स्मृत्वोच्चै रुरोद । तस्या रुदितेन दुःखिताः प्रतिवेश्मिन्य आगत्य दुःखकारणं पप्रच्छुः । दुःखकारणं ज्ञात्वा च तास्तस्यै दुग्धादिकं ददुः । ततः सा पायसं कृत्वा तेन घृतादिभिश्च स्थालं भृत्वा बालस्याऽर्पित्वा केनाऽपि कार्येण गृहान्तर्जगाम ।

अत्राऽवसरे च कृतमासोपवासः कोऽपि मुनिः पारणार्थं समागतः । ततः स बालो दध्यौ–"अयं जङ्गमः कल्पद्रुमः, तन्मद्भाग्यादेवाऽत्र समागतः । एवं विचार्य स स्थालमुत्थाप्य पायसं साधवे ददौ । मुनिस्तु तदनुग्रहाय तदादाय गतवान् । **धन्या**ऽपि च गेहाद् निर्गत्य पायसमनेन भुक्तमिति मत्वा पुनस्तद् ददौ । ततः स तत् पायसमतृप्तः सन्नाकण्ठं भुक्तवान् । तदजीर्णेन च रात्रौ साधुं स्मरन् विपद्य तद्दानप्रभावेण **राजगृहे गोभद्र**श्रेष्ठिनो भार्याया **भद्रा**या उदरे जातः । सा च स्वप्ने सुनिष्पन्नं शालिक्षेत्रं दृष्ट्वा पत्युः कथयामास । स च पुत्रस्ते भवितेति तत्फलं कथितवान् । ततस्तस्या दानधर्मादिकर्मदोहदं स **गोभद्रः** पूरयामास । पूर्णे समये च सा **भद्रा** कान्तिप्रसादितदिशं पुत्रमसूत । ततः पितरौ तस्य शुभे दिने दृष्टस्वप्नानुसारेण **शालिभद्र** इति नाम चक्रतुः ।

स बालश्च पञ्चभिर्धात्रीभिः पाल्यमानः क्रमाद् वर्धमानः किञ्चिद् न्यूनाष्टवर्ष एव पित्रा कलाकलापकुशलः कृतः । यौवनं प्राप्य च स सवयोभिर्विविधं रेमे । तन्नगरश्रेष्ठिनश्चाऽऽगत्य निजा द्वात्रिंशतं कन्याः **शालिभद्रा**य प्रदातुं **गोभद्रं** प्रार्थयामासुः । ततो मुदितो **गोभद्रः शालिभद्रे**ण ताः सम्पूर्णलक्षणाः कन्याः

परिणायितवान् । **शालिभद्र**श्च ताभी रम्ये विमाने देवेन्द्र इव गृहे स्वैरं रेमे । स आनन्दमग्नो दिवसं रात्रिं वा न विवेद । तस्य पितरौ स्वयं भोगसामग्रीं पूरयामासतुः ।

अथ **गोभद्रः** श्री**वीर**जिनपार्श्वे व्रतं गृहीत्वा विधिपूर्वकमनशनं विधाय च देवलोकं गतो निजात्मजं **शालिभद्र**मवधिज्ञानतो ज्ञात्वा तत्पुण्यैराकृष्टः पुत्रवात्सल्यवान् विचित्राणि दिव्यवस्त्रादीनि प्रतिदिनं कल्पद्रुम इव सभार्यस्य पुत्रस्याऽर्पयामास । **भद्रा** च व्यवहारोचितं सर्वं कार्यं चकार । पूर्वदानप्रभावेण भोगानभुक्त च ।

अन्यदा केचिद् वणिजो रत्नकम्बलानादाय नृपं भेजुः । **श्रेणिक**नृपश्च महार्घत्वेन तान्नाऽग्रहीत् । ततस्ते **शालिभद्र**गृहं जग्मुः । **भद्रा** च तदुक्तमूल्येन तान् रत्नकम्बलानग्रहीत् । तदानीं च **चेलणा**देव्या मद्योग्य एकः कम्बलो महामूल्येनाऽपि गृह्यतामित्युक्तः **श्रेणिको** नृप एकं कम्बलं मूल्येन मम देहीति वणिजो जगाद । ततस्ते **भद्रा** तान् सर्वान् कम्बलानग्रहीदित्यूचुः । ततः **श्रेणिक** एकं पुरुषं मूल्येन कम्बलग्रहणार्थं **भद्रा**पार्श्वे प्रैषीत् । तेन प्रार्थिता च **भद्रो**वाच-"ते कम्बलाः फालयित्वा मया **शालिभद्र**पत्नीपादप्रोञ्छनीकृताः । तद्यदि जीर्णैः कम्बलैः कार्यमस्ति तर्हि गत्वा नृपं पृष्ट्वाऽऽगत्य गृहाण" । ततः स पुरुषो गत्वा नृपाय सर्वमाख्यत् ।

तत**श्चेलणो**वाच-"अस्माकं वणिजां च पित्तल-सुवर्णयोरिवाऽन्तरं पश्य" । ततः **श्रेणिके**न तं पुरुषमेव प्रेष्याऽऽहूते **शालिभद्रे भद्रा** समेत्य विज्ञापयामास-"मम पुत्रो बहिर्न कदाऽपि याति, तन्मद्गृहागमनेन मामनुगृहाण" । **श्रेणिक**श्च कौतुकात् तत् प्रतिपन्नवान् । **भद्रा** च तं क्षणं प्रतीक्ष्याऽग्रे भूत्वा गृहं गत्वा स्वगृहाद् राजप्रासादावधि रत्नैर्वस्त्रैश्चित्रचर्मभिश्च प्रासादशोभां चकार । ततस्तया-



ऽऽकारितो नृपो देवैः कृतामिव हट्टशोभां पश्यन् **शालिभद्र**भवनं भुवि दिव्यविमानमिव स्थितं प्राप्य विस्मितः प्रविश्य च चतुर्थ्यां भूमौ सिंहासने उपविष्टवान् ।

ततो **भद्रा** सप्तम्यां भूमौ गत्वाऽत्राऽऽगतं **श्रेणिकं** द्रष्टुं क्षणमेहीति **शालिभद्र**मुवाच । ततः स **भद्रा**मुवाच-"मातर्यत् त्वं वेत्सि तत् सर्वं कारय, मया तत्र किं कर्त्तव्यम् ?" ततो **भद्रो**वाच-"नृपो न क्रेतव्यं वस्तु, किन्तु जनानामिव युष्माकमपि स्वामी सः"। तच्छ्रुत्वा **शालिभद्रो** विषण्णो दध्यौ-"सांसारिकमैश्वर्यं धिक्, यद् ममाऽपि कोऽपि स्वामी । तत्सर्पैरिवैभिर्भोगैरलम् । शीघ्रमेव **वीर**जिनपार्श्वे दीक्षां ग्रहीष्यामि" । एवं संविग्नोऽपि स मातुरनुरोधात् सपत्नीक आगत्य सविनयं नृपं प्रणनाम । **श्रेणिक**श्च स्वपुत्र इव तमालिङ्ग्याऽङ्के समुपवेश्य स्नेहाद् मस्तके आजघ्रौ किन्तु स क्षणाद् बाष्पाणि पातयामास ।

ततो **भद्रो**वाच-"नृप ! त्यजेमं, यतो नरोऽप्ययं मनुष्यमाल्यगन्धेन पीड्यते । देवत्वं गतः श्रेष्ठी सपत्नीकस्याऽस्य प्रतिदिनं दिव्यनेपथ्यादीनि प्रयच्छति" । ततो नृपेण विसृष्टः स **शालिभद्रः** सप्तमभूमिकां जगाम । **भद्र**या चेहैव भोक्तव्यमिति विज्ञप्तो नृपस्तत् प्रतिपन्नवान् । **भद्रा** च शीघ्रमेव सर्वं प्रगुणीचकार ।

ततः स्नानं कुर्वतो नृपस्याऽङ्गुल्या ऊर्मिका गृहवाप्यां पतिता । यावच्च नृप इतस्ततोऽन्वेषयामास तावद् **भद्रा** दासीं वापीजलाऽपाकरणायाऽऽदिशत् । दास्या तथा कृते च नृपश्चित्राभरणमध्येऽङ्गाराभं स्वाङ्गुलीयं दृष्ट्वा विस्मितः किमेतदिति दासीं पप्रच्छ । तदा सोवाच-"अत्र प्रतिदिनं सभार्यस्य **शालिभद्र**स्य निर्माल्यं

प्रक्षिप्यते" । ततो नृपो दध्यौ-"अयं सर्वथा धन्यः, अहमपि च धन्यो यस्य राज्ये ईदृशाः सन्ति" । अनन्तरं च नृपः सपरिवारो भुक्त्वा विविधवस्त्रभूषणादिभिः सत्कृतश्च स्वगृहं जगाम ।

अथ **शालिभद्रो** यावत् संसारत्यागमैच्छत् तावद् धर्ममित्रेणाऽऽगत्य विज्ञप्तः-"चतुर्ज्ञानी देवादिभिः पूजितो **धर्मघोष**मुनिरुद्याने समागतोऽस्ति" । तच्छ्रुत्वा प्रसन्नः **शालिभद्रो** रथमारुह्य गत्वाऽऽचार्यपादान् साधूंश्च वन्दित्वा पुर उपविश्य देशनान्ते पप्रच्छ-"भगवन् ! केन कर्मणा जनः प्रभुरेव नाऽन्यो भवति ?" ततो मुनिरुवाच-"व्रतिनः सर्वजगत्प्रभुत्वं यान्ति" ।

ततः **शालिभद्र** उवाच-"यद्येवं तर्हि गत्वा मातरमापृच्छ्य व्रतं ग्रहीष्यामि" । ततः सूरिणा न प्रमादो विधातव्य इत्युक्तः **शालिभद्रो** गृहं गत्वा **भद्रां** नत्वोवाच-"अद्य **धर्मघोष**मुनेर्देशना मया श्रुता" । तेन मात्रा मुदाऽभिनन्दितश्च स व्रतग्रहणाय निर्देशं ययाचे । मात्रा च व्रतकष्टं दर्शयित्वा भोगान् क्रमात् त्यज, मनुष्यमाल्यगन्धान् सहस्व चेत्यादिष्टः स तत् प्रतिपद्यैकां भार्यां तूलिकां च प्रतिदिनं त्यजति स्म ।

इतश्च तस्मिन्नेव नगरे धनाढ्यो **धन्यो** नाम **शालिभद्र**स्य कनिष्ठस्वसृपतिरासीत् । एकदा च **शालिभद्र**भगिनी रुदती तेन पत्या किं रोदिषीति पृष्टा सगद्गदमुवाच-"मम भ्राता व्रतं ग्रहीतुं दिने दिने एकां भार्यां तूलिकां च त्यजति, तेनाऽहं रोदिमि" । ततो **धन्यः** सहासमुवाच-"य एवं करोति स शृगाल इव भीरुः, तत्त्वद्भ्राता तपसि हीनसत्त्वः" ।

ततोऽन्याभिः पत्नीभिः "यदि व्रतं सुकरं तर्हि स्वयं किं न गृह्णासि" इति सहासमुक्तो **धन्य** उवाच-"भवत्यो व्रते विघ्नाः, ताश्च भाग्यादद्याऽनुकूला ममाऽभूवन्निति शीघ्रमेव व्रतं ग्रहीष्यामि" । ततस्ताभिर्वार्यमाणः प्रार्थ्यमानोऽपि च दृढप्रतिज्ञो **धन्य** उत्थितवान्। ततस्तासामपि स्वमनुव्रतग्रहणेच्छां **धन्यो**ऽन्वमन्यत । तदानीं च धर्ममित्रेण **वैभार**गिरौ **वीर**जिनः समवसृत इति ज्ञात्वा **धन्यः** सपत्नीकः शिबिकामारुह्य गत्वा सदारो व्रतं **वीर**जिनान्तिके गृहीतवान् । तच्छ्रुत्वा **शालिभद्रो**ऽपि जितंमन्यस्त्वरितः **श्रेणिक**-नृपेणाऽनुगम्यमान आगत्य **वीर**जिनपार्श्वे दीक्षां ललौ। ततः प्रभुः सपरिवारोऽन्यत्र विजहार ।



अथ **धन्यः शालिभद्र**श्च श्रुतमधीत्य दुष्करं तपश्चरन्तौ शरीरेऽपि निःस्पृहौ मासोपवासादिकं कुर्वाणावतिकृशौ बभूवतुः । एकदा च **वीर**प्रभुणा सह तौ निजजन्मभुवं **राजगृह**पुरमाजग्मतुः । तत्र च समवसरणस्थं प्रभुं नन्तुं श्रद्धया भक्त्या च जना निरन्तरमागच्छन्ति स्म । मासक्षपणके च **धन्य-शालिभद्रौ** यथाकालं भिक्षार्थं गन्तुं प्रभुं प्रणेमतुः । अद्य ते मातृपार्श्वात् पारणमिति प्रभुणोक्तः **शालिभद्र** इच्छामीति वदन् **धन्य**सहितो गत्वा **भद्रा**-गृहद्वारि स्थितवान् । तपःकृशतया च तौ न केनाऽप्युपलक्षितौ । **भद्रा**ऽपि च **वीर**जिनं **शालिभद्रं धन्यं** चाऽद्य नन्तुं यामीति कृतत्वरा तौ नोपलक्षितवती । तौ च क्षणं तत्र स्थित्वा ततो निर्गत्य नगरद्वाररथ्याया निर्जग्मतुः ।

तदानीं च दधि-सर्पिषी विक्रेतुं तस्मिन् पुरे समागच्छन्ती **शालिभद्र**स्य प्राग्जन्ममाता **धन्या** पुरो भूता तं दृष्ट्वा सद्यः प्रस्नुतस्तनी तौ नत्वा ताभ्यां दधि ददौ । **शालिभद्र**श्च **वीर**जिनपार्श्वे गत्वा रचिताञ्जलिर्जगाद-"प्रभो ! मातृतः पारणं कथम् ?" ततः सर्वतो

**वीर**जिनः **शालिभद्र**स्य प्राग्जन्ममातरमन्यदपि भवान्तरीयमाख्यत् । ततः **शालिभद्रो** दध्ना पारणं विधाय प्रभुमापृच्छ्य **धन्ये**न सह पादपोपगमं नामाऽनशनं प्रतिपन्नवान् ।

अथ तदानीमेव **भद्रा श्रेणिको** नृपश्च **वीर**जिनं नन्तुं तत्राऽऽगतौ । तत्र **भद्रो**वाच-"प्रभो ! **धन्य-शालिभद्रौ** क्व स्तः ?" मम गृहं भिक्षार्थं कुतो न गतौ ?" ततः सर्वज्ञः प्रभुरुवाच-"तव गृहं तौ मुनी गतौ, किन्त्वत्राऽऽगमनातुरया भवत्या तौ नोपलक्षितौ । त्वत्पुत्रस्य प्राग्जन्ममाता **धन्या** दधि ददौ । तेन च तौ पारणं चक्रतुः । तथा भवं छेत्तुं महासत्त्वौ तौ **वैभार**गिरौ गत्वाऽनशनं प्रपन्नौ स्तः" ।

ततो **भद्रा श्रेणिके**न सह **वैभार**गिरिं गत्वा तौ प्रस्तर-निर्मिताविव स्थिरौ दृष्ट्वा तत्कष्टं पूर्वसुखं च स्मृत्वा मुक्तकण्ठं रुरोद । गृहे समागतोऽपि मया न ज्ञात इति स्वं निनिन्द च । तत्र च **श्रेणिके**न विविधं बोधिता सा नृपेण सह तौ वन्दित्वा विषण्णा गृहं जगाम । तौ मुनी च विपद्य **सर्वार्थसिद्ध**विमाने त्रयस्त्रिं-शत्सागरोपमायुषौ देववरावभूताम् ॥ १० ॥

*इति दशमे पर्वणि दशार्णभद्र-शालिभद्र-धन्यकचरित-*
*वर्णनात्मको दशमः सर्गः ॥१०॥*

# एकादशः सर्गः

अथ भगवान् श्री**वीर**जिनो लोकहितेच्छया ग्रामादिषु विजहार । इतश्च **राजगृह**स्य **वैभार**गिरिगुहायां **लोहखुरा**ख्यो नाम चौरो-ऽतिभयङ्करोऽभूत् । स नित्यं **राजगृहे** नागराणामुत्सवादिषु च्छिद्रं प्राप्योपद्रवं चकार । तस्य हि प्रीत्यै चौर्यमेवैका वृत्तिरभवत् । तस्य **रोहिण्या**ख्यायां भार्यायां रूपेण कर्मणा चाऽनुरूपो **रौहिणेयो** नाम पुत्रोऽभवत् । **लोहखुर**श्च स्वमृत्युसमये प्राप्ते तं पुत्रमाहूय निजादिष्ट-वचनपालनप्रतिज्ञां कारयित्वा प्रहृष्टः पाणिना स्पृशन्निष्ठुरतयोवाच-"योऽसौ समवसरणे स्थितो **वीरो** देशनां करोति तद्वचनं न श्रोतव्यम् । अन्यत्तु स्वरुचितं निरङ्कुशं कर्तुमर्हसि" । एवं पुत्र-मुपदिश्य स **लोहखुरो** विपन्नवान् । **रौहिणेय**श्च पितुरौर्ध्वदेहिकं विधाय चौर्यं चकार । पितुराज्ञां प्राणानिव पालयंश्च स नित्यं **राजगृह**नगरममुष्णात् ।

तदानीं च विहारक्रमतो **वीर**जिनो विभुः सपरिवारस्तत्रा-ऽऽजगाम । सुरैर्विकृते समवसरणे च प्रभुर्यथाविधि धर्मदेशनां चकार । तदानीं च **रौहिणेयो राजगृहं** प्रति गच्छन् मार्गमध्ये सम-वसरणसमीपमागतो दध्यौ-"अनेन मार्गेण गमने **वीर**वचःश्रवणात् पितुराज्ञा विराधिता स्यात्, न चाऽन्यो मार्गो विद्यते" ।

ततः स पाणिभ्यां कर्णौ पिधाय शीघ्रं **राजगृहं** ययौ । एवमन्वहं गतागतं कुर्वतस्तस्य पादे समवसरणसमीपे कण्टको विद्धः । त्वरया गमनाद् गाढं विद्धं कण्टकमनुद्धृत्य स पदमपि गन्तुं न शशाक । अगत्या च स कर्णात् करमपनीय कण्टकं कर्षन् **वीर**प्रभोर्वचनं शुश्राव–"देवा भूतलास्पर्शिचरणा, अनिमिषनेत्रा, अम्लानमाल्याः, स्वेदरजोवर्जिताङ्गाः" । एवं श्रुत्वा च बहु श्रुतमिदं धिग् धिगिति शीघ्रं कण्टकमुद्धृत्य पुनः कर्णं करेण पिधाय पूर्ववदेव जगाम ।

अथ प्रतिदिनं तेन चौरेण नगरे मुष्यमाणे श्रेष्ठिन आगत्य **श्रेणिक**नृपमूचुः-"देव ! त्वयि शासत्यस्माकमन्यद् भयं नास्ति, किन्तु चौरैर्नितरां पीडिताः स्मः" । ततस्तेषां वचसा पीडामनुभवन् नृपः सकोपं दण्डपाशिकमुवाच–"किं त्वदुपेक्षितैश्चौरैरेते परिभूयन्ते?" ततः स उवाच–"देव ! कोऽपि **रौहिणेया**ख्यश्चौरो नागरान् लुण्टति । दृष्टोऽपि स धर्तुं न शक्यते । स हि विद्युदिवोत्प्लुत्योत्प्लुत्य गृहाद् गृहं ततः प्राकारं च लीलयोल्लङ्घते । यावच्च मार्गे तमन्वेषयामि तावत् सोऽदृश्यो भवति । तत्तं धर्तुं हन्तुं वाऽशक्तोऽस्मि । तन्निजां दण्डपाशिकां देवो गृह्णातु" ।

ततो नृपेण भ्रूसंज्ञया प्रेरितोऽ**भयकुमार**स्तं दण्डपाशिकमुवाच- "चतुरङ्गसेनां सज्जीकृत्य पुराद् बहिः स्थापय । यदा च चौरो नगरे प्रविशति तत्सैन्यं नगरं वेष्टयेत् । नगरान्तस्त्रासितः स विद्युदुत्क्षिप्तकरणेन बहिःसैन्ये पाशे मृगवत् पतिष्यति । तदा सावधानैः पदातिभिः स ग्रहीतव्यः" । ततो दण्डपाशिकस्तथेत्याज्ञां स्वीकृत्य निर्गत्य तथैव सज्जं चतुरङ्गसैन्यं प्रच्छन्नं चकार । तस्मिन्



दिने रौहिणेयोऽपि च ग्रामान्तरं गतो रुद्धां नगरीमजानानोऽविशत् । दण्डपाशिकेन च तैरुपायैर्धृत्वा बद्ध्वा च स चौर आनीय नृपस्य समर्पितः । ततो नृपो न्यायानुसारेणाऽसौ निग्रहीतव्य इत्यादिशत् ।

अथाऽ**भयकुमार** उवाच–"चौर्याप्तधनरहित एवाऽसौ धृत इति निग्रहं नाऽर्हति, तद्विचार्य निग्रहीतव्यः" । ततो नृपेण वासभूमिं जीविकामागमनकारणं च नामग्राहं पृष्टः स्वनामशङ्कितः स चौरः प्रत्युवाच-"**शालि**ग्रामवास्तव्यो **दुर्गचण्डा**ख्योऽहं गृही प्रयोजन-वशादिहाऽऽयातः कुतूहलादेकस्मिन् देवकुले रात्रिं स्थित्वा स्वगृहं गच्छन्नेभिरारक्षै राक्षसैरिवाऽऽक्षिप्तः प्राणभयात् प्राकारमलङ्घयम् । एवं निर्गतश्चाऽहं बाह्यारक्षगणेषु पतितः । ततो निरपराधोऽप्यहं चौर इव बद्ध्वाऽधुनैभिरिहाऽऽनीतोऽस्मि । तन्नीतिं विचारय" । ततो नृपस्तं तत्क्षणं गुप्तौ प्रेषयामास । तत्प्रवृत्तिज्ञानार्थं च तत्र ग्रामे स्वपुरुषं प्रेषयामास । तेन चौरेण च पुराऽपि स ग्रामः स्वसङ्केतं ग्राहितो भवति । तेन राजपुरुषेण तच्चौरप्रवृत्तिं पृष्टो ग्रामजन उवाच– "**दुर्गचण्डो**ऽत्र वास्तव्यः सम्प्रति ग्रामान्तरं गतोऽस्ति" ।

अथ तत आगतेन पुरुषेण विज्ञप्तोऽ**भयकुमारो** दध्यौ– "सुप्रयुक्तस्य दम्भस्य ब्रह्माऽप्यन्तं न गच्छति" । ततोऽ**भयकुमारः** सप्तभूमिकं प्रासादं देवविमानमिव रत्नैः सङ्गीतकै रमणीभिश्च सज्जितं विधाय तं चौरं च मद्यपानमूर्च्छितं कृत्वा देवदूष्ये परिधाप्य तल्पे शाययामास । मदे समुपशान्ते चोत्थितमात्र एव स चौर आश्चर्यकरीमदृष्टपूर्वां दिव्यसम्पदं ददर्श । अत्राऽवसरे चाऽ**भया**-दिष्टैर्नरनारीसमूहैर्जय नन्देत्यादिकं मङ्गलमाघोष्य "अस्मिन् महाविमाने त्वमधुनाऽस्माकं स्वामिभूतो देव उत्पन्नोऽसि, वयं तवाऽनुचराः । एताभिरप्सरोभिः स्वैरमिन्द्रवद् रमस्वे"त्यादि चाटुगर्भं चोचे ।

ततः स चौरो यावत् सुरो जातोऽस्मि किमहमिति तर्कयामास तावत् तैः सङ्गीतकं प्रारेभे । ततश्चैकेन पुरुषेण स्वर्णदण्डधारिणाऽऽगत्य 'भोः ! सहसा किमेतदारब्धमि''ति निवारितास्ते ऊचुः-''भो ! द्वारपाल ! निजस्वामिन इदं स्वकौशलं प्रदर्शयितुं सङ्गीतकमारब्धम्'' । ततः स पुरुष उवाच-''स्वप्रभोः स्वकौशलं दर्श्यताम्। किन्त्वस्य देवलोकसमाचारः सम्पादनीयः'' । तैः कीदृगाचार इति पृष्टश्च स पुरुषः साक्षेपमुवाच-''तदेतद् विस्मृतं किं भवद्भिः ? यो देव इहोत्पद्यते स स्वकृते सुकृत-दुष्कृते समाख्याति पश्चात् स्वर्गभोगाननुभवति'' । ततस्तैः ''स्वामिलाभेनैतद् विस्मृतं, तन्नः प्रसीद। देवलोकसमाचारो देवेन सम्पादनीय'' इत्यूचे ।

ततः पुरुषो **रौहिणेय**मुवाच-''देव ! पुराकृते स्वशुभा-ऽशुभे ब्रूहि, पश्चात् स्वर्गभोगान् भुङ्क्ष्व'' । ततः स चौरो दध्यौ-''किमीदृशमेतत् सत्यम् ? अथवाऽ**भये**न मां ज्ञातुमेवैष प्रपञ्चो रचितोऽस्ति ? तदेतत् कथं ज्ञेयम्'' एवं ध्यायतश्च तस्य कण्टकाकर्षणकालश्रुतं प्रभुवचनं स्मृतम् । ततः स दध्यौ-''यदि **वीरा**ख्यातं देवस्वरूपं संवदिष्यति तदा सत्यं कथयिष्यामि, नो चेदन्यथोत्तरं दास्यामि'' । एवं विचार्य स चौरस्तान् स्वेदमलिनान् म्लानमाल्यान् भूमिस्पृशः सनिमिषेक्षणान् दृष्ट्वा तत् सर्वं कपटं ज्ञात्वोत्तरं चिन्तयंस्तेन पुरुषेण पुनः प्रेरितश्चोवाच-''मया पूर्वजन्मनि सुपात्रे दानं दत्तं, चैत्यानि कारितानि, तेषु बिम्बानि प्रतिष्ठापितानि, तीर्थयात्रा विहिता, गुरव उपासिताश्च । एवमादिकं सदनुष्ठानं कृतम्'' ।

ततो दण्डभृता दुश्चरित्रमपि कथयेति प्रेरितश्च स **रौहिणेयः** पुनरुवाच-''साधुसमुपासकेन मया कदाऽपि किमप्यनुचितं



नाऽऽचरितम्'' । ततो द्वारपाल उवाच-''जन्मैकस्वभावेन न व्यत्येति, तच्चौर्य-परस्त्रीसङ्गमादिकं शंस'' । ततः स **रौहिणेय** उवाच-''किमेवं पृच्छसि ? अनुचिताचारः पुमान् स्वर्गं प्राप्नुयात् किम् ?'' ततस्तैर्गत्वा सर्वं वृत्तम**भयकुमारा**य निवेदितम् । ततोऽ**भयो** नृपमुवाच-''एवंविधैरुपायैश्चौरो ज्ञातुं न शक्यते, ततः स विमोक्तव्यः। नीतिर्लङ्घितुं न शक्यते'' । ततो नृपादेशाद**भय**श्चौरममुचत् ।

अथ स चौरो दध्यौ-''मम पितुरादेशं धिक्, येन प्रभुवचनामृताच्चिरं वञ्चितोऽस्मि । प्रभोस्तद्वचनश्रवणादेव मम मोक्षो जातः । अन्यथा विविधताडनादिना मारितस्य मम यमगृहगमनमेव भवेत् । अकामेनाऽपि गृहीतेन प्रभुवचसा मम रोगिणो भेषजेनेव प्राणत्राणं जातम् । तत्त्यक्तार्हद्वचनस्य चौरवचोरतस्य मम जीवनं धिक् । यस्यैकस्याऽप्युपदेशस्यैवं फलं साकल्येन तत्सेवने कीदृशं फलं भविष्यति ?'' एवं विचार्य स प्रभोरन्तिकं गत्वा **रौहिणेयो** भक्त्या प्रणम्य स्तुत्वा स्वस्य प्रभुवचनवैमुख्यं निन्दित्वा भवोदधौ निमज्जन्तं मां त्रायस्वेति प्रार्थयामास ।

ततः प्रभुस्तस्य मोक्षजननीं विशुद्धां यतिधर्मदेशनां चकार । तेन च प्रबुद्धो **रौहिणेयः** प्रणमन् यतिधर्मयोग्योऽस्मि न वेति प्रभुं पप्रच्छ । योग्योऽसीति प्रभुणोक्तश्च व्रतं ग्रहीष्यामीति प्रतिज्ञाय **श्रेणिक**मुवाच-''देव ! भवद्भिर्यो **रौहिणेयः** श्रुतः स भवन्नगरमोषकोऽहमेवाऽस्मि । प्रभुवचनेनैकेन मयाऽ**भयकुमार**स्य बुद्धिर्नावा नदीवोत्तीर्णा । तदन्यस्तस्करो न मृग्यः । कमपि पुरुषं प्रेषय, यथा लोप्त्रं दर्शयित्वाऽहं प्रव्रजिष्यामि'' ।

ततोऽ**भय** उत्थाय कौतुकिपौरलोकसहितश्चौरेण सह जगाम । ततः स चौरोऽ**भय**स्य गिरि-नदी-कुञ्ज-श्मशानादिषु निखातं सर्वं

धनं दर्शयामास । ततोऽ**भयो** यथास्वं पौराणां तद् धनमर्पयामास। ततो **रौहिणेयो** निजजनान् परमार्थं कथयित्वा प्रबोध्य च श्रद्धया प्रभुसमीपं समाजगाम । ततः **श्रेणिक**नृपेण कृतनिष्क्रमणोत्सवः स **वीर**जिनपार्श्वे प्रव्रज्यां जग्राह । ततश्च कर्मच्छेदाय स चतुर्थादिकं दुष्करं तपश्चकार । तपःकृशश्च स भावसंलेखनां कृत्वा श्री**वीर**-जिनमापृच्छ्य पर्वते पादपोपगमनानशनं विधाय शुभध्यानस्थः पञ्चपरमेष्ठिनमस्कारं स्मरन् विपद्य दिवं ययौ । प्रभुरपि देवादिभिः सह ततोऽन्यत्र विजहार ।

❁ ❁ ❁

इतश्च **श्रेणिको** नृपस्तस्मिन् **राजगृहे** नगरे सम्यक्त्वं धारयन् नीत्या राज्यं पालयामास । अन्यदा **चोज्जयिनी**पति**श्चण्डप्रद्योतः** सर्वसामग्र्या सह **राजगृहं** रोद्धुं चचाल । लोकैर्बद्धमुकुटः **प्रद्योत**-श्चतुर्दशाऽन्ये नृपाश्च तत्र समागच्छन्तो दृष्टाः । **श्रेणिक**श्च जविभिर्ह-यैरागतैश्चरैस्तत् शुश्राव । ततः **श्रेणिको** दध्यौ-“अत्राऽऽगच्छन् **प्रद्योतः** कथं नष्टबलः कार्यः” । एवं ध्यात्वा सोऽ**भयकुमार**मुखमै-क्षिष्ट । ततोऽ**भय** उवाच-“**प्रद्योतो** मम युद्धातिथिर्भवेदित्यस्य न काऽपि चिन्ता । यद्वा बुद्धिसाध्ये कार्ये शस्त्राशस्त्रिकथा हेया । तद्बुद्धिमेव प्रयोक्ष्ये” ।

ततः सोऽ**भयो** बाह्ये शत्रुसैन्यानामावासस्थानभूमिषु दीनारान् लौहसम्पुटे कृत्वा निखानितवान् । तथा चरैः प्रद्योतं प्रति लेखं प्रेषयामास-“**शिवादेवी-चेलणयो**र्न कोऽपि भेदः। तच्छि**वादेवी**-सम्बन्धेन सर्वदा मान्योऽसि । तत्तव हितेच्छया कथयामि यत् सर्वे ते नृपाः **श्रेणिक**राजेन भेदिताः । तान् स्ववशगान् कर्तुं दीनाराः प्रेषिताः सन्ति । नृपाश्च तान् दीनारानादाय त्वां बद्ध्वा **श्रेणिक**-स्याऽर्पयिष्यन्ति । तेषां कृते तदावासेषु दीनारा निखाताः सन्ति । तत् खानयित्वा प्रत्ययं कुरु” ।



तज्ज्ञात्वा च **प्रद्योत** एकस्य नृपस्याऽऽऽवासं खानयामास । तत्र च दीनारा लब्धाः । ततः स नृपः पलायितवान् । तस्मिन् पलायिते च **श्रेणिक**स्तत्सैन्यं पराभूय सर्वं हस्त्यश्वादिकं जग्राह । प्राणानादाय पलायितश्च **प्रद्योतो** वेगिनाऽश्वेन कथमपि स्वां नगरीं प्राप । अन्ये नृपा भटाश्चाऽपि काकनाशं नेशुः । तेऽपि च **प्रद्योत**मनुसरन्त **उज्जयिनीं** प्रापुः । तत्र च तैर**भय**स्येयं माया न वयमन्यथाकारिण इति सशपथं **प्रद्योतः** प्रत्यायितः ।

ततः कदाचित् **प्रद्योतः** सभायामुवाच-“योऽ**भयं** बद्ध्वा ममाऽर्पयतीदृशः कोऽप्यस्ति किम् ?” ततः काऽप्येका वेश्या हस्त-मुत्क्षिप्याऽहमत्र समर्थेति विज्ञापयामास । ततः **प्रद्योत**स्तामुवाच-“यदि त्वं सक्षमा तर्हि तत् सम्पादय । सम्प्रति किं तवा-ऽर्थादिसाहाय्यं करोमि तद् ब्रूहि” । ततः सा गणिका दध्यौ-“**अभय** उपायान्तरेण न ग्राह्यः । तद्धर्मकपटमादायैव स्वेष्टं करोमि” । एवं ध्यात्वा सा प्रौढे द्वे स्त्रियौ याचितवती । **प्रद्योत**श्च प्रभूतेन द्रव्येण सह ते ददौ । ततस्तास्तिस्रोऽपि प्रतिदिनं साध्वी-रुपास्योपास्य प्रज्ञावत्यो जाताः । ततस्तास्तिस्रोऽपि **श्रेणिक**नृपपुरं गत्वा बाह्योद्याने वासं चक्रुः । वेश्या च चैत्यपरिपाटीं कर्तुं पत्तनस्य मध्ये गत्वा नृपकारिते चैत्ये प्रविश्य ताभ्यां सह नैषेधिकीत्रयं कृत्वा पूजां विधाय ग्रामरागपूर्वकेण वचसा देवं वन्दितुमारेभे ।

तदानीं च विवन्दिषुर**भयकुमारो**ऽपि तत्र गतस्ताभ्यां सह गणिकां वन्दनं कुर्वतीं दृष्ट्वा “मया प्रविशताऽस्या देववन्दविघ्नो मा

भूदिति द्वार्येव तस्थौ। यावच्च सा मुक्ताशुक्तिमुद्रया प्रणिधानस्तुतिं कृत्वोत्थितवती तावत् तत्राऽ**भयो**ऽपि प्राप्तः । ततोऽ**भय**स्तस्या भावनां वेषं प्रशमं च वर्णयित्वा तामुवाच-"भद्रे ! दिष्ट्या त्वादृशसाधर्मिकसमागमो जातः । का त्वं ? किमिहाऽऽगमः ? का वासभूमिः ? इमे च के" ?

ततः सा गणिकोवाच-"अहं श्रेष्ठिनो विधवा भार्या, इमे च मम पुत्रवध्वावपि विधवे व्रतार्थं पृच्छतः स्म । ततो मयोक्तं यदहमपि निर्वीरा व्रतं ग्रहीष्यामि । किन्तु तीर्थयात्रया गार्हस्थ्यफलं ग्राह्यम् । यतो व्रते भावतः पूजा युज्यते न द्रव्यतः । तदेताभ्यां सह तीर्थयात्रार्थं निर्गता" । ततोऽ**भय**स्तामुवाच-भवत्यो ममाऽतिथी-भवन्तु । साधर्मिकवात्सल्यं हि तीर्थादपि पावनम्" ।

ततः सा प्रत्युवाच-"भवान् युक्तं वक्ति, किन्त्वद्य कृततीर्थोपवासाऽहं कथमतिथिर्भवामि ?" ततस्तन्निष्ठया हृष्टोऽ**भयः** पुनस्तामुवाच-"तर्हि प्रातर्मम गृहमवश्यमागन्तव्यम्" । ततः सा पुनरुवाच-"प्राणिनो जन्म क्षणेनाऽपि समाप्यते, तत्प्रातरिदं करिष्यामीति कथं वक्तव्यम् ?" ततोऽ**भयः** प्रातरियं निमन्त्रणीयेति विचार्य तां विसृज्य चैत्यं वन्दित्वा स्वं धाम जगाम । प्रातश्चाऽ**भय**स्तां निमन्त्र्य चैत्यानि वन्दयित्वा भोजयित्वा प्रचुरं वस्त्रादिकमदात् ।

अथ गणिकयाऽपि निमन्त्रितोऽ**भय** एकाक्येव तस्या आवासं गतवान् । तया च विविधैर्भोज्यैर्भोजितश्चन्द्रहाससुरामिश्रपानकानि पायितश्चाऽ**भयो** भुक्तोत्थित एव सुष्वाप । ततः सा मायिनी गणिका त**मभयं** स्थाने स्थाने स्थापितेन रथेनाऽ**वन्तीं** प्रापयामास । ततः **श्रेणिके**नाऽ**भया**न्वेषणाय नियोजिता अन्वेषकाः स्थाने स्थाने



तमन्विष्यन्तस्तत्राऽऽययुः । तथा तैः किम**भय** इहाऽऽयात इति पृष्टा सा गणिकाऽत्र समायातोऽ**भयः** सद्यस्तदैव गतवानित्युवाच । तद्वचोविश्वासात् तेऽन्वेषका अन्यत्र ययुः । सा गणिका चाऽपि स्थाने स्थाने स्थापितैरश्वै**रवन्तीं** जगाम । ततः सा **चण्डप्रद्योता**या-ऽ**भयकुमारं** समर्पयामास, तदानयनोपायं वर्णयामास च ।

तच्छ्रुत्वा **प्रद्योत** उवाच-"नैवं त्वया साधु कृतं, यद् धर्मे विश्वस्तमेनं धर्मकपटेनाऽत्राऽऽनीतवती" । तथा **प्रद्योतः** सप्ततेः कथानां वाचकः शुको बिडाल्येवाऽनया गणिकया नीतिज्ञोऽपि त्वं गृहीतोऽसीत्य**भय**मुवाच । ततोऽ**भय**स्तमुवाच-"त्वमेव बुद्धिमानसि, यस्य तवेदृश्या बुद्ध्या राजधर्मो वर्धते" । तेन च लज्जितः कुपितश्च **प्रद्योतो**ऽ**भयं** राजहंसमिव काष्ठपञ्जरेऽक्षिपत् ।

अथ तस्य **प्रद्योत**स्य राज्येऽ**ग्निभीरुरथः, शिवादेवी, नलगिरिः, कुञ्जरो, लोहजङ्घो, लेखवाह**श्च रत्नान्यभूवन् । नृपश्च **लोहजङ्घं** मुहुर्मुहु**र्भृगुकच्छे** प्रेषयामास । तद्गतागतेन पीडितास्तत्रत्या जना विचारयामासुः-"अयं दिनमात्रेण पञ्चविंशतियोजनीमायाति, अस्मान् वारंवारमाज्ञया पीडयति चेत्यमुं सम्प्रति हन्मः" । एवं विचार्य ते **लोहजङ्घ**स्य पाथेये विषमोदकान् ददुः । तस्य पोट्टलिकायां स्थितं सर्वं शम्बलमपजहुश्च । **लोहजङ्घ**श्च कियन्तं मार्गं गत्वा नदीतटे पाथेयं भोक्तुमवस्थितवान् ।

तदानीं च तस्याऽशकुनान्यभूवन् । शकुनज्ञस्तु सोऽभुक्त्वैवोत्थाय दूरं गत्वा पुनर्भोक्तुमुपक्रान्तः शकुनैर्वारितः । एवं भोक्तुकामः पुनः पुनः शकुनैर्वारितः क्षुधित एव गत्वा तत् सर्वं वृत्तं **प्रद्योत**स्य निवेदयामास । ततः **प्रद्योते**नाऽऽहूय पृष्टोऽ**भयः** शम्बलपोट्टलिकामाघ्रायोवाच-"अस्यां भस्त्रायां द्रव्यसंयोगाज्जातो

दृग्विषः सर्पोऽस्ति, भस्त्रायामुद्घाटितायामसौ नियतं दग्धः स्यात् । तस्माद् वने पराङ्मुखोऽसौ मोक्तव्यः" । एव**मभये**न कथिते तथैव मुक्तः सर्पः, तेन च वृक्षा दग्धाः, स सर्पश्च मृतः । ततः प्रसन्नेन **प्रद्योते**न बन्धनमोक्षणं विना वरं याचस्वेत्युक्तोऽ**भयः** सम्प्रति मे वरो न्यासीभूतोऽस्त्वित्युवाच ।

इतश्च **प्रद्योत**स्याऽ**ङ्गारवत्यां** भार्यायां **वासवदत्ता** नाम सुता लक्ष्मीतुल्याऽऽसीत् । सा धात्रीभिर्लाल्यमाना क्रमेण वर्धमाना राजगृहाङ्गणे रेमे । नृपश्च सम्पूर्णलक्षणां तां पुत्रादप्यधिकां मेने । सा सकलकलाकलापकुशला गुरोरभावाद् गान्धर्ववेदं न ज्ञातवती । ततः **प्रद्योतेन** राजपुत्रीणां पतिगृहे गान्धर्वकलैवोपयोगिनीति विचार्य मत्सुताया गान्धर्वाध्यापकः को नाम भावीति पृष्टः सचिव उवाच- 'सम्प्रत्य**ुदयनो** नृपो गान्धर्वनिपुणोऽस्ति, स हि गीतेन मोहयित्वा गजान् वने बध्नातीति श्रूयते । तस्य बन्धनेऽत्राऽऽनयने चैष उपायः-'वने सत्यगज इव **किलिञ्जा**ख्यकाष्ठैर्गजो विधातव्यः । यन्त्रप्रयोगेण च तस्य चलनासनादिका क्रिया सम्पादनीया । त**त्किलिञ्ज**हस्तिमध्ये च शस्त्रधारिणः स्थास्यन्ति, तं गजं चालयिष्यन्ति, तमु**दयनं** भन्त्स्यन्ति च । एवं बद्ध्वा स **वत्सराज** इहाऽऽनीतस्त्वदाज्ञया **वासवदत्तां** गान्धर्वं शिक्षयिष्यति" ।

ततो राज्ञा साधु साध्वित्यनुमतो मन्त्री तथोक्तप्रकारेण सत्यगजादप्यधिकगुणं गजं चकार । वनचराश्च दन्तघातादिक्रियादिभिस्तं सत्यं गजं मत्वो**दयना**य निवेदयामासुः । **उदयनो**ऽपि च तद्बन्धनार्थं वनं जगाम । स परिवारं दूरे एव विसृज्य शनैः शनैः परिक्राम्यन् वनान्तः प्रविश्य तस्य कपटगजस्य समीपं गत्वा च गातुमुपचक्राम । यथा यथा च स मधुरं जगौ तथा तथा



गजान्तःस्थाः पुरुषास्तं गजं निश्चलाङ्गं चक्रुः । ततः **कौशाम्बी**नृपो गजं गीतमोहितं मत्वा शनैः शनैस्तत्समीपं गत्वोत्प्लुत्य तमारुरोह । ततः **प्रद्योते**नाऽऽयुक्ता भटा गजोदराद् निर्गत्य **वत्सराजं** गजस्कन्धात् पातयित्वा निरस्त्रमेकाकिनमकृतपौरुषमबन्धयन् । तथा तैरर्पितं **वत्सराजं प्रद्योत** एकाक्षीं मत्पुत्रीं गान्धर्वकलां शिक्षय, मद्गृहे सुखं तिष्ठ, अन्यथा मदायत्तं तव जीवनमित्युवाच ।

**उदयन**श्च कन्यामध्यापयन् कालं यापयामि, जीवन् हि नरो भद्राणि पश्यतीति विचार्य **प्रद्योता**ज्ञामनुमेने । ततः **प्रद्योत**स्तं- "मम पुत्री काणा, तां कदाचिद् न पश्येः, अन्यथा सा लज्जिष्यते" इत्युक्त्वाऽन्तःपुरे गत्वा स्वपुत्रीमपि 'तव गान्धर्वगुरुरागतः, स कुष्ठीति न कदाचिदवलोकनीय" इत्युवाच । ततो **वत्सराज**स्तां तथैवाऽध्यापयामास । **प्रद्योता**ज्ञया च तौ परस्परं न ददृशतुः ।

अन्यदा च **वासवदत्ता** गुरुं पश्यामीति विचारयन्ती शून्यचित्ताऽन्यथैवाऽपाठीत् । ततो **वत्सराज**स्तां तर्जितवान्-"काणे ! किं शास्त्रं विनाशयसि ? किं दुःशिक्षिताऽसि ?" ततस्तिरस्कारकुपिता साऽपि **वत्सराज**मुवाच-"मां काणां कथयसि, स्वं कुष्ठिनं किं नाऽवलोकयसि ?" ततो **वत्सराजो** दध्यौ-"यथाऽहं कुष्ठी तथैवेयं काणा किम् ? तदेनां पश्यामि" । एवं विचार्य स जवनिकामपसार्य सर्वाङ्गसुन्दरीं ददर्श । साऽपि च विस्मयोत्फुल्लनेत्रा सर्वाङ्गसुभगं **वत्सराजं** ददर्श । तेन च परस्परमनुरक्तौ तौ स्मितं चक्रतुः ।

ततो **वासवदत्तो**वाच-"मां धिक्, या पित्रा प्रतारिता त्वां नाऽपश्यम् । कलाचार्य ! मयि सम्यङ् न्यस्ताः कलास्तवैवोपयोगिन्यो भवन्तु । त्वं मम भर्त्ता भव" । ततो **वत्सराज** उवाच- "त्वत्पित्रैव वञ्चितोऽस्मि। त्वं काणेत्यतोऽन्तरितां कृतां त्वां पश्यन्

वारितोऽस्मि । अधुनाऽऽवयोरेकत्रैव स्थितयोर्योगोऽस्तु । काले त्वां हरिष्यामि" । एवं स्वयं दूत्येन स्वमनोरथं मधुरं जल्पतोस्तयोर्मनोयोगवद् वपुर्योगोऽप्यभूत् । **वासवदत्ता**या विश्वासपात्रं धात्री दासी **काञ्चनमालै**वैका तयोश्चरित्रं विवेद । तयैव चैकया सेवमानौ तावन्येनाऽज्ञातदाम्पत्यौ कालमतिवाहयामासतुः ।

अन्यदा चोद्यापनिकार्थं **प्रद्योतः** सान्तःपुरपरिवारः सपौरश्चोद्यानं प्रति चचाल । तदानीं च मन्त्री **यौगन्धरायणो वत्सराज**स्य मोक्षणोपायं चिन्तयन् मार्गे परिभ्रमन् स्वबुद्धिदर्पं प्रकटयन् पपाठ– "यदि तां च तां च तामायतलोचनां च नृपस्याऽर्थे न हरामि तदा नाऽहं **यौगन्धरायणः**" । **प्रद्योत**श्च गच्छन् तद्वाचं श्रुत्वा दुष्कटाक्षेण तमवलोकितवान् । **यौगन्धरायणो**ऽपीङ्गितज्ञोऽ**वन्ती**शं कुपितं विवेद । ततः स **कौशाम्बी**शपक्षपातित्वमात्मनोऽपाकुर्वन्निदमुपायं चकार–"अधोवस्त्रं मुक्त्वोर्ध्वस्थः प्रेत इव विकृताकारो मूत्रयन् स्वस्य भूताविष्टत्वं व्यञ्जयामास" । ततो नृपः पिशाचकी कश्चिदसाविति मत्वा कोपं त्यक्त्वोद्यानं गत्वा गान्धर्वगोष्ठीमारभ्य नवं गान्धर्वकौशलं द्रष्टुं कौतुकाद् **वत्सराजं वासवदत्तां** चाऽऽजुहाव ।

तदानीं **चोदयनो वासवदत्ता**मुवाच–"वेगवतीमिभीमारुह्याऽऽवयोर्गन्तुं कालोऽयम्" । ततो **वासवदत्ता** वेगवतीमिभीं सद्य आनाययामास । सा हस्तिनी च कक्षायां बद्धमानायामुच्चै ररास । तद्रसितं श्रुत्वा चाऽन्धो मौहूर्त्तिक उवाच–"यदा कक्षायां बध्यमानायां हस्तिनी रसति । तेन सा योजनशतं गत्वा मरिष्यति" । तत **उदयना**ज्ञया **वसन्तको** हस्तिपक इभ्या द्वयोः पार्श्वयोश्चतस्रो मूत्रघटिका अबध्नात् । तत **उदयनो घोषवती** वीणापाणि**र्वासवदत्ता काञ्चनमाला वसन्त**श्च तामिभीमारुरुहुः । **यौगन्धरायण**-



श्चाऽप्यागत्य हस्तसंज्ञया याहि याही**त्युदयनं** प्रेरयामास । **उदयनो**ऽपि च गच्छन्नुवाच–"**वासवदत्ता काञ्चनमाला वसन्तको वेगवती घोषवती वत्सराज**श्चेत्यमी यान्ति"। ततो **वत्सराजो** वेगेनेभीं प्रेरयन्नात्मानमलोपितक्षत्रियव्रतं ज्ञापयामास ।

अथ **प्रद्योत उदय**नं पञ्चभिः सह गतं ज्ञात्वा क्रोधात् करावाग्रेडयन् **नलगिरिं** गजं सज्जीकृत्य महाभटैराश्रित**मुदयनस्य** पृष्ठतः प्रेरयामास । योजनानां पञ्चविंशतावतीतायां च स गज **उदयने**न समीपस्थो दृष्टः । ततः स एकां मूत्रघटीं पृथिव्यां स्फोटयित्वा प्राग्वदेवेभीं तां प्रेरयामास । गजश्च तद्घटीमूत्रं जिघ्रन् क्षणं तस्थौ । पुनः प्रेर्यमाणः कष्टेनाऽग्रं चचाल । **उदयन**श्च मार्गे तत्र तत्राऽन्या अपि मूत्रघटीः स्फोटयित्वा **नलगिरे**र्गतिमरौत्सीत् । योजनानां शतं गत्वा च **वत्सराजः कौशाम्बीं** प्रविवेश परिश्रान्ता सा करेणुश्चाऽम्रियत । यावच्च **नलगिरि**र्मूत्रं जिघ्रन्नग्रे न चचाल तावत् **कौशाम्बी**शसेना तत्र योद्धुमभ्याजगाम ।

ततो हस्तिपका महाभटा **नलगिरिं** वालयित्वा यथाऽऽगतेन मार्गेण पुन**रुज्जयिनीं** जग्मुः । ततः सैन्यारम्भं कुर्वन् **प्रद्योतो** भक्तैः कुलामात्यैर्युक्तिपूर्वकं वारितः। ते मन्त्रिण ऊचुः–"देव ! कन्या यस्मै कस्मैचिद् देयैव । तत्र **वत्सराज** उत्तमोत्तमो जामाता । **वासवदत्ता** च स्वयंवरा तं स्वयं स्वीकृतवती। तत्सैन्यारम्भेणाऽलम् । **वासवदत्ता**यास्तं कौमारहरं वरमनुमन्यस्व" । एवं तैः प्रबोधितः **प्रद्योतो** हृष्टो **वत्सराजा**य जामातृभावोचितं वस्तुजातं प्रेषयामास ।

अन्यदा चाऽ**वन्त्यां** निरन्तरं वह्निप्रदीपनं जातम् । **प्रद्योतेन** तत्प्रतीकारं पृष्टश्चाऽ**भयकुमार** उवाच–"विषस्य विषमिव वह्ने-

र्वह्निरेव शमनम् । तदन्यवह्निना वह्निप्रदीपनं शमनीयम्" । राज्ञा च तथाकृते प्रदीपनमशाम्यत् । ततः **प्रद्योते**न दत्तं तृतीयं वरं चाऽ**भयः** पूर्ववदेव न्यासीचकार । अन्यदा चाऽ**वन्त्यां** महत्यमङ्गले समुत्थिते तदुपशमाय **प्रद्योते**न पृष्टोऽ**भयकुमार** आह-"सर्वा देव्यो विभूषिताः सभायामागच्छन्तु, तासु या भवन्तं दृष्ट्या जयति सा मम कथनीया" । तथैव कृते च नृपः केवलं **शिवया** देव्या विजितः । तच्चाऽ**भया**य नृपः कथयामास ।

ततोऽ**भय** उवाच-"देवी **शिवा** स्वयं रात्रौ कूरबलिना भूतानां पूजनं करोतु, यद्यद् भूतं च शृगालीरूपेणोत्तिष्ठद्वासितं करोति, देवी **शिवा** तस्य तस्य मुखे स्वयं कूरबलिं ददातु" । ततः **शिवादेवी** तथैव चकार । तेन चाऽमङ्गलमुपशान्तम् ।

ततः **प्रद्योते**न चतुर्थे वरे दत्तेऽ**भयो**ऽयाचत-"त्वयि **नलगिरौ** गजे निषादिनि सति **शिवा**ङ्कस्थोऽहम**ग्निभीरु**श्च दारुरचितां चितां प्रविशामि" । ततो विषण्णः **प्रद्योत**स्तद्वरं दातुमक्षमः प्राञ्जलिर**भयं** विससर्ज । ततोऽ**भयः** प्रत्यजानात्-"त्वया च्छलादहमत्राऽऽनीतः । त्वां तु दिन एव नगरमध्ये रटन्तमहं नेष्यामि" । ततोऽ**भयकुमारो** **राजगृहं** गत्वा कञ्चित्कालं कथमपि तस्थौ ।

अथाऽ**भयकुमारो** रूपवत्यौ द्वे गणिकापुत्र्यावादाय वणिग्वेषोऽ**वन्तीं** गत्वा राजमार्गे गृहमादाय तत्राऽवसत् । मार्गे गच्छता **प्रद्योते**न च ते बालिके दृष्टे । ताभ्यां च **प्रद्योतः** सविलासं दृष्टः । ततो रागिणा **प्रद्योते**न गृहं गत्वा प्रेषिता दूती ते अनुनयन्ती ताभ्यां कोपाद् गृहाद् निःसारिता । द्वितीये दिने चाऽपि नृपाय तया दूत्याऽनुनीयमानाभ्यां ताभ्यां सा दूतिका सक्रोधमपमानिता । ततस्तृतीय-



दिवसेऽपि तया दूत्या प्रार्थिते ते ऊचतुः-"आवयोः सदाचारो भ्राताऽस्ति, स एव नौ रक्षति, तत्सप्तमे दिने तस्मिन् मम भ्रातरि बहिर्गते नृपो गुप्त इहाऽऽगच्छतु, ततः सङ्गमो भविष्यति" ।

इतश्चाऽ**भयेन** **प्रद्योत**सदृश एको निजपुरुष उन्मत्तः कृतः । तस्य **प्रद्योत** इत्याख्यां च चकार । लोके च "ममेदृशो भ्राता यत्र तत्र भ्राम्यन् रक्षणीयो मया । हा किं करोमी"त्यवदत् । तथा तं वैद्यगृहनयनकपटेन प्रतिदिनं बही रटन्तं मञ्चकस्थमार्त्तमिव निनाय । स चाऽ**भये**न नीयमानश्चतुष्पथे उन्मत्तः **प्रद्योतो**ऽहमनेन ह्रिये इत्युच्चैरश्रुमुखः पूच्चकार । सप्तमे दिने च नृपो गुप्त एकाक्येव कामार्त्तस्तत्र गतोऽ**भय**पुरुषैर्बद्धोऽ**भयेन** वैद्यगृहमसौ नीयते इति वादिना पर्यङ्केन सहैव दिने पुरमध्ये पूत्कुर्वन् हृतः । पुरैव क्रोशे क्रोशे स्थापितै रथैश्चाऽ**भयो** **राजगृहे** पुरे **प्रद्योत**मनयत् । ततोऽ**भयः** **प्रद्योतं** **श्रेणिक**स्य पुरस्ताद् निनाय । **श्रेणिक**श्च खड्गमाकृष्य तं प्रति दधावे । ततोऽ**भय**कुमारेण बोधितः **श्रेणिको** वस्त्राभरणैः सम्मान्य मुदा **प्रद्यो**तं व्यसृजत् ।

❀ ❀ ❀

अथाऽन्यदा कश्चित् काष्ठभारिको विरक्तो गणधरस्य **सुधर्मस्वामिनः** पार्श्वे प्रव्रजितः । स च नगरे विहरन् पौरैः पूर्वावस्थोद्घाटनपूर्वकं भर्त्सितो निन्दितश्च तदपमानं सोढुमधीरोऽन्यतो विहरतेति गुरुं **सुधर्मस्वामि**नमुवाच । ततोऽन्यत्र विहारार्थं **सुधर्मस्वामि**ना पृष्टोऽ**भयः** कारणं पृच्छन् तत्कारणं ज्ञापितः प्रणम्योवाच-"दिनमेकं प्रतीक्षन्तामूर्ध्वं च यथेष्टं कुर्वताम्" । एवमुक्त्वा च स राजकुलाद् रत्नानां कोटित्रयं बहिरानीय "लोका एतां रत्नकोटिं दास्यामि, तदागच्छते'ति पटहेन नगरे घोषयामास । ततः सर्वे जनाः समाजग्मुः ।

ततोऽ**भय** उवाच-''यो जला-ऽग्नि-स्त्रीवर्जकस्तस्याऽयं रत्न-समूहो दीयते'' । ततोऽलौकिकमिदं कर्त्तुं न कोऽपि क्षम इति भाषमाणेषु ते**ष्वभय** उवाच-''यदि युष्मासु नेदृशः कश्चित् तर्हि रत्नकोटित्रयं जला-ऽग्नि-स्त्रीवर्जकाय मुनये काष्ठभारिणे एवाऽस्तु'' । ततस्ते ऊचुः-''असौ मुनिरीदृशोऽस्ति । पात्रदानं युक्तम् । अस्माभिर्मुधैवाऽसौ हसितः'' । ततोऽद्यप्रभृति मुनेरस्य भर्त्सनोप-हासादिकं न युष्माभिर्विधेयमित्येव**मभया**देशं स्वीकृत्य लोका जग्मुः । एवं स धीमान् पितृभक्तो निरीहो धार्मिकोऽ**भयः** पितू राज्यं शशास ।

अन्यदा च **श्रेणिक**स्तमुवाच-''वत्स ! राज्यं त्वं गृहाण, अहं **वीर**जिनं सेविष्ये'' । ततोऽ**भय** उवाच-''भवदादेशः प्रमाणम् । किन्तु क्षणं प्रतीक्षध्वम्'' । इतश्च **वीर**जिन **उदायनं** नृपं प्रव्राज्य मरुमण्डला तत्राऽऽगत्य समवार्षीत् । तज्ज्ञात्वा चाऽ**भयो** हृष्टो गत्वा प्रभुं नत्वा भक्त्या स्तुत्वा च पुनर्नत्वा पप्रच्छ-''कोऽन्तिमो राजर्षिः ?'' **उदायन** इति प्रभुणोक्ते च कोऽय**मुदायन** इति पप्रच्छ ।

ततः प्रभुरुवाच-''**सिन्धुसौवीर**देशे **वीतभया**ख्ये नगरे **उदायन** नामा नृपोऽभूत् । तस्य च महाप्रतापिनो धर्मरता सम्यग्दृष्टिः **प्रभावती** नाम भार्याऽऽसीत् । तस्य च नृपस्य **प्रभावत्यामभीचि**-नामा युवराजः पुत्रः **केशि**नामा भागिनेयश्चाऽभूत् । इतश्च **चम्पा**नगरे स्त्रीलम्पटो धनाढ्यः **कुमारनन्दी**ति ख्यातः स्वर्णकारो बभूव । स च श्रुतां दृष्टां च रूपवतीं कन्यां स्वर्णपञ्चाशतीं दत्त्वा परिणिनाय । एवं क्रमात् तस्य स्त्रीपञ्चशती जाता । स चेर्ष्यालुरेकस्तम्भे प्रासादे ताभी रेमे । तस्य चाऽतिमित्रं **नागिलो** नाम श्रमणभक्तः पञ्चाऽणुव्रतधरश्चाऽभूत् ।



एकदा च शक्राज्ञया **पञ्चशैल**द्वीपस्थे व्यन्तरदेव्यौ **नन्दीश्वर**-यात्रार्थं प्रस्थितवत्यौ । तदानीं च तत्पतिः **पञ्चशैले**शो **विद्युन्माली** च्युतवान् । ततस्ते दध्यतुः-''कोऽद्य ग्राह्यो यो नौ पतिर्भवेत्'' । एवं विचार्य गच्छन्तीभ्यां ताभ्यां स्त्रीपञ्चशत्या रममाणः **कुमारनन्दी चम्पा**यां दृष्टः । ततस्ते पतीच्छया तद्ग्रहार्थं तत्समीपेऽवतेरतुः । **कुमारनन्द्य**पि च ते दृष्ट्वा के युवामिति पप्रच्छ। ततस्ते ऊचतुः-''मनुष्य ! नाम्ना **हासा प्रहासा** चाऽऽवां देव्यौ'' । स च ते दृष्ट्वा मोहं गतो रिरंसया ते प्रार्थयन् **पञ्चशैल**द्वीपे समागच्छेरिति ताभ्यामुक्तः । ततस्ते देव्यावुत्पतिते । स्वर्णकारश्च राज्ञे सुवर्णं दत्त्वा पटहघोषणां कारयामास- ''यो मां **पञ्चशैल**द्वीपे नेष्यति स द्रव्यकोटिं लप्स्यते'' ।

तत एको वृद्धः पटहं धृत्वा धनमादाय पुत्रेभ्यो ददौ । तथैकं यानपात्रं कारयित्वा भूयसा शम्बलेन तदपूरयत् । **कुमारनन्दि**ना सह यानपात्रमधिरुह्य सोऽब्धौ दूरं गत्वा स्थविरस्तमुवाच-''पश्य, समुद्रतटे शैलपादजातो वटोऽयं दृश्यते, यदा यानपात्रं तदधो याति तदाऽस्मिन् विलग्नो भवेः । इह **पञ्चशैला**त् त्रिपदा भारुण्डाः पक्षिणः समागमिष्यन्ति । तेषु सुप्तेषु चैकस्य कस्याऽपि मध्यमे पादे स्वं पटेन दृढं बद्ध्वा दृढमुष्टिर्गृह्णीयाः । प्रातश्चोड्डीना भारुण्डास्त्वां **पञ्चशैल**द्वीपं नेष्यन्ति । ततः परं यानपात्रं च महागर्ते विनङ्क्ष्यति । वटेऽविलग्नश्च त्वमपि नाशमेष्यसि'' । स स्वर्णकारस्तथैव चकार । भारुण्डपक्षिणा तत्र **पञ्चशैले** नीतश्च ताभ्यां देवीभ्यां दृष्टः । ते दृष्ट्वा च स नितरां रागाविष्टो जातः ।

ततस्ताभ्यां स उक्तः-''भद्र ! अनेनाऽङ्गेनाऽऽवां तव न भोग्ये । तदग्निप्रवेशादिना **पञ्चशैले**शो भव'' । ततः स स्वर्णकारो

व्यामूढः किं करोमि क्व यामीति भाषमाणस्ताभ्यां पाणौ कृत्वा **चम्पापुरो**द्याने मुक्तः । तत्र स लोकेनोपलक्ष्य वृत्तं पृष्टश्च निजां कथामाख्याय **हासां प्रहासां** च स्मरन्नग्निसाधनं प्रचक्रमे । तदा च स **नागिल**ेन मित्रेणाऽऽगत्य प्रतिबोधितः-''कातरोचितं मरणं न तव युक्तम् । तुच्छभोगसुखार्थं दुर्लभं नरभवं न गमय । भोगेच्छैव चेत् तव तर्हि जैनं धर्ममाश्रय । तेन हि स्वर्गा-ऽपवर्गसुखम् सुलभम्'' । एवं तेन प्रतिबोधितोऽपि सोऽग्निमरणेन **पञ्चशैले**शोऽभवत् । **नागिल**श्च मित्रस्य तादृशमरणेन निर्विण्णः प्रव्रज्य तपस्तप्त्वा विपद्याऽ**च्युते** कल्पे देवभूयं प्राप्याऽवधिना मित्रं **पञ्चशैल**स्थं दृष्टवान् ।

तदा च **नन्दीश्वर**यात्रायां प्रस्थितानां देवानां पुरो गातुं प्रस्थिते **हासा-प्रहासे विद्युन्मालिनं** पटहं ग्रहीतुमादिशताम् । ततः स उवाच- ''किं ममाऽपि कोऽप्याज्ञाकरः प्रभुः ?'' तेनाऽहङ्कारेण च पटहस्तस्य गलेऽलगत् । स च लज्जितस्तत्पटहमङ्गे लग्नं नोत्तारयितुं शशाक । ततो **हासा-प्रहासे** ऊचतुः-''इह जातानामिदं कर्म, तल्लज्जां मा गाः, चल, त्वं पटहं वादयिष्यसि'' । ततो गायन्तीभ्यां ताभ्यां सह स पटहं वादयन् देवानां पुरतोऽगात् । **नागिलो** देवश्च यात्रायां गच्छन् **हासा-प्रहासा**वृन्दे तं पटहधरं देवं **विद्युन्मालि**नं दृष्ट्वाऽवधेः सुहृदं ज्ञात्वाऽभिभाषणं कर्तुं तत्समीपमुपजगाम । स **विद्युन्माली** चोलूकः सूर्यस्येव **नागिल**देवस्याऽङ्गप्रभाप्रकाशं दूरादपि द्रष्टुमप्यक्षमः पलायामास । ततो **नागिल**देवः स्वं तेजः संहृत्य **विद्युन्मालिन**मुवाच-''पश्य, मां जानासि किम् ?''

ततो **विद्युन्माल्यु**वाच-''अहं तु महर्द्धीन् देवानिन्द्रादिकानपि न जानामि'' । ततो **नागिल**देवः स्वं श्रावकरूपं कृत्वा तं



प्रतिबोधयामास-''मित्र ! मदुपदेशे सत्यपि जैनं धर्मं विहाय पूर्वजन्मनि पतङ्ग इवाऽग्निमरणमकार्षीः । अहं तु जैनः प्रव्रज्यां पालयन् विपद्याऽ**च्युते** देवोऽस्मि । तदावयोः स्वस्वकर्मण ईदृशः परिणामः'' । ततो निर्विण्णं किं करोमीति भाषमाणं **विद्युन्मालि**नं **नागिलदेव** उवाच-''गार्हस्थ्यचित्रशालायां कायोत्सर्गस्थस्य भावयतेः प्रभो**र्वीर**स्य मूर्तिं कारयेः । तेन चाऽन्यस्मिन् भवे तव महाफलं बोधिबीजमुत्पत्स्यते'' । ततो **विद्युन्माली** तदाज्ञां स्वीकृत्य शीघ्रमेव **क्षत्रियकुण्ड**ग्रामेऽस्मान् प्रतिमास्थितान् दृष्ट्वा **महाहिमवन्तं** गत्वा गोशीर्षचन्दनं छित्त्वा यथादृष्टमस्मन्मूर्तिं सालङ्कारां कृत्वा **चन्दनकाष्ठ**पुरे तां निधानमिव स्थापयामास ।

तदानीं चैकस्य प्रवहणस्योत्पातवशात् समुद्रे भ्रमतः षण्मासी व्यतिक्रान्ता । **विद्युन्माली** च तं दृष्ट्वोत्पातं संहृत्य पोतवणिजे प्रतिमासहितं समुद्गं दत्त्वोवाच-''तुभ्यं स्वस्ति, त्वं निरुपद्रवं **सिन्धुसौवीर**देशे **वीतभय**पुरं गत्वा तच्चतुष्पथे स्थित्वा देवाधिदेवप्रतिमा गृह्यतामिति घोषयेः'' । स सांयात्रिकोऽपि सद्यः प्रतिमाप्रभावाद् नदीमिवाऽब्धिमुत्तीर्य तटं प्राप्य **सिन्धुसौवीर**देशे गत्वा **वीतभये** पुरे गत्वा चतुष्पथे स्थित्वा तथैव घोषणां चकार ।

तत्र च तापसभक्त **उदायनो** राजा त्रिदण्डिनो ब्राह्मणास्तापसाश्च समाजग्मुः । लोकाश्च ब्रह्माद्यादिकं स्मृत्वा तत् **काष्ठपुरं** कुठारेणाऽऽजघ्नुः । किन्त्वायसा अपि कुठारा एवाऽभज्यन्त । ततो विस्मितस्य नृपस्य प्राततरारभ्य मध्याह्नो जातः । राज्ञी **प्रभावती** च राज्ञो भोजनकालातिक्रमं ज्ञात्वा तमाकारयितुं चेटीमादिशत् । तदा तदाश्चर्यं द्रष्टुं राजादिष्टा **प्रभावत्य**पि तत्राऽऽगत्य राज्ञः सकाशाद् वृत्तं ज्ञात्वोवाच-''ब्रह्मादयो न देवाधिदेवाः, किन्तु जिनः ।

तज्जिनप्रतिमैवाऽत्र भविष्यति । ब्रह्मादिनामस्मरणात् तद्दर्शनं दुर्लभम् । अहं जिननामस्मरणेन तत्प्रतिमां दर्शयामि'' ।

ततः सा यक्षकर्दमेन सम्पुटमभिषिच्य पुष्पाञ्जलिदानपूर्वकं प्रणम्य देवाधिदेवो जिनो मम दर्शनं देयादित्युक्तवती । तस्यामेवं ब्रुवाणायामेव सम्पुटं प्रातः कमलकोशवद् विकसितं जातम् । तत्र च गोशीर्षचन्दनेन देवनिर्मिता सालङ्काराऽम्लानमाल्या प्रतिमाऽदृश्यत । तेन च जिनशासनस्य महती प्रभावना जाता । **प्रभावती** च तत्प्रतिमां नत्वा भक्त्या स्तुत्वा सांयात्रिकं बन्धुवत् सत्कृत्य सोत्सवं प्रतिमामन्तःपुरं नीत्वा चैत्यगृहं कारयित्वा तत्र स्थापयित्वा सा स्नानपूर्वकं त्रिसन्ध्यं पूजयामास ।

एकदा च तां प्रतिमामर्चित्वा **प्रभावती** नृपेण सह सङ्गीतं चकार नृपश्च वीणामवादयत् । अन्यदा च नृपः **प्रभावत्याः** शिरो न ददर्श । तत्कबन्धमेव नृत्यन्तं ददर्श । तदरिष्टदर्शनेन सद्यः क्षुब्धस्य नृपस्य निद्रां भजमानस्य कराद् वीणा पतिता । ततोऽनवसरे नृत्यच्छेदकुपिता राज्युवाच-''किमहं तालच्युताऽस्मि, यद्वादनाद् विरतोऽसि?'' ततो राजा तदाग्रहाद् वीणापातकारणं कथयामास । ततो राज्युवाच-''प्रिय ! अनेन दुर्निमित्तेनाऽहमल्पायुः, जिनधर्मरताया मम मृत्युरप्यस्तु, दुर्निमित्तस्य दर्शनं मम सर्वविरतिज्ञापनाय'' । एवमुक्त्वा साऽन्तःपुरं गता । नृपश्च श्रुतजिनधर्मा विमना जातः ।

अन्यदा च स्नानादिकं विधाय **प्रभावती** देवपूजाकाले दास्या योग्यानि वस्त्राण्यानाययामास । किन्तु भाव्यनिष्टवशात् तानि रक्तानि दृष्ट्वाऽस्मिन्नवसरे किमनर्हाण्यमून्यानीतानीति कुपिता दासीं दर्पणेन



जघान । सा च दासी तद्घातेन विपन्ना । **प्रभावती** च तत्कालमेव तानि वस्त्राण्युज्ज्वलानि दृष्ट्वा दध्यौ-''मां धिक् यद् व्रतं खण्डितम् । स्त्रीघातो हि महतेऽश्रेयसे, तन्मम व्रतग्रहणमेव श्रेयः''। एवं ध्यात्वा सा **प्रभावती** नृपाय तद्दुर्निमित्तं दासीवधपापात् स्ववैराग्यं च कथयित्वा व्रतायाऽनुज्ञां ययाचे । तया सनिर्बन्धं प्रार्थितश्च नृप उवाच-''तुभ्यं यद् रोचते तथा कुरु, किन्तु देवत्वं प्राप्तया त्वयाऽहं बोधनीयः'' । ततः **प्रभावती** सर्वविरतिव्रतं गृहीत्वाऽनशनेन विपद्य प्रथमे कल्पे देवोऽभूत् ।

अथ तामन्तःपुरचैत्यस्थां जिनप्रतिमां **देवदत्ता**ख्या कुब्जिका दासी पूजयामास । **प्रभावती**देवेन बोधितोऽपि स **उदायनो** नाऽबुध्यत । ततः स देवोऽवधेरुपायं ज्ञात्वा तापसीभूय दिव्यामृतफलसंभृतपात्रपाणिरागत्यो**दायनं** नृपमुपाजगाम । राजा च तापसभक्तत्वात् तं पूजयामास तथा तद्दत्तानि फलानि दिव्यानि भक्षयामास च । ततः क्वैतानि फलानि प्राप्तानि ? तत्स्थानं दर्शयेति नृपस्तापसमपृच्छत् । ततस्तापस उवाच-''अस्य नगरस्य समीप एवाऽऽश्रमे एतत् फलं जायते'' । तमाश्रमं दर्शयेति कथयन्तं च नृपं स तापसीभूतो देवः स्वशक्त्यैकाकिनं विधाय विद्यां दातुमिव सहाऽऽनीय किञ्चिद् गत्वा तादृक्फलसुभगमनेकतापससमन्वितमुद्यानं विकृत्य दर्शयामास । नृपश्च तापसभक्तस्य ममाऽत्र वने फलेच्छा पूरिष्यते इति कपिवद् दधावे ।

ततः सक्रोधं धावमानैस्तैः कृत्रिम-तापसैस्तस्करवत् कुट्यमानः पलायमानः स नृपोऽग्रेऽवस्थितान् साधून् दृष्ट्वा मा भैषीरिति कथयतस्तान् शरणं प्रपेदे । तैराश्वासितश्च नृपो दध्यौ-धिक्, आजन्म क्रूरैस्तापसैर्वञ्चितोऽस्मि'' । साधवश्च तमुपदिदिशुः-भवे धर्मः

शरणं, धर्मार्थी च देवं धर्मं गुरुं च परीक्षेत । देवोऽष्टादशदोषमुक्तः, धर्मो दयापरः, गुरुश्च ब्रह्मचारी सर्वविरतः" । एवमुपदेशेन प्रतिबोधितो नृपो जिनधर्मे श्रद्धालुर्जातः। ततो देवः प्रत्यक्षीभूय तं नृपं जिनधर्मे संस्थाप्य तिरोबभूव । नृपश्च स्वं स्वसभास्थमेवैक्षत । तदुपदेशाच्च तत्प्रभृत्य**उदायनः** सम्यक्त्ववान् जातः ।

❀ ❀ ❀

इतश्च **गान्धार**देशोद्भवो **गान्धारो** **वैताढ्ये** शाश्वतार्हत्प्रतिमा वन्दितुं गतः । शासनदेवीदर्शनार्थं **वैताढ्य**मूले स्थित उपवासान् चकार सः । तेन तुष्टा च शासनदेवी तस्य दर्शनं दत्त्वा सफलमनोरथं तं **वैताढ्य**तले मुक्त्वाऽभीप्सितप्रदमष्टोत्तरं गुटिकाशतं ददौ । स चैकां गुटिकां मुखे क्षिप्त्वा **वीतभय**पुरेऽर्हत्प्रतिमां वन्दितुं मनश्चकार। तच्चिन्तयन्नेव स **वीतभय**पुरं प्राप्तः । कुब्जा च तेनाऽर्हत्प्रतिमा अवन्दयत् । अन्यस्मिन् दिने च **गान्धार**स्य शरीरास्वास्थ्यं जातम्। तेन च जिनधर्मपरायणा कुब्जा तमुपचचार। **गान्धार**श्च स्वमृत्युं सन्निहितं ज्ञात्वा कुब्जायै गुटिका दत्त्वा स्वयं प्रव्रजितवान् ।

कुब्जा च कुरूपा सुरूपतार्थमेकां गुटिकां मुखे क्षिप्त्वा देवीव दिव्यरूपा जाता । गुलिकामाहात्म्यात् सुवर्णवर्णा जातां तां लोकः **सुवर्णगुलिके**त्याख्यत् । ततः सा द्वितीयां गुटिकां मुखे क्षिप्त्वा दध्यौ-"अनुरूपभर्तुरभावे ईदृङ् मे रूपं वृथैव, तत**श्चण्डप्रद्योत** एव मम पतिरस्तु" । ततो देवता **प्रद्योत**स्याऽग्रे तद्रूपं वर्णयामास। **प्रद्योतो**ऽपि च कुब्जां प्रार्थयितुं दूतमाज्ञापयामास । दूतेन गत्वा प्रार्थिता च सा **प्रद्योतं** दर्शयेत्याख्यातवती । दूतश्च **प्रद्योता**य तद् निवेदयामास । ततः **प्रद्योतो**ऽ**निलवेगं** गजमारूढो रात्रावागतवान्। द्वयोश्च परस्परमनुरागो जातः । ततः **प्रद्योतः** कुब्जां स्वपुरगमनाय कथयामास ।



ततः कुब्जोवाच-"देवाधिदेवप्रतिमा मम प्राणेभ्योऽपि प्रिया, तां मुक्त्वा कथमहं यामि ? तदस्याः प्रतिमायाः प्रतिकृतिमानय, तामत्र मुक्त्वेमां च नीत्वा गमिष्यामि" । ततः **प्रद्योत**स्तत्प्रतिमारूपं मनस्यवधार्य तया रात्रिं व्यतीत्य प्रभातेऽ**वन्त्यां** गत्वा जात्यचन्दन-काष्ठेन यथादृष्टं प्रतिमां कारयित्वा सचिवानपृच्छत्-"मया कारितेयं नवा प्रतिमा, अस्याः कः प्रतिष्ठां कारयिष्यति ?" ततो मन्त्रिण ऊचुः-

"देव ! **कौशाम्ब्यां जितशत्रु**र्नृपोऽभूत् । तस्य पुरोहितश्च **काश्यपो** नाम सर्वविद्याकुशलोऽभूत् । तस्य भार्या च **यशा** नामाऽऽसीत् । तयोश्च **कपिलो** नाम पुत्रोऽभूत् । तस्य बाल्य एव **काश्यपो** मृत्युं प्राप । तेन च स **कपिलो**ऽनाथो जातः । नृपश्च तं बालमनादृत्य **काश्यप**स्य पदेऽन्यं ब्राह्मणं न्यधात् । ततः स द्विजश्छत्रधरो हयारूढो नगरे बभ्राम । तं तथा दृष्ट्वा च **कपिल**माता पतिसमृद्धिं स्मृत्वा रुरोद । **कपिलो**ऽपि च मातरं रुदतीं दृष्ट्वोच्चै रुरोद । ततः **कपिलः** साश्रुर्मातुर्मुखमुन्नमय्य किं रोदिषीति पप्रच्छ। ततः सोवाच-"यथाऽयं द्विजः समृद्धोऽस्ति, तथैव तव पिता-ऽप्यासीत् । तत् स्मृत्वा रोदिमि । त्वत्पितुर्लक्ष्मीर्ह्यनेनाऽऽप्ता, यतस्त्वं गुणवान्नाऽसि" ।

ततः **कपिल** उवाच-"मातर्गुणेच्छुरहं पठितुमिच्छामि" । तच्छ्रुत्वा च सोवाच-"सर्वोऽत्रेर्ष्यालुः, त्वां कोऽध्यापयिष्यति ? यदि त्वं पिपठिषसि तर्हि **श्रावस्तीं** पुरीं गच्छ । तत्र

त्वत्पितुर्मित्र**मिन्द्रदत्तो** द्विजोऽस्ति, स त्वां पुत्रमिव पाठयिष्यति" । ततः **कपिलो** गत्वे**न्द्रदत्तं** नत्वा स्वपरिचयं ददौ । अशरणं मामध्यापयेति प्रार्थयामास च । ततः स द्विज उवाच-"त्वं मे भ्रातुष्पुत्रोऽसि, तव मनोरथः श्लाघ्यः । किन्त्वहं निष्परिग्रह-स्तवाऽऽतिथ्येऽप्यशक्तः । तत्तव नित्यभोजनं क्व स्यात् ? भोजना-भावे च पाठेच्छा व्यर्थैव" । ततः **कपिल** उवाच-"भिक्षयैव भोजनं स्यात् । द्विजानां हि भिक्षा न लज्जायै" ।

तत **इन्द्रदत्त** उवाच-"भिक्षा तपस्विनां श्रेष्ठा, यदैकदा भिक्षां नाऽऽप्स्यसि कथं पठिष्यसि ?" एवमुक्त्वा स द्विजस्तं बालं हस्ते गृहीत्वा **शालिभद्र**श्रेष्ठिनो गृहमागत्य गायत्रीमन्त्रमुच्चैरुच्चरन् स्वं ब्राह्मणं निवेद्य बहिः स्थितवान् । स श्रेष्ठ्यपि तमाहूय किं याचसे इति पप्रच्छ । ततः स विप्र उवाच-"अस्य बालस्य प्रतिदिनं भोजनं देहि" । श्रेष्ठी च तत् प्रतिपन्नवान् ।

ततः **कपिलः** प्रत्यहं तद्गृहे भुञ्जानोऽध्यैत । **शालिभद्र**गृहे भोजनार्थं गतस्य **कपिल**स्य चैका युवतिर्दासी विशिष्टं परिवेषयामास । स **कपिल**श्च युवा हासशीलश्च तस्यामनुरक्तो बभूव। साऽपि च तस्मिन्ननुरक्ता जाता । तौ च क्रमेण यथेच्छं रेमाते । एकदा चाऽन्यमनिच्छन्त्यपि दासी तं रहस्यमुक्तवती-"त्वमेव मे प्राणेश्वरः, किन्तु निर्धनोऽसि, तदुदरपूर्त्तयेऽपरं पुरुषं भजे" । स **कपिलो**ऽपि तदन्वमन्यत ।

अन्यदा च तस्मिन्नगरे दासीनामुत्सवः प्रावर्त्तत । सा दासी च पुष्प-पत्रादिचिन्तया खेदं प्राप । **कपिले**न खेदकारणं पृष्टा च सोवाच-"अद्य दासीनामुत्सवोऽस्ति, मम पुष्प-पत्रादि नास्ति, तेन च दासीनां मध्ये मम हीनता स्यात्, तेन खिन्नाऽस्मि" । **कपिल**श्च



तद्दुःखदुःखितो मौनमालम्ब्य तस्थौ । ततो दास्युवाच-"मा विषीद, अत्र **धन**श्रेष्ठ्यस्ति, रात्र्यन्ते यस्तं प्रबोधयति तस्मै स स्वर्णमाषौ ददाति । त्वमविभातायामेव रात्रौ तद्गृहं गत्वा मधुरस्वरेण मङ्गलं पठेः" । **कपिल**श्च तत् प्रतिपद्य तस्यामेव रात्रौ **धन**श्रेष्ठिगृहं वेगाद् गच्छन् पुररक्षकैर्मार्गे चौरधिया धृत्वा बद्धः । तथा प्रातः **प्रसेनजिन्**नृपस्य पुरो नीतश्च पृष्टश्च स्वर्णमाषकथां कथयामास । नृपश्च तच्छ्रुत्वा जातदय उवाच-"यथेष्टं याचस्व, तदवश्यं तुभ्यं दास्ये" ।

ततः स **कपिलो** विचार्य याचिष्ये इत्युक्त्वाऽ**शोक**वने गत्वा योगीवैकचित्तौ भूत्वा दध्यौ-"द्वाभ्यां माषाभ्यां वस्त्रादि न स्यात् । तन्नृपात् सुवर्णशतं याचे । यद्वा सुवर्णशतेन वाहनादि न स्यात्, तत्सुवर्णसहस्रं याचे । अथवा सहस्रेण ममाऽपत्यविवाहाद्युत्सवो न सम्पादितः स्यादिति लक्षं याचे । लक्षमपि चाऽल्पमेव । यतस्तेन मित्र-बन्ध्वादिपालनं न भवेत् । तत्कोटिं कोटिशतं कोटिसहस्रं वा याचे" । एवं ध्यायतश्च तस्य शुभकर्मोदयाच्छुभपरिणामो जातः । ततः स दध्यौ-"पुरा माषद्वयेनाऽपि मम सन्तोषो भवति । अद्य तु कोटिप्राप्तावपि न । विद्यार्थमिहाऽऽगतस्य ममेदं दुर्व्यसनं जातम् । गुरोर्मयि ज्ञानदानमूषरे बीजवाप इवाऽजनि, यत्कुलोपहासकरं दास्या अपि दासत्वमकार्षम् । तदेभिर्विषयैः कृतम्" । एवं संविग्नः स जातजातिस्मरणः स्वयंबुद्धो बभूव ।

ततः केशानुत्पाट्य देवतादत्तं धर्मोपकरणमादाय नृपमुपगतः पृष्टश्च स्वमनोरथं सविस्तरमाख्यायोवाच-"यथा लाभस्तथा लोभो, लाभाद् लोभः प्रवर्धते । द्विमाष्या चिन्तितं कार्यं कोट्याऽपि न समापितम्" । ततश्चकितो नृप उवाच-"विप्र ! कोटीरपि ते ददामि,

भोगान् भुङ्क्ष्व व्रतं मुञ्च" । ततः **कपिल** उवाच-"अर्था अनर्थायैव तदेभिरलम् । अहं निष्परिग्रहो जातोऽस्मि, ते धर्मलाभोऽस्तु" । एवमुक्त्वा ततो निर्गत्य निर्ममः **कपिल**मुनिर्महीं विहरन् षण्मासानन्तरं केवलं प्राप्तवान् ।

इतश्च **राजगृह**नगरस्य मध्येऽष्टादशयोजनदीर्घं भयङ्करं वनमभूत् । तत्र च **कडदासा**ख्या बलभद्रादयश्चौराणां पञ्चशतान्यभवन् । **कपिल**श्च तान् बोधयोग्यान् ज्ञात्वा तद् वनं प्राप । कपिवत् तरुशिखरमारूढश्चैकश्चौरो मुनिं **कपिलं** दूरादागच्छन्तं दृष्ट्वा कोऽयं नोऽवगणय्येहाऽऽगच्छतीति विचार्य सेनापतये कथयामास । स मुनिश्च सेनापतिमुपाजगाम । ततः सेनानीर्दिष्ट्या क्रीडनकमागतमिति वदन् श्रमणक ! नृत्य नृत्येति मुनिमाज्ञापयामास ।

ततः **कपिल** उवाच-"वादकः कोऽपि नास्ति, तं वाद्यं विना च नृत्यं न शोभनं स्यात्" । ततस्ते सर्वेऽपि चौरास्तालिकामेव वाद्यमकार्षुः । कपिलश्चोच्चैर्नृत्यति स्म, श्रवणसुखं गायति स्म च । दुःखबहुलेऽनित्येऽस्मिन् भवे किं तत् कर्म येनाऽहं दुर्गतिं न गच्छेयमि"त्याद्यर्थकाः पञ्चशतानि ध्रुवाः स मुनिर्गायति स्म । मुनिना तेन ध्रुवासु गीयमानासु ते चौराः प्रतिबोधं प्राप्तवन्तः । ततः स महामुनिस्तानि चौराणां पञ्चाऽपि शतानि प्राव्राजयत् ।

स **कपिलो** मुनिः श्री**वीर**जिनाज्ञां प्रतिपद्याऽत्रैव **राजगृहे** पुरेऽस्ति । स एव श्वेताम्बरमुख्यः स्वयंबुद्धः केवली त्वत्पुण्योदयात् प्रतिष्ठां करिष्यति । ततः **प्रद्योते**न प्रार्थितः **कपिलः** केवली मन्त्रपूतवासक्षेपं कुर्वन् प्रतिमाप्रतिष्ठां चकार । ततो नृपस्तां प्रतिमां चन्दनैश्चर्चयित्वा पूजयित्वा भुजाभ्यामुद्धृत्य च हृदि संस्थाप्याऽ**निलवेग**स्य स्कन्धे स्थापयामास । सैनिकवत् स्वयमारूढश्च तां



धारयामास । तथा तेन वेगवता गजेन **वीतभयं** पुरं गत्वा दास्यै तां प्रतिमां समर्पयामास । सा च तां प्रतिमां चैत्ये स्थापयित्वा पुरातनीं प्रतिमामादायाऽऽगता । नृपश्च प्रतिमां दासीं च गजे आरोप्य स्वयं चाऽऽरुह्य शीघ्र**मवन्तीं** प्राप ।

अन्यदा च राज्ञा कुब्जिकया च **विद्युन्मालि**निर्मिता गोशीर्षकाष्ठप्रतिमा विदिशापुर्या वणिजो **भायल**स्याऽर्पिता । एकदा च **भायलो** दीप्तिमन्तौ पूजोपकरणसहितौ द्वौ पुरुषौ दृष्ट्वा कौ युवामिति पप्रच्छ । ततस्तावूचतुः-"पातालभवनवासिनावावां **कम्बल-शम्बला**ख्यौ नागकुमारौ **धरणेन्द्रा**ज्ञया **विद्युन्मालि**-कृतामिमां देवाधिदेवप्रतिमां पूजयितुं पूजोपकरणसहितौ चैत्यमागच्छावः । आवामस्या विदिशानद्या ह्रदमध्यवर्तिमार्गेणाऽत्र मज्जनोन्मज्जने कुर्वः" ।

तच्छ्रुत्वा **भायल** आह-"युवां देवौ जिनभक्तस्य मे पाताले स्वभवनानि दर्शयतम् । तत्र हि शाश्वतार्हत्प्रतिमा वन्दितुं मम मनोरथः कृपया पूर्यताम् । देवदर्शनं हि न कदाऽपि मोघम्" । ततस्तौ देवौ तत् प्रतिपद्य त्वरयाऽर्धरचितार्चमेव **भायलं** तत्र नीतवन्तौ । **भायल**श्च तत्र शाश्वतार्हत्प्रतिमा ववन्दे । ततो **धरण**स्तं सन्तुष्ट उवाच-"वरं ब्रूहि" । ततो **भायल** उवाच-"मम नाम सर्वत्र यथा ज्ञायते तथाऽस्तु । नामस्थिरतैव हि नराणां पौरुषम्"।

तच्छ्रुत्वा **धरणेन्द्र** उवाच-"**चण्डप्रद्योत**नृपस्त्वन्नाम्ना देवपुरं कारयिष्यति । त्वं कृतार्धार्च एवाऽत्राऽऽगा इति कियति काले जाते गुप्तैव सा प्रतिमा मिथ्यादृग्भिरर्चयिष्यते । तथा तैस्तस्याः प्रतिकृति**र्भायल**स्वामिनामाऽयं सूर्य इति वादिभिर्बहिः संस्थापयिष्यते । ततश्च लोकस्तां प्रतिमां **भायल**स्वामिसूर्य इति

पूजयिष्यति" । ततो **भायल** उवाच-"अहं पापोऽस्मि, मां धिक्, मम स्वकृतमेवेदममङ्गलमापतितम् । यद्देवाधिदेवप्रतिमाप्रतिकृत्याः पूजा मन्नाम्ना सूर्य इति कृत्वा दुरात्मभिः करिष्यते" । ततो **धरण** उवाच-"शोकं मा कार्षीः, एतद्धि दुःषमाकालमाहात्म्यम्" । ततो **भायल**स्ताभ्यां नागकुमाराभ्यां तेनैव मार्गेण नीत्वा स्वस्थाने मुक्तः ।

इतश्च **वीतभय**पत्तने **उदायनो** नित्यकर्मपरायणः प्रातर्देवायतनं ययौ । अग्रे च म्लानमाल्यां प्रतिमां दृष्ट्वा दध्यौ-"प्रतिमेयं काऽप्यन्या, सा नैव । यतस्तस्यामारोपितानि माल्यानि द्वितीयदिने-ऽप्यम्लानान्येवाऽभूवन् । हहा ! किमिदं जातम् ? इह सर्वदैव पाञ्चालिकेव स्तम्भाश्रिता दासी देवदत्ताऽपि क्वाऽपि विलीनेव नाऽवलोक्यते । ग्रीष्मे मरुजलमिव गजानां मदो नष्टः । तद्-गन्धगजोऽ**निलवेग** इहाऽऽगादिति मन्ये । नूनं रात्रौ चौर इव **प्रद्योत**नृपोऽ**निलवेग**गजेनेहाऽऽगत्य प्रतिमां देवदत्तां चाऽऽपाहरत्" । तद्विमृश्योदायनस्तत्क्षणं सैन्यैः **प्रद्योत**मभिजगाम । तस्य दश नृपा अपि बद्धमुकुटास्तमनुजग्मुः । सैनिकाश्च तृष्णया भूमौ लुठन्तोऽपि जलं क्वाऽपि नाऽद्राक्षुः । तदानीं **चोदायन**स्तत्क्षणं स्वेष्टदेवतां **प्रभावती**देवं सस्मार । स देवश्च स्मृतिमात्रेनोपस्थितो जलेन त्रीणि सरांसि पूरयामास । तेन च सैनिका मुमुदिरे । पानीयं पायं पायं च कटकं सुस्थितमभूत् । ततः **प्रभावती**देवः स्वस्थानं जगाम । **उदायनो**ऽपि **चोज्जयिनीं** नगरीं प्राप ।

तत्रो**दायन**नृपस्य **प्रद्योत**नृपस्य च शीघ्रमेव दूतमुखेन कृत्वा मिथो स्वयुद्धप्रतिज्ञा जाता । ततो धनुर्धर **उदायनः** साङ्ग्रामिकं रथमारुरोह । रणतूर्यमिव च मौर्वीं वादयामास । **प्रद्योत**श्च



रथेनाऽजय्य**मुदायनं** ज्ञात्वा प्रतिज्ञां त्यक्त्वाऽ**निलवेगं** गजमारुरोह । **उदायन**श्च गजारूढं तं दृष्ट्वा मिथ्यावागसीति भर्त्सयित्वा मण्डलिकया स्वयं वेगपूर्वकं रथं भ्रमयित्वा **प्रद्योते**न सह योद्धुं प्रावर्त्तत । स धन्वी तीक्ष्णैर्बाणै**रनिलवेग**स्य गजस्य पादतलानि समन्ताद् विव्याध । ततो बाणविद्धैः पादैर्गन्तुमक्षमः स गजः पपात ।

तत **उदायनः प्रद्योतं** गजात् पातयित्वा हस्तेन गृहीत्वा बद्ध्वा तन्मस्तके दासीपतिरित्यक्षराङ्कं चकार । तमङ्कितं **प्रद्योतं** दासमिव कृत्वो**दायनो** दिव्यप्रतिमां तामानेतुं विदिशां गत्वा तां पूजयित्वा नत्वा च यावद् ग्रहीतुमुपचक्राम तावत् सा गिरिवत् स्थिरा न चचाल । तत **उदायनो** नृपो देवाधिदेवं विशेषतः पूजयित्वोवाच-"किं ममाऽभाग्यं यद्देवो न याति" । तत्र देव उवाच-"शोकं मा कार्षीः । **वीतभय**पुरं रजोवृष्ट्या स्थलं भावि तत्तत्र न गमिष्यामि" । तत **उदायनो** देवताज्ञां प्राप्य निववृते । किन्तु मध्य एव प्रयाणप्रतिरोधकः प्रावृडुतुः प्रावर्त्तत । तत **उदायन**स्तत्रैव शिबिरं स्थापयामास । दश नृपाश्च शिबिररक्षार्थं धूलिप्राकारं कृत्वा तस्थुः । तेन तच्छिबिरं **दशपुरं** नगरमिति ख्यातम् । युद्धे गृहीतं **प्रद्योतं चोदायनः** क्षात्रधर्मं पालयन् भोजनादिनाऽऽत्मानमिवाऽपश्यत् ।

अन्यदा च पर्युषणापर्वणि प्राप्ते **उदायनो** देवाज्ञयोपवासं चकार । किमद्य भोक्ष्यसे इति सूदेन पृष्टश्च **प्रद्योतः** क्षोभाद् दध्यौ-"प्रश्नोऽयमभूतपूर्वो न मम कल्याणाय, एतद्धि वधादिसूचकमुप-हासवचनमेव" । स सूदमपृच्छत्-"किमद्य पृच्छसि ? सर्वदा त्वपृष्ट्वैव रसवती मदर्थं सम्पाद्यते" । ततः सूद उवाच-"नृप !

पर्युषणोत्सवोऽद्य, मम स्वामी च सान्तःपुरपरिच्छदोऽद्योपोषितोऽस्ति । त्वं च सदा नृपार्थं कृतां रसवतीमेव भोजितोऽसि । अद्य तु त्वदर्थं एव तां करिष्यामीति पृच्छामि" । ततः **प्रद्योत** उवाच–"ममाऽप्यद्योपवासोऽस्तु, साध्विदं पर्व मम ज्ञापितम्" । ततः सूदस्तद्वृत्त**मुदायना**य विज्ञापयामास ।

तच्छ्रुत्वो**दायनो** जगौ–"त्वं तं वेश्यापतिं न जानासि, स धूर्तोऽस्ति, किन्त्वयं यादृक् तादृग् वाऽस्तु। अस्मिन् कारागारे वसति सति मम पर्युषणा न शुद्धे"ति तं **प्रद्योतं** स मुमोच । तथा पर्वौचित्यात् तं क्षमयित्वा मस्तकाङ्कगोपनाय पट्टबन्धं च चकार । तत्प्रभृति च नृपाणां पट्टबन्ध ऐश्वर्यसूचकः प्रावृतत् । तत्पूर्वं हि किरीटमेव नृपा मस्तके बबन्धुः । तथो**दायनो** नृपः **प्रद्योता**याऽ**वन्ति**देशं दत्वा वर्षास्वतीतासु **वीतभय**पुरं ययौ । किन्तु तत्र शिबिरे वणिजस्तथैव तस्थुः । तत्तैरेवाऽऽश्रितं तद् **दशपुरं** भुवि ख्यातम् । **प्रद्योतो**ऽपि च **वीतभय**प्रतिमायै शासनेन **दशपुरं** दत्त्वा **अवन्ति**पुरमगात् ।

अन्यदा च **प्रद्योतो** विदिशां गत्वा **भायल**स्वामिनामकं **देवकीयं** पुरं चकार । **धरणो**दितं हि न जातु मिथ्या । तथा **प्रद्योतो विद्युन्मालि**कृतप्रतिमायै शासनेन द्वादशग्रामसहस्रान् प्रददौ ।

अथाऽन्यदा **वीतभय**पुरस्थ**मुदायनं प्रभावती**देवः स्नेहेन समेत्य प्रबोधयन्नुवाच–"नृप ! इह या जीवतो **वीर**स्वामिनो प्रतिमाऽस्ति, साऽसाधारणमाहात्म्यादुत्तमं तीर्थम् । सा हि केवलिना **कपिले**न मुनिना श्वेताम्बरेण प्रतिष्ठिताऽस्ति । पुरातनी प्रतिमेयं च त्वया पूज्या । तथा महाफला सर्वविरतिरप्यादेया" । **उदायनो**ऽपि तद्वाचं तां प्रतिपन्नवान् । देवश्च तिरोहितवान् ।



ततोऽन्येद्यु**रुदायनो** धर्मतत्परः पौषधगृहे पाक्षिकं पौषधव्रतं गृहीतवान् । रात्रिजागरणे च शुभध्यानस्थस्य तस्येदृशो विवेको जातः–"ये **वीरे**ण पावितास्ते नगरग्रामा धन्याः । तन्मुखाद्यैर्धर्मः श्रुतस्ते नृपादयोऽपि धन्याः । तथा तत्पादं सेवमाना ये प्रतिबोधं प्राप्य द्वादशविधं गृहिधर्मं प्रतिपन्नवन्तस्तेऽपि सुकृतिनः । तथा तत्कृपया ये व्रतं जगृहुस्ते नितरां श्लाघ्या वन्दनीयाश्च । तेभ्यो नित्यं नमोऽस्तु । यदि **वीर**प्रभुर्विहारेण **वीतभय**नगरं पुनाति तदा तत्समीपे व्रतं गृहीत्वा कृती स्याम्" ।

ततः भो ! **अभयकुमार** ! वयं तज्ज्ञात्वा तदनुग्रहेच्छया **चम्पा**पुर्या विहृत्य **वीतभय**नगरे समवसरामः । तत **उदायनो**ऽस्मान् प्रणम्य देशनां श्रुत्वा गृहं गत्वा च विवेकवान् स दध्यौ–"पुत्रायाऽ**भीचये** राज्यं ददामि । नीतिविदो हि राज्यं नरकान्तं प्रतिपादयन्ति, तत्पुत्राय तद्दानं न तद्धितम्" । एवं विचार्य स भागिनेये **केशिनि** तद् राज्यं न्यस्यो**दायनो** जीवतः प्रभोः प्रतिमायै शासनेन पूजार्थं भूरिग्रामादिकं ददौ । ततः **केशि**नृपेण कृतनिष्क्रमणोत्सवोऽस्मत्पार्श्वे व्रतं गृहीतवान् । ततः स षष्ठाऽष्टमादितपोभिः स्वात्मानं निर्मलीकृतवान्। एव**मुदायन**स्तृणमिव राज्यं त्यक्त्वा व्रतं गृहीतवान् । **अभयकुमार** ! सोऽय**मुदायन**श्चरमो राजर्षिर्वर्णितः ॥ ११ ॥

*इति दशमे पर्वणि रौहिणेयचरित-अभयकुमारापहारो-दायनचरित-प्रद्योतबन्धनोदायनप्रव्रज्यावर्णनात्मकः एकादशः सर्गः ॥११॥*

## द्वादशः सर्गः

अथाऽ**भयकुमारः** पुनः प्रणम्य भगवन्तं श्री**वीर**जिन**मुदायन**राजर्षेः कीदृशो भावीति पप्रच्छ । ततश्चरमतीर्थकृच्छ्री**वीर**प्रभुरुवाच-एकदा विहारं कुर्वत **उदायन**मुनेरकालेऽपथ्यभोजनैर्महाव्याधिरुत्पत्स्यते । तदा वैद्यैः शुभाशयैर्देहे निःस्पृहोऽपि दधि भुङ्क्ष्वेति कथितः स मुनिर्दधिभिक्षासौलभ्याद् व्रजेषु विहरिष्यति ।

अन्यदा च स **उदायनो** भागिनेयेन **केशि**ना नृपेण शासितं **वीतभय**नगरं यास्यति । तदा सचिवै**रुदायन**मागतं ज्ञात्वा **केशी** कथयिष्यते-'यत् तव मातुलो नूनं तपसो निर्विण्णः । राज्यं त्यक्त्वा पश्चात्तापं कुर्वन् स राज्यार्थमेवाऽऽगतोऽस्ति । तदस्य विश्वासं मा कृथाः" । ततः **केशी** कथयिष्यति-"अद्याऽपि स राज्यं गृह्णातु, अहं कोऽस्मि ? धनिनि स्वधनं गृह्णति कः कोपः । ततो मन्त्रिणः कथयिष्यन्ति-पुण्यैस्तव राज्यं मिलितं, न तु केनाऽपि प्रदत्तम् । पित्रादेरपि बलाद् राज्यं ग्रहीतव्यमिति राजधर्मः । दत्तं तु कः खलु त्यजति ? तैरेवं दुर्बोधितः **केशी उदायने** भक्तिं मुक्त्वा किमधुना कर्त्तव्यमिति तान् प्रक्ष्यति ।

ततस्ते विषं दापयिष्यन्ति । **केशी** चैकया पशुपालिकया विषमिश्रितं दधि **उदायना**य दापयिष्यति । ततो देवतास्तद्विषं निष्प्रभावं कृत्वा "दधीच्छां त्यज, यथा सविषदधिलाभो न



स्यादि"त्यु**दायनं** कथयिष्यन्ति । तेन च दध्नि त्यक्ते मुने**रुदायन**स्य रोगो वर्धिष्यते । ततः रोगोपशमाय पुनर्दधि ग्रहीष्यति । देवताश्च वारत्रयं विषापहारं करिष्यन्ति । अन्यदा च देवता अपि प्रमादवशाद् विषं नाऽपहरिष्यन्ति । तेन स मुनिः सविषं दधि भक्षयिष्यति । विषप्रभावेण च चैतन्यं लुप्यमानमवधार्य ज्ञातमृत्युः स मुनिरनशनं ग्रहीष्यति । त्रिंशद्दिनानि यावदनशनं पालयित्वा समाधिप्रभावाज्जातकेवलज्ञानश्च विपद्य मोक्षमेष्यति । तत्कृतनिरवच्छिन्नपांशुवृष्ट्या च **कपिल**मुनिप्रतिष्ठिता सा देवाधिदेवप्रतिमा निधानमिव भूगता भविष्यति । तथा सा देव**तोदायनर्षेः** शय्यातरं कुम्भकारं निरपराधं हृत्वा सिनपल्ल्यां नेष्यति । तत्र च तन्नाम्नैव **कुम्भकारकृत**मिति स्थानं करिष्यति ।

ततोऽ**भयः** पुनः प्रणम्य **वीर**जिनमुवाच-**उदायन**पुत्रस्याऽ**भीचेः** का गतिर्भाविनी ?" ततो **वीर**प्रभुराह-"पितरि **केशिने** राज्यं दत्तवति सति स **प्रभावती**पुत्रोऽ**भीचि**श्चिन्तयिष्यति-"मयि भक्तेऽपि सति राज्याधिकारिणि तातः **केशिने** राज्यमदात् । तत्कारागृहाधिकारिणे **केशिने** राज्यं ददानस्य पितुः कोऽयं विवेकः। किन्तु मम पिता प्रभुर्यदिच्छति तत् करोतु, किन्त्वहं राजपुत्रः **केशिनः** सेवां कथं करिष्यामि ?" एवं पित्राऽवज्ञातः स **कूणिक**मुपगमिष्यति । मातृष्वस्रेयेण **कूणिके**न सदा सगौरवं दृश्यमानः सोऽ**भीचि**स्तत्र सुखं स्थास्यति । तथा श्रमणोपासकस्तत्त्वज्ञः स श्रावकधर्मं यथाविधि बहूनि वर्षाणि पालयन् स्वावज्ञां स्मरन् **उदायने** वैरं न त्यक्ष्यति । अन्ते च संलेखनां कृत्वा पाक्षिकानशनेन पितृवैरमनालोच्यैव विपन्नः सोऽसुरोत्तमो भविष्यति । एवं पल्योपममसुरायुर्भुक्त्वाऽ**भीचि**जीवो **महाविदेहे**षूत्पद्य शिवं यास्यति ।

ततोऽ**भयः** पुनः प्रभुं पप्रच्छ-"**कपिल**मुनिप्रतिष्ठिता सा देवाधिदेवप्रतिमा कदा प्रकटीभविष्यति ?" ततो **वीर**प्रभुरुवाच-"कालक्रमेण **सौराष्ट्र-लाट-गुर्जर**सीमनि नाम्नाऽ**णहिलपाटकं** नगरं भविष्यति। तन्नगरं त्वार्यभूमेश्चूडारत्नं मङ्गलनिलयं श्रावकैर-धिष्ठितं तीर्थं भविष्यति। तत्र चैत्यानि जिनप्रतिमासनाथानि स्वर्णकलशराजमानानि भविष्यन्ति। तत्र श्रावका अतिथिसंविभागेन भोजनोद्यताः स्युः। तत्रत्यो लोकश्च गतेर्ष्यः सन्तुष्टः पात्रे दानशीलश्च भविष्यति। श्रेष्ठिनश्च सप्तक्षेत्र्यां द्रव्यं वप्स्यन्ति। सुषमाकालोत्पन्न इव तत्र लोकः स्वदारनिरतो भविष्यति।

ततोऽस्मन्निर्वाणाद् वर्षाणां षोडशशतानि नवषष्ठ्यां चाऽतीतायां तत्र नगरे प्रचण्डाखण्डिताज्ञश्चौलुक्यकुलाब्धिचन्द्रो महाबाहुः **कुमार-पालो** नाम नृपो भविष्यति। स च सरलश्चतुरः शान्तः क्षमी चिरं महीं पालयिष्यति। तत्र स स्वमिव प्रजा धर्मनिष्ठं करिष्यति। स धर्मात्मा धर्मानुरागी पराक्रमेण धर्मेण दानेन दययाऽऽज्ञादिना च पुरुषगुणैर्बहुभिरद्वितीयो राजा भविष्यति। स उत्तरस्यां **तुरुष्क**देशं यावत् पूर्वस्यां **गङ्गां** यावद् दक्षिणस्यां **विन्ध्यं** यावदासमुद्रं च पश्चिमायां पृथ्वीं साधयिष्यति।

अन्यदा च **वज्र**शाखायां **मुनिचन्द्र**कुलप्रसूतं **हेमचन्द्रा**चार्यं दृष्ट्वा प्रमुदितो वन्दितुं नित्यं त्वरिष्यते। तथा स नृपः सपौरामात्य-श्चैत्ये धर्मदेशनां कुर्वतस्तस्य सूरेर्वन्दनाय गमिष्यति। तथा तत्र च तत्त्वमजानानोऽपि देवं नत्वा शुभभावतस्तं सूरिं वन्दिष्यते। तत्सूरिमुखाद् धर्मदेशनां श्रुत्वा च प्रीतः स सम्यक्त्वपूर्वकम-णुव्रतानि ग्रहीष्यति।



एवं प्राप्तबोधः स श्रावकधर्मं पालयन् सभायामपि स्थितो धर्मगोष्ठ्या मनोविनोदं करिष्यति। तथा प्रायेण ब्रह्मचारी सोऽन्नादीनां नियमान् ग्रहीष्यति। परदारपराङ्मुखः स नृपः स्वधर्मपत्नीरपि ब्रह्मचर्यं पालयितुं बोधयिष्यति। तस्य सूरेरुपदेशतो जीवा-ऽजीवादितत्त्वज्ञः स नृपः सूरिरिवाऽन्येषामपि बोधं प्रदास्यति। जिनधर्मद्वेषिणः **पाण्डुरा**ख्या ब्राह्मणादयोऽपि तस्य नृपस्याऽऽज्ञया श्रावका भविष्यन्ति। स सदा चैत्यं पूजयित्वा गुरून् नत्वैव चाऽन्नं ग्रहीष्यति। तथा सोऽपुत्राणामेव विपन्नानां पुरुषाणां धनं न ग्रहीष्यति। तदाज्ञया च सर्वो जनः स्वयं मृगयां त्यक्ष्यति। तेन नृपेण हिंसायाः सर्वथा निषेधाच्च नीचकुलोऽन्त्यजादिरपि यूका-मशकादिहिंसामपि न करिष्यति। तेनाऽमारिघोषणायां कारिता-यामरण्ये मृगादयः शान्त्या वसेयुः। तस्याऽऽज्ञावशाच्च जन्मतः प्रभृत्येव मांसभक्षिणोऽपि स्वप्नेऽपि मांसवार्तां न करिष्यन्ति।

एवं स मद्यपानमपि सर्वथा निवारयिष्यति। तेन च कुम्भकारोऽपि मद्यभाण्डघटनां त्यक्ष्यति। तेन च मद्यपाननिर्धनानां मद्यपानां तन्नृपाज्ञया त्यक्तमद्यपानानां पुनः सम्पदः प्रभविष्यन्ति। तथा स नृपः स्वराज्ये स्वरिपुमिव द्युतनामाऽप्युन्मूलयिष्यति। तस्य नृपस्य शासने प्रवर्त्तमाने च पारावत-पणक्रीडा-कुक्कुटयुद्धादिकं च न भविष्यति। तथा स प्रायेण प्रतिग्रामं जिनायतनं करिष्यति। तथा प्रतिग्रामं प्रतिनगरं च जिनप्रतिमानां रथयात्रोत्सवं करिष्यति। तथा द्रव्यदानपूर्वकं स्वसंवत्सरं प्रवर्त्तयिष्यति।

एकदा च वार्ताप्रसङ्गे गुरोर्मुखात् **कपिल**मुनिप्रतिष्ठितां पांशुगुप्तां प्रतिमां श्रुत्वा पांशुस्थलं खानयित्वा समानेष्यामि। एवं मनसि कृत्वा सद्यो जातोत्साहशकुनादिवशात् प्रतिमाप्राप्तिं निश्चित्य

गुरुमनुज्ञाप्य राजपुरुषान् नियोज्य **वीतभय**नगरस्य तत्स्थलं खानयितुमुपक्रमं करिष्यति । सत्त्वशालित्वाच्च तस्य नृपस्य शासनदेवता सान्निध्यं करिष्यति । तस्य नृपस्य पुण्येन चाऽल्पखननेनैव प्रतिमा प्रकटीभविष्यति । तदानीमे**वोदायन**भूभुजा तत्प्रतिमार्थं दत्तानां ग्रामाणां शासनलेखोऽपि प्रकटीभविष्यति । राजपुरुषाश्च पुरातनीमपि तां प्रतिमां नवामिव यथाविधि पूजयित्वा रथमारोपयिष्यति । तथा मार्गे पूजयन्तः सङ्गीतकं कुर्वन्तो वाद्यादि वादयन्तः पार्श्वयोश्चामरे वीजयन्तो राजपुरुषास्तां प्रतिमां नगरीसीम्नि नेष्यन्ति ।

**कुमारपाल**नृपश्च चतुरङ्गसेनासमन्वितः सपरिवारः ससङ्घस्तामभिगम्य स्वयं तां रथात् समुत्तार्य गजमधिरोप्य च पुरे प्रवेश्य स्वभवनसमीपक्रीडाभवने संस्थाप्य त्रिकालं यथाविधि पूजयिष्यति । तथा तस्याः प्रतिमायास्तच्छासनलेखं वाचयित्**वोदायन**दत्तं स्वयमपि प्रमाणीकरिष्यति । तथा स नृपस्तत्प्रतिमायाः प्रतिष्ठार्थं तत्रैव स्फटिकमयं प्रासादं विस्मयजनकं निर्माय तां प्रतिमां तत्र स्थापयित्वा प्रतापेन लक्ष्म्या कल्याणेन च वर्धिष्यते । हे **अभयकुमार** ! एवं स **कुमारपालो** नृपो देव-गुरुभक्त्या त्वत्पितृतुल्यो भारतनृपो भविष्यति" ।

तच्छुत्वाऽ**भयकुमारो** भगवन्तं जिनं प्रणम्य **श्रेणिक**-नृपसमीपमागत्योवाच-"पितः ! यद्यहं राजा स्यां तदा यतिर्न स्याम् । **उदायन**श्चरमो राजर्षिरिति श्री**वीर**जिनेन कथितम् । तद्यदि त्वादृशं पितरं श्री**वीर**जिनं च प्राप्य भवदुःखोच्छेदे निरुद्योगोऽहं सर्वाधमः स्याम् । अहं नाम्नाऽ**भयो**ऽपि भवाद् भीतो जगदभयदं श्री**वीरं** श्रयामि । तदनुजानीहि । मम राज्येनाऽलम् । सन्तोष एव सुखम्" ।



'तत आग्रहात् कथितोऽपि राज्यमगृह्ण**न्नभयो** नृपेण सप्रमोदं व्रतायाऽनुज्ञातः ।

ततोऽ**भयकुमारो** राज्यं तृणवत् त्यक्त्वा शाश्वतसुखनिःश्रेणिं दीक्षां श्री**वीर**जिनपार्श्वेऽग्रहीत् । **नन्दा**ऽपि चाऽ**भये** व्रतं गृहीतवति **श्रेणिकं** नृपमनुज्ञाप्य चरमतीर्थकृत्पादान्ते व्रतमग्रहीत् । तथा दीक्षां गृहीतवती सा दिव्यं तत्कुण्डलद्वयं क्षौमद्वयं च **हल्ल-विहल्ल**योर्ददौ । ततो **वीर**जिनोऽपि भव्यप्रबोधहेतोः सपरिवारो महीं विजहार । **अभयकुमार**श्च विविधाभिग्रहपूर्वकं चिरं व्रतं पालयित्वा विपद्य **सर्वार्थसिद्धे** श्रेष्ठो देवो बभूव ।

❋ ❋ ❋

अथाऽ**भये** व्रतं गृहीतवति **श्रेणिको** दध्यौ-"सर्वकुमारेषु गुणाधिकोऽ**भयो** व्रतमादाय स्वार्थमसाधयत् । तत्कस्मिन्नपि बलिनि चिरजीविनि कुमारे राज्यमारोपयिष्यामि । सगुणो निर्गुणो वा पुत्र एव पितृसम्पदां योग्यः । **अभयकुमारं** विहाय **कूणिक** एव गुणवान् राज्यमर्हति" । एवं **कूणिकं** राज्ये निश्चित्य स **हल्ल-विहल्ल**योरष्टादशचक्रं हारं सेचनकं गजं च प्रादात् । अत्राऽवसरे च **कूणिको**ऽपि स्वसदृशैः **काला**दिभिर्दशभिर्भ्रातृभिर्मन्त्रयामास-"वृद्धोऽप्यस्माकं पिता राज्यस्य न तृप्यति, पुत्रे कवचहरे जाते राजा व्रताधिकारी भवति । ज्येष्ठोऽ**भय** एव श्रेष्ठो यो युवाऽपि लक्ष्मीमत्यजत् । तातस्तु विषयासक्तः स्ववृद्धावस्थामपि न पश्यति । तदद्य पितरं बद्ध्वा स्वसमयोचितं राज्यं गृह्णीमः । अत्राऽपवादोऽपि न भावी । यतो नृपो विवेकहीनोऽस्ति । राज्यं चैकादशधा कृत्वा वयं भ्रातरस्तद् भुञ्ज्महे । ततः पिता बद्धो वरं वर्षशतान्यपि जीवतु" ।

इति विचार्य दुर्मतयस्ते विश्वस्तं निजं पितरं बबन्धुः । बद्ध्वा च **कूणिकः** शुकवत् पञ्जरे पितरमक्षैप्सीत् । तथा भक्त-पाने अपि न ददौ । तथा पूर्ववैरवशात् स **कूणिकः** प्रतिदिनं पूर्वाह्णेऽपराह्णे च शतकृत्वः कशया ताडयति स्म । **श्रेणिकश्च** दैवोपनतां तां दुर्दशां बद्धः समर्थ गज इवाऽवशः सेहे । **श्रेणिकस्य** समीपे च मातृदाक्षिण्याच्**चेलणां** विना कमपि गन्तुं नाऽदात् । **चेलणा**ऽपि प्रतिदिनं शतधौतया सुरया सद्यः स्नातेवाऽऽर्द्रकेशीभूय **श्रेणिक**-समीपं गच्छति स्म । तथैकां कुल्माषपिण्डिकां पुष्पमाल्यमिव केशान्तः प्रक्षिप्य नयति स्म । प्रच्छन्नतया **चेलणा**दत्तां तां कुल्माषपिण्डिकामपि स **श्रेणिको** दिव्यभोज्यवद् दुष्प्रापां मन्यते स्म । तयैव च पिण्डिकया स **श्रेणिकः** प्राणयात्रां चकार । तथा **चेलणा** पतिभक्ता नेत्राश्रुबिन्दुभिः सहैव केशपाशाच्छतधौतसुरा-बिन्दून् पातयति स्म । **श्रेणिकश्च** चातको वर्षोदबिन्दूनिव पिपासाकुलः पततस्तान् सुराबिन्दून् पिबति स्म । बिन्दुमात्रपीतया-ऽपि तया सुरया **श्रेणिकः** कशाघातान् न जानाति स्म । तृष्णया च न पीड्यते स्म ।

इतश्चेत्थं **श्रेणिकं** बद्ध्वोग्रं राज्यं कुर्वतः **कूणिकस्य** **पद्मावत्यां** पत्न्यां पुत्रोऽजनि । **कूणिकश्च** तदाऽऽयाता वर्धापिका दासीर्वस्त्राभरणसंछन्नाश्चकार । तथा स्वयमन्तःपुरे गत्वा पाणिभ्यां पुत्रमादाय तन्मुखं प्रभाभास्वरं पश्यन् प्रमुदितः श्लोकमिमं पपाठ–

**अङ्गादङ्गात् सम्भवसि हृदयादभिजायसे ।**
**आत्मैव पुत्र ! जातोऽसि तज्जीव शरदां शतम् ॥**



पुनः पुनश्चेमं श्लोकं पठन् स **कूणिको** न विरराम । कुमारपालने निपुणाभिर्वृद्धस्त्रीभिश्च **कूणिकस्य** करादादाय बालो-ऽरिष्टशय्यायां मुक्तः ।

ततः **कूणिको** याचकेभ्यो ब्राह्मणेभ्यो दानं ददौ । पुत्रस्य जातकर्मोत्सवं च चक्रे । तथा महोत्सवपूर्वकं स तस्य पुत्र**स्योदायी**ति नाम चकार । स्वर्णकान्ति**रुदायिकुमारश्चा**ऽऽरक्षकैः परिवृतो दिने दिने उद्यानतरुरिव वृद्धिमाप । **कूणिकश्च** प्रेम्णा तं बालं कट्यामारोपया-मास । तथा प्रेमगद्गदया वाण्या तं सततं लालयामास । आसने शयने याने भोजने वाऽपि स नृपस्तं बालं कराद् न मुमोच ।

एकदा च स पुत्रवत्सलो नृप **उदायि**नं वामजानूर्ध्वं स्थापयित्वा भोजनार्थमुपाविशत् । **कूणिके**ऽर्धमुक्ते च स बालो मूत्रयामास । तेन च भोजनपात्रे घृतधारेव मूत्रधारा पपात । कूणिकश्च बालस्य वेगरोधो मा भूदिति पुत्रवात्सल्याज्जानु न चालयामास । तथा मूत्रसम्पृक्तमन्नं करेण करेण स्वयमपसार्य पूर्ववदेव भोजनं चकार । तथा स **कूणिक**स्तत्रस्थां **चेलणां** पप्रच्छ–"मातः ! कस्याऽप्येवं प्रियतरः पुत्रोऽभूदस्ति वा ?"

तत**श्चेलणो**वाच–"आ ! पाप! त्वं यथा पितुरत्यन्तं प्रियो-ऽभूस्तद् न जानासि । तदा मया दुर्दोहदेन त्वं पितुर्वैरीति ज्ञातोऽसि। त्वां गर्भस्थितमपि पितुर्वैरिणं ज्ञात्वाऽहं पतिमङ्गलेच्छया गर्भभ्रंशोपायमकरवम् । किन्तु नैकैरौषधैरपि गर्भो न भ्रष्टः, प्रत्युत पुष्ट एवाऽभूत् । तव पिता च कदा पुत्रमुखं द्रक्ष्यामीत्याशया तादृशमपि मम दोहदं पूरितवान् । किन्तु त्वमुत्पन्नोऽपि पितुर्वैरीति मया त्यक्तः । तथाऽपि पित्रा स्वं जीवितमिव यत्नादानीतोऽसि ।

तदानीं च तवैकाङ्गुलिः कुक्कुटीपिच्छ विद्धा कृमि-पूयभृताऽत्यन्तं दुःखदायिन्यभूत् । त्वत्पिता च तादृशीमपि तवाऽङ्गुलिं मुखे अधात् । यतो यावत् तवाऽङ्गुलिर्मुखान्तरमभवत् तावत् तव सुखमभवत् । एवं त्वं पित्रा पालितोऽसि । तस्य काराप्रवेशनेन च त्वया प्रत्युपकारः कृतः" ।

तच्छ्रुत्वा **कूणिक** उवाच-"तर्हि तातो मह्यं गुडमोदकान् **हल्ल-विहल्ला**भ्यां च खण्डमोदकान् किं प्रैषीत् ?" तत**श्चेलणो**-वाच-"त्वं पितृद्वेषीति ममाऽनिष्टोऽभवः । तद्गुडमोदका मयैव तुभ्यं प्रेषिताः" । ततः **कूणिक** आह-"अविमृश्यकारिणं मां धिक् । तत्पुनरेव राज्यं न्यासार्पितमिव पितुरर्पयामि" । ततः सोऽर्धमुक्त एवाऽऽचम्य धात्र्यै बालं दत्त्वा च पितरं जिगमिषुस्त्वरितः **कूणिक** उत्थाय पितृपादेषु शृङ्खलान् भङ्क्ष्यामीति लौहदण्डमादाय **श्रेणिक**म-भ्यधावत । **श्रेणिक**स्य समीपे नियुक्ताः पूर्वपरिचिताः प्राहरिकाश्च **कूणिक**मागच्छन्तं दृष्ट्वाऽऽकुला ऊचुः-"साक्षाद् यम इव लौहदण्डमादाय तव पुत्रः समागच्छति, न जानीमः किं करिष्यति"।

ततः **श्रेणिको** दध्यौ-"नूनमेष मां जिघांसुः । अन्यदा तु कशाहस्त आगमत् । अधुना तु दण्डहस्त आगच्छति । न जानामि, सोऽद्य मां केनचित् कुत्सितमारणेन मारयिष्यति । तद्यावदसावायाति तावद् मम मरणमेव शरणम्" । एवं विचार्य स **श्रेणिक**-स्तालपुटविषं जिह्वाग्रे ददौ । तेन च तस्य प्राणा द्रुतमेव निर्गताः । आगतः **कूणिक**श्च पितरमग्रतो मृतं दृष्ट्वा वक्षस्ताडयन् पूच्चकार । अहं भुव्यद्वितीयः पापोऽभूवम् । तातपादान् क्षमयिष्यामीति मम मनोरथो न सिद्धः, अहं पापतमः" । एवं बहु विलप्य च भृगुपातादिना मम स्वनिग्रह एव मत्कर्मयोग्य इत्येवं कृतनिश्चयः



शोकाकुलो मुमूर्षुरपि **कूणिकः** सचिवैर्बोधितः पितुर्दाहं संस्कारा-दिकं चकार ।

अनन्तरं च शोकेन राजयक्ष्मणेव दिने दिने क्षीयमाणं **कूणिकं** दृष्ट्वा सचिवा दध्युः-"नृपो नूनं शोकाद् मरिष्यति, राज्यं चेदं नङ्क्ष्यति । तत्पितृभक्तिव्याजेनाऽस्य मनःपरिवर्त्तो विधेयः" । एवं विचार्य ते जीर्णे ताम्रपत्रे "पिण्डादि दत्तं पुत्रेण मृतोऽपि लभते पिते"त्यक्षराणि स्वयं लिखित्वा नृपस्याऽग्रेऽवाचयन् । ततः **कूणिक**स्तल्लेखच्छलितः पितुः स्वयं पिण्डाद्यदात् । तत्प्रभृति च पित्रे पिण्डदानं प्रवृत्तम् ।

नृपश्च मन्दमतिर्मम पिता मृतोऽपि मद्दत्तं भुङ्क्ते इति शनैः शनैः शोकममुचत् । किन्तु पितुः शय्यादीनि मुहुर्मुहुः पश्यतः **कूणिक**स्य शोकः प्रादुर्भवति स्म । तेन च स **राजगृहे** स्थातुम-समर्थो जातः । ततः सोऽन्यत्र पुरं करिष्ये इति विचार्य वास्तुनिपुणान् प्रशस्तभूमिशोधनायाऽऽदिदेश । ते च वास्तुज्ञाः सर्वतो भुवं पश्यन्त एकत्र प्रदेशे महान्तं चम्पकद्रुमं दृष्ट्वोचुः-"अयं वृक्षो नोद्याने वर्तते नवाऽत्र सारणिर्नाऽप्यालवालोऽस्य, तथाऽप्यस्यो-ऽद्गमोऽत्र विस्मयकरः । अस्य शाखाविस्तारः पत्र-पुष्पसमृद्धिः पुष्पसौरभ्यं स्निग्धनिबिडच्छायत्वं सर्वमप्यद्भुतम् । तदत्र यथाऽयं चम्पकः स्वभावमनोहरस्तथाऽत्र कृतं नगरमपि श्रीसम्पन्नं भविष्यति" । ततस्ते नगरार्थं नृपस्य तत् स्थानमाचख्युः । नृपश्च चम्पकवृक्षस्यैव नाम्ना तत्र **चम्पापुरीं** द्रुतं कारयामास । ततः सबलवाहन**श्चम्पा**पुर्यां गत्वा **कूणिको** भ्रातृभिः सह महीं पालयामास ।

अथ **पद्मावती** सेचनकगजारूढौ दिव्यकुण्डलमण्डितौ देवाविव **हल्ल-विहल्लौ** देवरौ दृष्ट्वा स्वस्त्रीत्वोचितं दध्यौ-"नेत्ररहितं मुखमिव दिव्यैर्हार-कुण्डलवस्त्रैः सेचनकेन च हीनं राज्यं न शोभते" । एवं ध्यात्वा सा **हल्ल-विहल्ला**भ्यां तान्याहर्त्तुं **कूणिक**मुवाच । ततः **कूणिक** आख्यत्-"अनयोः पितृदत्तं वस्त्वाहर्त्तुं नोचितं, पितरि स्वर्गते चेमौ प्रत्युत प्रसादपात्रे" । किन्तु **पद्मावत्या** अत्याग्रहात् स नृपो हारादियाचनं स्वीचकार ।

ततोऽन्यदा **कूणिको हल्ल-विहल्लौ** हारादिचतुष्टयं ययाचे । तौ चाऽऽदेशः प्रमाणमिति तत् स्वीकृत्य स्वावासं गतौ विचारयामासतुः-"अस्य नृपस्य नोचिता बुद्धिः, नाऽनेनाऽऽवयोः प्रयोजनम् । तदन्यत्र कुत्राऽपि यावः" । एवं विचार्य तौ सान्तःपुरौ रात्रौ सेचनकगजं हारादीनि चाऽऽदाय **वैशाल्यां** जग्मतुः । तत्र च मातामह**श्चेटकः** तौ स्नेहेनाऽऽलिङ्ग्य सत्कृत्य च युवराजवद् ददर्श।

ततः **कूणिक**स्तौ **वैशाल्यां** गतौ ज्ञात्वा दध्यौ-"स्त्रीहठाग्रहाद् मम हस्त्यादिरत्नानि भ्रातरावपि च नाऽभूवन्। अहमुभयभ्रष्टो जातः । भवतु, ताववश्यमानयिष्यामि । अन्यथा मम पराभवसहिष्णोर्वणिजश्च किमन्तरं स्यात्" । एवं विचार्य स दूतमनुशिष्य रत्नान्यादाय गतयोर्भ्रात्रोर्याचनाय **वैशाल्यां चेटक**समीपं प्रेषयामास । दूतोऽपि च **वैशाल्यां** गत्वा सभायां स्थितं **चेटकं** प्रणम्योपविश्य चोवाच-"कुमारौ **हल्ल-विहल्लौ** रत्नादिकं गजं चाऽऽदायेहाऽऽगतौ **कूणिक**स्य समर्पय । अन्यथा तव राज्यभ्रंशः स्यात् । कीलिकार्थे देवगृहं नाशयितुं नोचितम्" ।

तत**श्चेटक** उवाच-"शरणागतोऽन्योऽपि नाऽर्प्यते, पुत्रवत् प्रियौ विश्वस्तौ दौहित्रौ किंपुनः ?" ततो दूत उवाच-"शरणागतवत्सलस्त्वं यदिमौ नाऽर्पयसि, तर्ह्यनयो रत्नानि हृत्वा मत्प्रभोरर्पय" । तच्छ्रुत्वा **चेटक** उवाच-"अन्यस्य धनमन्यो दातुं न प्रभुरिति राज-रङ्कयोः समानो धर्मः । तत् प्रसह्य साम्ना वाऽनयोः किञ्चन नाऽहं गृह्णामि । इमौ हि दानार्हौ दौहित्रौ विशेषतो मम धर्मपात्रम्" ।



ततो दूत आगत्य **चम्पायां कूणिक**स्य सर्वं **चेटको**दितमाख्यत् । ततः क्रुद्धः **कूणिक**स्तत्कालं जयभम्भां वादयामास । तेन च तस्य बलवन्ति सैन्यानि सद्य एव सर्वाभिसारेण सज्जीभूयाऽवतस्थिरे । **काला**दयो दशकुमारा अपि सन्नद्धा अभूवन् । तेषां कुमाराणां प्रत्येकं च त्रीणि सहस्राणि गजास्तावन्तोऽश्वास्तावन्तो रथास्तिस्रः कोटयः पदातयश्च बलमभूवन् । **कूणिक**स्याऽप्येतावद् बलं, तत्प्रभुत्वं च विशेषः । ततः **कूणिक** एतावता सैन्येन महीं रजोभिः सूर्यं च छादयन् **चेटकं** प्रति प्रतस्थे ।

**चेटको**ऽपि चाऽष्टादशभिर्बद्धमुकुटैः राजभिरमितैः सैन्यैश्च **कूणिका**याऽभिजगाम । तेषामष्टादशानां प्रत्येकं त्रीणि सहस्राणि गजास्तावन्तोऽश्वास्तावन्तो रथास्तिस्रः कोटयः पदातयश्च बलमभूत् । **चेटक**श्च तया सेनया स्वदेशसीमनि दुर्भेदं सागरव्यूहं रचयित्वाऽस्थात् । **कूणिक**श्च तावत्या सेनया तत्राऽऽगतः शत्रुसेनया दुर्भेद्यं गरुडव्यूहं कृत्वाऽस्थात् । उभयोरपि सैन्ययोर्घोराणि वाद्यानि ताडितानि । द्वयोरपि सैन्ययोर्युद्धाय कृतनिश्चयाः सैनिकाश्चेरुः । तत्र **कूणिक**स्य सैन्ये सेनानायकः कुमारः **काल** आदौ **चेटक**सेनया योद्धुं प्रववृते ।

तत्र युद्धे चाऽश्ववारेणाऽश्ववारो, गजवाहनेन गजवाहनो, रथिना रथी, पत्तिना पत्तिश्च युयुधे । कुन्तघातपातितैर्गजैश्च रणभूमिर्गण्डशैलाकीर्णेव जाता । हतैर्भटै रथैश्च सजलमानुषाः सान्तरीपा इव

भान्त्यो रुधिरनद्यः प्रावर्त्तन्त । एवं तुमुले युद्धे प्रवृत्ते **कालः** सागरव्यूहमम्बुधिं पोत इवोत्तीर्य **चेटक**समीपं प्राप । तत**श्चेटको**-ऽकाले कालमिवाऽऽपतन्तं केनाऽप्यप्रतिरोध्यं **कालं** दृष्ट्वा रणदुर्मदं तं दैवतेन बाणेन निजिघृक्षुर्वैरिप्राणहरेण दिव्यबाणेन प्रहृत्य पञ्चत्वं प्रापयामास । तदानीमेव **काल**कुमारवदेव सूर्योऽस्तमियाय । जगदन्धकारेणेव **चम्पे**शसैन्यं शोकेनाऽऽक्रान्तम् । तत**श्चम्पे**शसैन्यं युद्धं त्यक्त्वा रात्रौ जाग्रदेव तस्थौ । **चेटक**स्य सैन्ये तु वीराः सोल्लासं जयवादसङ्गीतादिभिर्निशां निन्युः ।

अथ द्वितीयदिने **कूणिके**न सेनापतित्वेऽभिषिक्तो **महाकाल**-कुमारोऽपि **चेटके**न **काल** इव हतः । एवमन्यानपि श्रेणिकपुत्रानष्टौ सेनापतीनेकैकश एकैकेन दिनेन **चेटको** हतवान् । ततो दशसु **काला**दिषु भ्रातृषु प्राणवत् प्रियेषु **चेटके**न हतेषु **कूणिको** विषण्णो दध्यौ-''देवताप्रसादादेकेनाऽपि बाणेन **चेटको** जेता । स कोटि-भिरपि मनुष्यैर्न जय्यः मया **चेटक**स्येमं प्रभावमजानता देवतुल्या दश भ्रातरो मारिताः, मां धिक् । तेषां गतिरेव ममाऽपि भविता । भ्रातृवधं दृष्ट्वा ममेतोऽपसरणं न युज्यते । तद्देवतां समाराध्यैव शत्रुं जयामि । दिव्यप्रभावो दिव्यप्रभावेणैव बाध्यते'' ।

एवमुपायं निश्चित्य स **कूणिको** देवतां हृदि ध्यात्वा-ऽष्टमभक्तेन तस्थौ । पूर्वजन्ममैत्र्या तत्तपसा च प्रेरितौ च **शक्र-चमरेन्द्रौ** तत्र सद्य आगत्य किमिच्छसीति प्रोचतुः । ततः **कूणिक** उवाच-''यदि भवन्तौ तुष्टौ तर्हि **चेटको** हन्तव्यः'' । ततः शक्र उवाच-''अपरं किमपि याचस्व । यत**श्चेटको** मम साधर्मिको मया न हन्तुं योग्यः । तथाऽपि तव देहरक्षां करिष्यामि यथा पराजयं नाऽऽप्स्यसि'' । ततः **कूणिक** एवमस्त्वित्युवाच । **चमरेन्द्र**श्च युद्धं



महाशिलाकण्टकं जैत्ररथमुशलं च कर्त्तुं स्वीचकार । महाशिला-कण्टकयुद्धे हि कर्करोऽपि पतितो महाशिलातुल्यो भवति कण्टको-ऽपि च महाशस्त्राधिको जायते । जैत्ररथमुशलयुद्धे च भ्रमिकं विनैव भ्राम्यती रथमुशले युद्धस्थं वैरिसैन्यं परितः पिष्टः ।

ततः शक्र-**चमरेन्द्र-कूणिकाश्चेटक**सेनया योद्धुं प्रावर्त्तन्त । तदानीं च **नागरथिनः** पौत्रो **वरुणः** सत्यप्रतिज्ञो, द्वादशव्रता-राधकः, सम्यक्त्वसम्पन्नो, विषयविमुखबुद्धिः, षष्ठभोजी, षष्ठभक्तान्ते कृताष्टम**श्चेटक**प्रार्थनया तादृशे दुःसहे रथमुशलयुद्धेऽपि प्रविश्य युद्धार्थं **कूणिक**सेनापतिमाक्षिपन् वेगिना रथेन प्रससार । ततस्तौ सम्मुखीभूतस्थौ सूर्य-राहू इव भयङ्करौ युद्धार्थं प्रावर्तताम् । **कूणिक**सेनापतिश्च युद्धेच्छुं **वरुणं** पुरःस्थितं प्रहर प्रहरेत्युच्चैरुवाच । ततो **वरुण** आह-''वीर ! श्रावकस्य ममैतद् व्रतं यत् प्रहारविमुखे रिपावपि न प्रहर्तव्यम्'' ।

ततः **कूणिक**सेनापतिर्बाढमित्युक्त्वा बाणेन **वरुणं** मर्मणि विव्याध । ततः क्रुद्धो **वरुणः** **कूणिक**सेनान्यमेकेनैव प्रहारेण पञ्चत्वं प्रापयामास । तथा स्वयं स गाढप्रहारपीडितो रणाद् निःसृत्य तृणसंस्तरं कृत्वोपविश्य दध्यौ-''मया शरीरेण सर्वथा स्वामिकार्यं सम्पादितम् । अधुना ममाऽन्तकाल इति स्वार्थस्याऽवसरः । तन्ममाऽर्हन्तः सिद्धाः साधवो जैनो धर्मश्च शरणं भूयासुः । सर्वान् जीवान् क्षमयानि, तेऽपि मयि क्षाम्यन्तु । मम सर्वभूतेषु मैत्री केनाऽपि न वैरम् । न मम किमपि न वा कस्याऽप्यहम् । सर्वं कृतं ममकारं त्यजामि । यानि दुष्कृतानि सेवितानि तन्मे सम्प्रति निरीहस्य मिथ्यादुष्कृतमस्तु । जन्मजन्मान्तरेषु कृतं दुष्कर्म गर्हे । मम

श्री**वीर**जिनो गतिः" । एवमाराधनां कृत्वा चतुर्विधमाहारं प्रत्याख्याय समाधिस्थो नमस्कारं चिन्तयामास ।

तदानीं च **वरुण**स्य मित्रमेको मिथ्यादृष्टिर्युद्धाद् निर्गत्य समीपमागत्योवाच-"मित्र ! तव मैत्रीवशंवदोऽहमपि त्वदाराधितमार्गमजानानोऽपि प्रपन्नोऽस्मि" । **वरुण**श्च धर्मध्यानस्थो नमस्कारं स्मरन् समाधिमरणं प्राप्य **सौधर्मं** जगाम । तत्रा**ऽरुणाभा**ख्ये विमाने चतुःपल्योपमप्रमितमायुः पूरयित्वा **विदेहे**षूत्पद्य सिद्धिमेष्यति । तन्मित्रं च विपद्य सुकुले मनुष्योऽभवत् । तथा स पुन**र्विदेहे**षु सत्कुलं प्राप्य मुक्तिमार्गमाराध्य शिवपदं गमिष्यति ।

अथ **वरुणे** हते **चेटक**स्य सैन्या दण्डाहतवराहवद् युद्धाय द्विगुणोत्साहा अभूवन् । ते चाऽष्टादशभिर्बद्धमुकुटैर्गणपैः सहिताः क्रुद्धाः **कूणिक**सैन्यं कुट्टयामासुः । **कूणिक**श्च तैर्हन्यमानं सैन्यं दृष्ट्वा लोष्टाहतः सिंह इव क्रुद्धस्तानधावत । तथा तडागे गज इव क्रीडन्निव कमलनालानिव शत्रुसैन्यं नाशयामास । तत**श्चेटकः कूणिकं** दुर्जयं ज्ञात्वा क्रुद्धो दिव्यं बाणं धनुषि योजयामास ।

इतश्च शक्रः **कूणिकस्य** पुरस्ताद् वज्रकवचं **चमरेन्द्र**श्च पृष्ठे लौहनिर्मितं कवचं चकार । **चेटके**नाऽऽकर्णमाकृष्य मुक्तोऽपि स दिव्यबाणो वज्रकवचं प्राप्य मध्य एव सूवलितः । ततोऽमोघस्याऽपि बाणस्य मोघत्वं दृष्ट्वा **चेटक**स्य सैन्याः पुण्यक्षयं मेनिरे । सत्यप्रतिज्ञश्च **चेटको** द्वितीयं बाणं नाऽमुचत् । तद्दिनेऽपसृत्य च द्वितीयदिने तद्वदेव युद्धं चकार । तथैव च स दिने दिने मोघबाणो जातः । तयोश्च घोरं युद्धमभूत् । तस्मिन् युद्धे च द्वयोः पक्षयोर्लक्षाशीत्यधिका भटानां कोटिर्मृता तिर्यक्षु नरकेषु चोत्पन्ना। गणनृपेषु च



नंष्ट्वा स्वस्वनगरं गतेषु **चेटको**ऽपि प्रणश्य पुरीं प्रविवेश। **कूणिक**श्च तां पुरीं रुरोध । ततो वीरौ **हल्ल-विहल्लौ** सेचनकारूढौ रात्रौ **चम्पेश**स्याऽखिलं सैन्यं मर्दयामासतुः । रात्रियुद्धे समागतश्च स गजः स्वप्नगज इव केनाऽपि प्रहर्त्तुं धर्त्तुं वा न शक्तः ।

एवं **हल्ल-विहल्ल**यो रिपुसैन्यानि विनाश्य गतयोः **कूणिको** मन्त्रिण उवाच-"प्रायेणाऽऽभ्यामस्माकमखिलं सैन्यं विनाशितम् । तदनयोर्जये उपायं ब्रूत" । ततो मन्त्रिण ऊचुः-"तौ केनाऽपि जेतुं न शक्यौ यावत् तं गजमारूढौ । तस्मात् तद्गजस्य वधायैव प्रयतनीयम्। मार्गे खादिरा-ऽङ्गारपूर्णा खातिका विधेया। गजबन्धनगर्त्तेव च सा छादयित्वा दुर्लक्ष्या करणीया । वेगादभिधावन् सेचनकश्च तस्यां पतिष्यति । ततः **कूणिको** गजागमनमार्गे तथैव दुर्लक्ष्यां खादिरा-ऽङ्गारपूर्णां खातिकां कारयामास । रात्रौ चाऽवस्कन्दार्थं गजारूढौ **हल्ल-विहल्ला**वाजग्मतुः । सेचनकश्च तत्खातिकासमीपमागत्य विभङ्गज्ञानेन विज्ञाय च हस्तिपकप्रेरणामवमानयन् तस्थौ ।

ततो **हल्ल-विहल्ला**भ्यामत्यन्तं निर्भित्सितः स गजः । त्वं पशुरस्यतोऽकृतज्ञोऽसि, यद् रणात् कातरो जातोऽसि । त्वत्कृत एव विदेशगमनं बन्धुत्यागश्च कृतः । अस्मिन् दुर्व्यसने च त्वत्कृत एव **चेटकः** क्षिप्तः । कुक्कुरः पोषितो वरं यः सदा प्रभौ भक्तो भवति । त्वं प्राणेभ्योऽप्यधिकं पोषितोऽस्मत्कार्यं विना शयसि" । एवं निर्भत्सितश्च गजो निजपृष्ठतः कुमारौ बलादपि भक्त्योत्तारयामास । स्वयं च तस्यां खातिकायां झम्पां दत्त्वा सद्यो मृत्वा प्रथमायां नरकभूमावुत्पेदे ।

ततः कुमारौ दध्यतुः-"आवां धिक् । किमेतदनुष्ठितम् । आवयोरेव व्यक्तं पशुत्वं न त्वसौ सेचनकः पशुः । यस्य कृते च **चेटको** दुर्व्यसने क्षिप्तस्तं स्वयं निधनं प्राप्याऽद्याऽपि जीवावः । **चेटक**सैन्यस्य महानाशस्य साक्षिणावावां वृथा नाशमकृष्वहि । बन्धुः शत्रुतां नीतः । तदद्याऽऽवयोर्जीवितुं न युक्तम् । यदि जीवावस्तर्हि **वीर**जिनस्य शिष्यौ भूत्वैव" । तदा च शासनदेव्या भावयतित्वं गतौ तौ **वीर**जिनसमीपं प्रापितौ द्रुतं व्रतं जगृहतुः" ।

इतश्च **हल्ल-विहल्ल**योः प्रव्रजितयोरपि **कूणिको वैशालीं** वशीकर्त्तुं नाऽशकत् । ततश्च **चम्पेशः कूणिकः** प्रतिज्ञामकरोत्-"यदि नगरीमेतां खरयुक्तहलेन न खनामि तदाऽहं भृगुपातेना-ऽग्निप्रवेशेन वा म्रिये" । एवं कृतप्रतिज्ञोऽपि **कूणिको वैशालीं** नगरीमात्मसात्कर्तुमक्षमः क्रमात् खेदं प्राप । तदाऽखिलस्य **कूणिक**स्य रुष्टा शासनदेवी गन्तुमुद्यतोवाच-

"गणियं चे मागधियं शमने कुलवालुके ।
लमिज्ज कूणिए लाए तो वेशालिं गहिस्सदि" ।

ततः **कूणिक** इमामाकाशदेवतावाचं श्रुत्वा सद्यो जातजय-विश्वास उल्लसन्नुवाच-बालानां योषितामौत्पातिकी भाषा च नाऽन्यथा भवति । तच्छ्रमणः क्वाऽस्ति, **कूलवालुकः** कथं प्राप्स्यते । **मागधिका**ख्या गणिका च क्व विद्यते ?"

तच्छ्रुत्वा मन्त्रिणः प्रोचुः-"देव ! **मागधिका** वेश्या तव नगर एव विद्यते, किन्तु **कूलवालुकं** न जानीमः" ।

तत**श्चम्पेश**ः **कूणिक**स्तदैव **वैशाली**रोधार्थमर्धं सैन्यं मुक्त्वा सैन्यार्धेन सह **चम्पां** ययौ । तत्र गतमात्र एव च **कूणिको** गणिकां



**मागधिका**माजुहाव । तथा तामादिदेश-"भद्रे ! त्वं मतिमती कलानिपुणा च । त्वमनेकपुंसां बुद्धिदात्री । तन्मत्कार्ये स्वां वेश्याकलां सफलय । **कूलवालुकं** श्रमणं पतित्वेन रमय" । सा चैवं करोमीति प्रतिपन्ननृपादेशा नृपेण **कूणिके**न वस्त्रा-ऽलङ्कारादिना सत्कृता विसृष्टा च गृहं जगाम । तत्र किञ्चिद् विचार्य च मूर्त्ता मायेव सा तदैव माया श्राविका जाता । ततो गर्भश्राविकेव यथाविधि द्वादशविधं गृहिधर्मं लोके सत्यमिव दर्शयामास । सरलाशया आचार्याश्च चैत्यपूजादिपरायणां धर्मश्रवणोत्सुकां तां श्राविकामेव मेनिरे ।

अन्यदा च साऽऽचार्यान् कः **कूलवालुकः** साधुरित्यपृच्छत् । तस्या भावमजानानाश्च ते ऊचुः-"धर्मशीले ! पञ्चधाऽऽचारपालको मुनिश्रेष्ठ एकोऽस्ति । तस्य चैकः क्षुल्लः कपिरिव चञ्चलोऽस्ति । स सामाचारीपरिभ्रष्टो वारितः स्मारितोऽपि वाऽतिदुर्नयो रोषं याति । तस्य गुरुस्तु तस्मै दुःश्रवामप्याचारशिक्षां ददौ । यतः परः क्रुद्ध्यतु विषवद् वा तस्य प्रतिभातु, तथाऽपि गुणप्रदा हिता भाषा भाषितव्यैव। स क्षुल्लस्तु गुरोः शिक्षाममधुरामकठिनां च कर्मलाघवाभावाद् नाऽमंस्त ।

अन्यदा चाऽऽचार्या विहरन्तो गिरेर्नगरं ययुः । तत्र च तेन क्षुल्लेन सहो**ज्जयन्तं** गिरिमारुरुहुः । क्षुल्लस्तु देवं वन्दित्वा गिरेरुत्तरतो गुरोः पेषणाय गण्डपाषाणं मुमोच । गुरुश्च खडखडाशब्दं श्रुत्वा कटाक्षेण वज्रगोलकवत् पतन्तं तं पाषाणं दृष्ट्वा जङ्घे वितते चकार । पाषाणश्च तदन्तरे निर्गतवान् । ततो गुरुस्तेन कर्मणा कुपितः क्षुल्लं स्त्रीसकाशाद् व्रतभङ्गं प्राप्स्यसीति शशाप ।

ततः क्षुल्ल उवाच-"गुरो ! तव शापमन्यथा करिष्यामि । अहं तत्र वने वसामि यत्र स्त्रियं पश्याम्येव न" । एवं स दुर्मतिर्मर्यादामिव गुरुं त्यक्त्वा व्याघ्र इव निर्जनं वनं प्रविवेश । तत्र च गिरिणदीतटे सदा प्रतिमामास्थितः पथिकादिसकाशाद् मासादर्धमासाद् वा पारणां चकार । एवं नदीतटे तपस्यतस्तस्य साधोः प्रावृट्कालः प्राप्तः । वर्षप्राचुर्याच्च जलाधिक्यात् कूले उल्लङ्घ्य नद्यः कुलटा इवोन्मार्गगामिन्यो जाताः । क्षुल्लाश्रिततटा नदी चाऽपि कूलमतिचक्राम । तदा जिनशासनभक्ता तन्नदीदेवता दध्यौ-"यद्यहमुपेक्षे तदाऽयं मुनिस्तटद्रुम इव वारिप्रवाहेण नेष्यते" । ततः सा देवता नदीकूलमन्यया दिशा प्रवर्तितवती । तदा तस्य मुनेः **कूलवालक** इति नाम प्रसिद्धम् । स मुनिरधुनाऽमुत्र प्रदेशे वर्त्तते" ।

तच्छ्रुत्वा च सा मायाश्राविका कृतकृत्येव विकसितनेत्रा **कूलवालक**विज्ञानात् फलितमनोरथा तीर्थयात्राच्छलेन तीर्थानि वन्दमाना **कूलवालका**धिष्ठितं देशं प्राप । तत्र च सा मायाश्राविका तं मुनिं वन्दित्वोवाच-"मुने ! त्वयाऽह**मुज्जयन्ता**दितीर्थानि वन्दनीया" । ततो मुनिः कायोत्सर्गं मुक्त्वा धर्मलाभाशिषं दत्त्वा तीर्थानि वन्दयामास । कुत आगताऽसीति पप्रच्छ च । ततः सा मायाश्राविकोवाच-"मुने ! तीर्थानि वन्दितुं **चम्पा**या इहाऽऽगाम् । तेन च तीर्थेभ्यः परमं तीर्थं भवन्तमपि वन्दितवती । तदस्मदीयं पाथेयं भिक्षादोषशून्यमादाय पारणां कृत्वा मामनुग्रहीतुमर्हसि" ।

ततो मुनिस्तस्या भक्तिभावेनाऽनुकूलितचित्तस्तस्याः सार्थं भिक्षामादातुं जगाम । सा च कूटश्राविका तस्मै स्वयं पुरा निष्पादितान् द्रव्ययुतान् मोदकान् ददौ । तैर्भक्षितमात्रैश्च मोदकैः स



मुनिरतिसारग्रस्तो ग्लानः क्षीणबलोऽङ्गान्यपि गोपितुमक्षमो बभूव । ततो **मागधिका** तमुवाच-"मय्यनुग्रहार्थं कृतपारणकस्त्वमिमां दुर्दशां प्राप्तोऽसि । पापिनीं मां धिक् । अधुना चैतां दशां प्राप्तं त्वामेकाकिनं मुक्त्वा निगडिताविव मम पादौ नोत्तिष्ठतः" ।

एवमुक्त्वा सा तत्र स्थिता क्षणे क्षणे तत्समीपं भेषजानि दातुमङ्गान्युद्वर्त्तयितुं च गच्छन्ती तस्य तथोद्वर्त्तनादिकं चकार यथा तस्य मुनेस्तस्याः सर्वाङ्गस्पर्शनमभूत् । तथा सा शुश्रूषया तं क्रमाद् नीरोगं चकार । स मुनिश्च चम्पकेन वस्त्रमिव तद्भक्त्याऽधिवासितो जातः । तथा तस्याः कटाक्षावलोकनैरङ्गस्पर्शैर्मृदुवचोभिश्च तस्य मुनेश्चित्तं चलितम् । एवं मुने**र्मागधिका**याश्च दिने दिने परस्परं शय्यासनादिभिर्दम्पतिव्यवहारोऽतिव्यक्तो जातः । ततः सा **मागधिका** तं **कूलवालकं** मुनिं **चम्पां** निनाय । तथा सा **चम्पेश**मुवाच-"अयं **कूलवालको** मुनिर्मया पतीकृत्याऽऽनीतः किं करोत्विति समादिश" ।

अथ **कूणिको** नृपस्तं मुनिमादिदेश-"मुने ! यथा **वैशाली** भज्यते तथा शीघ्रं कुरु" । **कूलवालक**श्च नृपादेशं प्रतिपद्य लिङ्गिरूपेण **वैशालीं** जगाम । **चम्पे**शोऽपि च पुरैव रुद्धां **वैशालीं** जयाशया सर्वसैन्यै रुरोध । **कूलवालक**श्च नगरे द्रव्याणि पश्यन्नेकं **मुनिसुव्रतस्वामि**स्तूपमपश्यत् । ततः स मुनिर्दध्यौ-"अस्य स्तूपस्य प्रतिष्ठालग्नं बलवत्तरम् । तत्प्रभावेणैव नगरं न भज्यते । यदि केनाऽप्युपायेनेदं स्तूपमुत्थाप्यते तदा **वैशाली** भज्यते । अन्यथेन्द्रेणाऽप्येषाऽभज्या" ।

एवं विचारयन् **वैशाल्यां** भ्रमन् स **कूलवालको** नगरीरोधपीडितैर्लोकैः पृष्टः–"भदन्त ! शत्रुणा पुरीरोधेन वयं पीडिताः स्मः । तद्यदि जानासि तर्हि कदा रोधनिवृत्तिः स्यादित्याख्यातुमर्हसि" । ततः स मुनिरुवाच–"अहं जानामि, यावदयं स्तूप इहाऽस्ति तावन्नगर्या उद्वेष्टो न भविष्यति । अस्मिन् स्तूपे भज्यमान एवं शत्रुसैन्यं समुद्रवेलेवाऽकस्मादपसरिष्यति । तेन वः प्रत्ययः स्यात् । स्तूपे सर्वथोत्खनिते च भवद्भ्यः स्वस्ति भवेत् । अयं हि स्तूपः कुलग्ने स्थापितः । तदस्य भङ्गे मोहं मा गाः" ।

ततस्तन्मुनिविप्रतारितो जनस्तत्स्तूपं भङ्क्तुमारेभे । स मुनिश्च स्तूपे भङ्क्तुमारब्ध एव गत्वा **कूणिकं** द्विक्रोशीमपसारयामास । ततो जातविश्वासो लोकः कूपमण्डूकबुद्धिः कूर्मन्यासशिलां यावत्स्तूपं निर्मूलमुच्चखान । ततः **कूणिको** द्वादशाब्द्यन्ते **वैशालीं** बभञ्ज । सा हि स्तूपप्रभावादेव दुरतिक्रमाऽऽसीत् । ततश्च **कूणिक-चेटक**योर्युद्धं निवृत्तम् । एतस्यामवसर्पिण्यामेवं कदाऽपि नाऽभूत् ।

अथ **कूणिकश्चेटकं** कथयामास–"आर्य ! **चेटक** ! पूज्योऽसि, तव प्रियं किं करोमि" । **चेटक**श्च विषण्णः **कूणिकं** कथयामास– "जयोत्सवोत्सुकोऽपि त्वं विलम्बेन पुरीं प्रविशेः" । दूतेन **चेटक**वचो ज्ञात्वा च **कूणिकः** किमेतद्याचितमिति लज्जितस्तथैव स्वीचकार ।

इतश्च **चेटक**स्य दौहित्रः **सुज्येष्ठा**पुत्रः **सात्यकि**र्विद्याधरस्तत्राऽऽगतो दध्यौ–"शत्रुभिर्लुटयमाना एता मातामहप्रजाः कथं द्रक्ष्यामि, तदेना अन्यत्र नयामि" । एवं विचार्य स विद्यया सर्वं तन्नगरीलोकमुत्पाट्य पुष्पमाल्यमिव लालयन् **नीलवत्**पर्वते निनाय ।



**चेटक**श्च गले लोहपुत्तलिकां बद्ध्वाऽनशनं कृत्वाऽस्ताघजले प्रविवेश । **धरणेन्द्रे**ण प्रशस्यमानधर्मध्यानो महामनाः स **चेटको** मृत्योरभीतस्तस्थौ । तत्र च सोऽर्हदादीन् स्मृत्वाऽऽलोचनां कृत्वा नमस्कारपरायणो विपद्य स्वर्गं ययौ । **कूणिको**ऽपि तां पुरीं युक्तगर्दभैर्हलैः खेटयित्वा स्वां प्रतिज्ञामपूरयत् । तत**श्चम्पे**शस्तीर्णप्रतिज्ञो महोत्सवेन **चम्पा**पुरीं जगाम ।

अन्यदा च विहारक्रमतः श्री**वीर**जिन**श्चम्पां** प्राप्य तत्र समवासरत् । तत्र च **काला**दिकुमारमातरः पुत्रशोकाद् विरक्ताः **श्रेणिक**नृपभार्याः श्री**वीर**जिनपार्श्वे प्रवव्रजुः । **कूणिको**ऽपि च भगवन्तं वन्दितुं तत्समवसरणं गत्वा नत्वा यथास्थानमुपविश्य लब्धावसरो रचिताञ्जलिः पप्रच्छ–"भगवन् ! आजन्माऽपरित्यक्तकामभोगाश्चक्रिणः कां गतिं यान्ति ?" । ततः प्रभुरुवाच–"तादृशाश्चक्रिणः सप्तमीं नरकभूमिं यान्ति" । ततो मम का गतिर्भाविनीति **कूणिके**न पुनः पृष्टो भगवानुवाच–"त्वं षष्ठीं नरकभूमिं यास्यसि" ।

ततः किमहं सप्तमीं नरकभूमिं न यास्यामीति **कूणिके**न पृष्टः प्रभुरुवाच–"त्वं चक्रवर्ती नाऽसि" । ततः **कूणिक** उवाच–"भगवन् ! किं नाऽहं चक्री ? चक्रितुल्यैव न मम चतुरङ्गिणी सेनाऽस्ति ?" ततः प्रभुरुवाच–"तव चक्रादीनि रत्नानि न सन्ति । एकेन रत्नेनाऽपि विना न चक्रित्वम्" । तच्छ्रुत्वोत्थायाऽभिमानी **कूणिक** एकेन्द्रियाणि लौहानि महारत्नानि कारयामास । तथा **पद्मावतीं** स्त्रीरत्नं गजादिकानि रत्नान्यपि च स मन्दबुद्धिः स्वमनोरथपीडितः कल्पयामास । तथाऽतुल्यविक्रमः स **भरत**क्षेत्रं साधयन् **कूणिकः** क्रमेण **वैताढ्य**गुहां **तमिस्रा**मासाद्य स्वमजानन्नुन्मत्त इव

दुर्भाग्यग्रस्तो दण्डेन गुहाद्वारकपाटानि त्रिस्ताडयामास । तद्गुहाद्वार-रक्षकः **कृतमालदेवश्च** तमुवाच-"कोऽयमनात्मज्ञो मुमूर्षुर्गुहाद्वारं ताडयति ?" ततः **कूणिक** उवाच-"किं मां जिगीषुमागतं न वेत्सि ? अह**मशोकचन्द्र**नामा चक्री जातोऽस्मि" ।

ततः **कृतमालदेव** आह-"द्वादश चक्रिणोऽभवन् । त्वं मृत्युप्रार्थकोऽसि, बुध्यस्व, ते स्वस्त्यस्तु" । ततः **कूणिक** उवाच-"अहं त्रयोदशश्चक्री कृतपुण्य उत्पन्नोऽस्मि । लोके पुण्यैर्न किमपि दुर्लभम् । मम पराक्रमं न जानासि । इमां गुहामुद्घाटितद्वारां कुरुष्व, अन्यदा न तव क्षेमम्" । तत आधिदैविकदोषग्रस्तमिवाऽसम्बद्ध-भाषिणं **कूणिकं कृतमालः** सद्य एव क्रोधाद् भस्मसाच्चकार । एवं विपद्याऽ**शोकचन्द्रो** नृपः षष्ठीं नरकभूमिं जगाम । न ह्यर्हतां वचनं जातुचिदन्यथा भवति ।

एवं **कूणिके** नामशेषतां गते मन्त्रिणस्तत्पुत्र**मुदायिनं** राज्ये न्यदधुः । **उदाय्य**पि प्रजा नीत्या पालयामास । जैनशासनं च पृथिव्यां प्रथयामास । तस्य स्वस्थानस्थितस्याऽपि प्रतापमसहिष्णवो वैरिनृपा घूका इव गिरिकन्दरेऽवात्सुः । तस्यो**दायिनो** धर्मदान-युद्धभेदैर्वीरत्वं लोके राज्ञां निदर्शनं जातम् । तस्य कदाऽपि स्वपर-चक्रजं भयं नाऽभूत् । किन्तु स सदा श्रावकव्रतखण्डनाद् भयमियाय । स चतुष्पर्व्यां चतुर्थादितपःपरायणः पौषधगृहे स्वस्थः स सामायिक-स्थस्तस्थौ । तस्य हृदये च सदाऽर्हन् देवो गुरुः साधुरिति मन्त्राक्षरमिव जागर्ति स्म । तथा स सदा श्री**वीर**जिनदेशनां शृणोति स्म ।

एवं प्रभोराकेवलोत्पत्तेर्महीं विहरतो **वीर**जिनस्य परिवारे साधूनां चतुर्दश सहस्राणि, साध्वीनां षट्त्रिंशत्सहस्राणि, चतुर्दश-



पूर्वभृतां शतत्रयमवधिज्ञानिनां त्रयोदशशती, वैक्रियलब्धिमतां सप्तशती, अनुत्तरकेवलिनां मनःपर्ययिणां च पञ्चशती, वादलब्धिमतां चतुःशती, श्रावकाणामेकोनषष्टिसहस्त्रयुग् लक्षैका, श्राविकाणां साष्टादशसहस्त्रिका त्रिलक्षी चाऽभवन् ।

अथ **गौतम-सुधर्माणौ** विहाय नवसु गणधरेषु मोक्षं गतेषु सुरा-ऽसुरादिभिः सेवमानः प्रभु**र्वीरजिनोऽपापां** नगरीं जगाम ॥१२॥

*इति दशमे पर्वणि भाविकुमारपालदेवचरित-अभयप्रव्रज्या-कूणिकचरित-उदायिराज्य-श्रीमहावीरकेवलिविहारवर्णनात्मको द्वादशः सर्गः ॥१२॥*

## त्रयोदशः सर्गः

अथ देवा **अपापा**नगर्यां प्राकारत्रयविराजितं रमणीयं प्रभोः समवसरणं चक्रुः । प्रभुश्च निजायुषोऽन्तं ज्ञात्वा चरमां देशनां कर्त्तुं तत्र यथाविधि प्रविश्य रत्नसिंहासने प्राङ्मुख उपाविशत् । सुरा-ऽसुरादयश्चाऽपि यथास्थानमुपविविशुः । **अपापा**नगरेश्वरश्च **हस्तिपालः** प्रभुं समवसृतं ज्ञात्वा समागत्य नत्वा पुर उपविवेश । ततश्च प्रभुं नत्वा भक्त्या स्तुत्वा च विरम्य शक्रे निजासने समुपविष्टे-ऽ**पापा**पुरीपति**र्हस्तिपाल**नृपोऽपि भक्त्या स्तुत्वा निजासनमलञ्चकार । ततश्चरमतीर्थकृत् प्रभु**र्वीर**श्चरमां देशनामकरोत् ।

इह चत्वारः पुरुषार्थाः । तेषु प्राणिनां पुरुषार्थभूतौ कामा-ऽर्थौ वस्तुतोऽनर्थभूतावेव । पारमार्थिकोऽर्थ एको मोक्ष एव । तस्य हेतुः संयमादिर्दशविधो धर्मः । संसारो दुःखभूयिष्ठः । मोक्षश्च शाश्वता-ऽनन्तसुखमयः । तत्र भवत्यागस्य मोक्षप्राप्तेश्च धर्मं विना न सम्भवः । यथा पङ्गुरपि क्रमाद् दूरं मार्गं गच्छेत् तथा भूरिकर्माऽपि जनो धर्मं श्रितो मोक्षमाप्नुयात्" । एवं देशनां कृत्वा प्रभुर्विरतवान् ।

अथ **पुण्यपाला**ख्यो मण्डलेशो नत्वा प्रभुमुवाच-'भगवन् ! मयाऽद्य गजो वानरः क्षीरद्रुमः काकः सिंहः कमलं बीजं घटश्चेत्यष्टौ स्वप्ना दृष्टाः । तेन च भीतोऽहमिति तत्फलमाख्यातुमर्हसि" । ततः



श्री**वीर**जिन उवाच-"विवेकवन्तः सन्तोऽपि श्रावका अतः परं गजा इव क्षणिकसुखगृध्नवो भूत्वा गृहे निवत्स्यन्ति । परचक्रभये दौर्गत्ये वा समुपस्थिते प्रव्रज्यां न गृहीष्यन्ति गृहीतामपि च कुसङ्गवशात् त्यक्ष्यन्ति । विरला एव कुसङ्गे सत्यपि व्रतं पालयिष्यन्ति । एतद् गजस्वप्नफलम् ।

प्रायो वानरा इवाऽस्थिरपरिणामा अल्पसत्त्वा आचार्यप्रभृतयो गच्छस्था व्रते प्रमादिनो भविष्यन्ति । ते धर्मस्थानितरानपि विपरीतपरिणामान् करिष्यन्ति । विरला एव धर्मप्रयासपरायणा भविष्यन्ति । ये वा स्वयमप्रमादिनः शिथिलधर्मसूपदेशं प्रदास्यन्ति। ते ग्राम्यैर्गामस्थनागरवत् तैरुपहसिष्यन्ते । अतः परमेवमेव प्रवचनावज्ञा भविष्यति । एतत् कपिस्वप्नफलम् ।

क्षीरद्रुमतुल्याः शासनप्रभावकाः श्रावकाः सुक्षेत्रे दातारः प्रतारणपरैर्लिङ्गिभी रोत्स्यन्ते । सिंहवत् सत्त्वशालिनोऽपि महामुनय-स्तेषां कुमतीनां सारमेया इवाऽसत्त्वशीलाः प्रतिभास्यन्ति । बर्बूरसमा लिङ्गिनः सुखविहितविहारक्षेत्ररीतिं ग्रहीष्यन्ति । एतत् क्षीरद्रुम-स्वप्नफलम् ।

प्रायो धर्मार्थिनोऽपि मुनयो धृष्टस्वभावा दीर्घिकाजलेषु काका इव गच्छेषु न रंस्यन्ते । तथाऽन्यगच्छिकैः प्रतारणपरायणैः सह विह-रिष्यन्ति । एभिर्गमनं युक्तमित्युपदेशकांश्च ते नितान्तमुपद्रोष्यन्ति । एतत् काकस्वप्नफलम् ।

सिंहतुल्यं निजमतं जातिस्मरणादिविरहितं सदस्मिन् धर्मज्ञ-वर्जिते **भरत**वने विनाशमेष्यति । जिनमतं हि कुतीर्थिक-श्वापदादिभिर्न जातुचिदभिभवमेष्यति । किन्तु मन्दबुद्धयो लिङ्गिन

एव स्वशरीरोत्पन्नाः कृमय इव तद् नाशयिष्यन्ति । लिङ्गिनोऽपि च प्राक्प्रभावात् सिंहतुल्याः श्वापदसदृशैः कुतीर्थिकैर्न जातुचिदभि-भवमेष्यन्ति । एतत् सिंहस्वप्नफलम् ।

कमलाकरेषु सुरभीणि कमलानीव सुकुलेषूत्पन्नाः प्राणिनो धार्मिका न भविष्यन्ति, धार्मिका अपि च कुसङ्गतो ग्रामाव-करोत्पन्नगर्दभाब्जवदन्यादृशा भविष्यन्ति । तथा धर्मस्था अपि भव्यात्मानः कुदेशे कुकुले संजाता इत्येवमनुपादेया भविष्यन्ति । एतत् कमलस्वप्नफलम् ।

यथोषरे बीजबुद्ध्योप्तमबीजं न फलाय तथा कुपात्रे कल्पबुद्ध्याऽकल्प्यानि वप्स्यन्ति । यथा वा कोऽपि कृषीवलो-ऽबुद्धिकृतमेव क्षेत्रे घृणाक्षरन्यायादबीजान्तर्गतं बीजं वपेत् तथा श्रावका अज्ञानाः पात्रे दानात्मकमकल्पनान्तर्गतं कल्पं करिष्यन्ति । एतद् बीजस्वप्नफलम् ।

क्षमादिगुणपल्लवोपेताश्चारित्रजलपूर्णा अल्पा एव मुनयो घटा इवैकान्तस्था भविष्यन्ति । तथा मलिना घटा इव शिथिला-चारचारित्रा लिङ्गिनो बहवो यत्र तत्र भविष्यन्ति । ते च द्वेषादिग्रस्ता मुनिभिः कलहं करिष्यन्ति । तेन च लोके द्वयोरेव साम्यं स्यात् । गीतार्था लिङ्गिनश्च साम्येनैव ग्रहिलेन जलेनाऽग्रहिलोऽपि ग्रहिलो नृप इव व्यवहरिष्यन्ति ।

तथाहि-**पृथिवीपुरे पूर्णो** नाम नृप आसीत् । तस्य च मतिमान् **सुबुद्धि**र्नाम सचिवोऽभवत् । स च निमित्तज्ञं **लोकदेवं** भाविनं कालं पप्रच्छ । ततो नैमित्तिक उवाच-''मासात् पश्चाद् महावृष्टिर्भविष्यति । तज्जलं च यः पास्यति स सर्वोऽपि ग्रहिलो भविष्यति । कियत्यपि काले गते च सुवृष्टिर्भविष्यति । तज्जलपानाच्च लोकः पुनः सज्जो भविष्यति ।



''तच्छ्रुत्वा च सचिवस्तद्वृत्तं नृपाय व्यजिज्ञपत् । नृपश्च पटहघोषणया तद्वृत्तं लोके ख्यापयित्वा तज्जलसङ्ग्रहार्थमादिदेश । लोकेऽपि तथा चकार । अनन्तरं च निमित्तज्ञोक्तदिने वृष्टिर्जाता । कियत्यपि काले गते च लोकानां प्राक् सङ्गृहीतं जलं समाप्तम् । नृपस्य सचिवस्य च केवलं सङ्गृहीतं जलमवशिष्टमासीत् । किन्तु लोकाः सामन्तादयश्च प्राक् सङ्गृहीतजलव्ययादगत्या नवं जलं पपुः । तेन च ते सर्वे ग्रहिला जाताः स्वैरं ननृतुर्जगुर्जहसुर्विविधं विचेष्टयामासुश्च । केवलं नृपा-ऽमात्यावेव स्वस्थावभूताम् । ततस्ते सामन्ताद्या नृपा-ऽमात्यौ स्वविलक्षणौ दृष्ट्वा मन्त्रयामासुः-''नूनं नृपा-ऽमात्यौ ग्रहिलौ । तस्माद् विसदृशचेष्टिताविमौ दूरीकृत्याऽन्यौ स्वसदृशौ नृपा-ऽमात्यौ स्थापयिष्यामः'' । मन्त्री च तेषामुक्तप्रकारं मन्त्रं ज्ञात्वा नृपायाऽऽख्यत् ।

ततो नृप उवाच-''कथं तेभ्य आत्मरक्षा कार्या ? लोकवृन्दं हि नृपवदेवाऽवशं भवति । ततो मन्त्र्युवाच-''ग्रहिलैः सह ग्रहिलीभूयैव कथञ्चित् स्थातव्यम् । अन्यो न कोऽपि त्राणोपायः । एतदेव समयोचितम्'' । ततस्तौ नृपा-ऽमात्यौ कृत्रिमरूपेण ग्रहिलीभूय तेषां मध्ये निजसम्पदं रक्षन्तौ वर्तनं चक्रतुः । अनन्तरं च सुकाले जाते सुवृष्टौ सत्यां च नवोदकं पीत्वा सर्वे मूलप्रकृतिस्थाः स्वस्था बभूवुः । एवमेव दुःषमाकाले गीतार्था लिङ्गिभिः सह सदृशीभूय शुभसमयं प्रतीक्षमाणाः स्थास्यन्ति'' । एवं स्वप्नफलं श्रुत्वा महाशयः **पुण्यपालः** प्रबुद्धः प्रव्रज्यां गृहीत्वा क्रमाद् मोक्षं प्राप ।

अथ भगवन्तं **वीर**जिनं प्रणम्य गणधरो **गौतम** उवाच–“तृतीयारकपर्यन्तेऽर्हन्**नृषभस्वाम्य**भवत् । चतुर्थारे चाऽवसर्पिण्यां भवन्तं याव**दजिता**दयस्त्रयोविंशतिरर्हन्तोऽभवन् । अतः परं पञ्चमारे **दुःषमा**ख्ये यद् भावि कृपया तदाख्यातुमर्हसि” । ततो **वीर**जिन उवाच–“मम निर्वाणात् सार्धाष्टमाससहितेषु त्रिषु वर्षेषु गतेषु पञ्चमारकप्रवेशो भावी । मन्निर्वाणादेकोनविंशतौ वर्षशतेषु चतुर्दशाब्द्यां च गतेषु म्लेच्छकुले चैत्रमासेऽष्टमीदिने विष्टिकरणे **पाटलिपुत्रे कल्की** नृपो भावी । स **रुद्र**नाम्ना **चतुर्मुख**नाम्ना च ख्यातो भविष्यति ।

तदानीं च **मथुरा**नगरे **राम-कृष्ण**योरायतनं वाताहतजीर्णवृक्षवदकस्माद् निपतिष्यति । काष्ठे घुणा इव च क्रूरमतिके तस्मिन् नृपे सदा क्रोध-मान-माया-लोभाः कषायाः स्वाभाविका भविष्यन्ति । तदानीं च लोके चौरनृपविरोधो नृपभयं गन्धरसक्षयो दुर्भिक्षमीतिरवृष्टिश्च भविष्यन्ति । तदानीं चाऽष्टादशाऽब्दानि मारी तावन्त्येव च महामारी भविष्यति । ततः परं च क्रूरात्मा **कल्की** नृपो भविष्यति । स च पुरे भ्रमन् पञ्चस्तूपान् निरीक्ष्य पार्श्वस्थान् जनान् केनैते निर्मिता इति प्रक्ष्यति ।

ततस्ते कथयिष्यन्ति–“पुरा विश्वविख्यातो **नन्दो** नाम धनैः **कुबेर**तुल्यो नृपो बभूव । तेनेह स्तूपेषु भूरि हिरण्यं निक्षिप्तमस्ति । कोऽपि नृपोऽद्यावधि तदादातुं क्षमो न बभूव” । **कल्की** च तच्छ्रुत्वा स्वभावलुब्धस्तान् स्तूपान् खानयित्वा सुवर्णं ग्रहीष्यति । ततश्च स धनार्थी पुरं सर्वतः खानयिष्यति । सर्वान् नृपांश्च स तृणवद् गणयिष्यति । तदानीं च **कल्कि**नृपेण खन्यमानायाः स्वनगरभूमेः प्रस्तरमयी **लवणादेवी** गौरुत्थास्यति । सा च चतुष्पथेऽवस्थिता



भिक्षार्थं गतागतं कुर्वतो मुनीन् शृङ्गाग्रभागेणाऽऽघट्टयिष्यति । तेन च वृद्धा “भाविनं जलोपद्रवमसौ सूचयति, तदन्यत्र क्वाऽपि व्रजते”ति वदिष्यन्ति ।

तच्छ्रुत्वा च कतिपये मुनयस्ततोऽन्यत्र विहरिष्यन्ति । कतिपये च भक्त-वस्त्रादिलुब्धास्तत्रैव स्थिताः कथयिष्यन्ति–“ननु यच्छुभमशुभं वा कालवशात् कर्मवशाद् वा भावि तद् निवारयितुमिन्द्रोऽपि न क्षमः” । **कल्कि**नृपश्च सर्वान् पाखण्डिनः करं याचिष्यते । सारम्भपरिग्रहाश्च ते करं तस्मै प्रदास्यन्ति । ततः स लुब्धो नृपोऽन्यैः पाखण्डिभिः करो दीयते यूयं किं न दत्थेति वदन् मुनीन् रोत्स्यति । ततो मुनयस्तं वदिष्यन्ति–“नृप ! वयमकिञ्चनाः भिक्षासेविनो धर्मलाभं विहाय किमन्यत् तुभ्यं दद्महे । नृपो ब्रह्मनिष्ठान् मुनीन् रक्षन् तत्पुण्यषष्ठांशेन युज्यते इति पुराणेऽपि कथितमस्ति । तस्मादस्मादनाचाराद् विरम । अन्यथाऽनेन दुर्व्यवसायेन पुरे राष्ट्रे चाऽशुभं स्यात्” । एवं साधुवचनं श्रुत्वा स **कल्कि**नृपो यमराज इव भ्रकुटीकरालमुखः कोपमेष्यति ।

ततस्तं नगरे देवताः "पाप ! मुनीन् याचमानो मर्त्तुकामोऽसि किमि"ति तर्जयिष्यन्ति । ततः सिंहगर्जनेन गज इव देवतावचसा भीतः स **कल्की** प्रणामपूर्वकं तान् मुनीन् क्षमयिष्यति । तदानीं च प्रतिदिनं **कल्कि**नृपस्य पुरक्षयसूचका भूयांसो भयङ्करा उत्पाता भविष्यन्ति । तत्र च सप्तदशाऽहोरात्रान् मेघो वर्षिष्यति । **गङ्गा**प्रवाहश्च तटमतिक्रम्य तन्नगरं प्लावयिष्यति । तत्र चोच्चस्थले कोऽप्याचार्यः **प्रातिपदा**ख्यः सङ्घलोको नगरजनश्च **कल्कि**नृपश्च स्थास्यन्ति । सर्वतः प्रसरता **गङ्गा**प्रवाहजलेन बहवः पुरजना पञ्चत्वं यास्यन्ति । जलोपसर्गे निवृत्ते च **कल्कि**नृपो **नन्द**द्रव्येण पुनरपि

तन्नगरं नवं करिष्यति । तत्र चैत्यानि भविष्यन्ति, मुनयो विहरिष्यन्ति । सस्यसमृद्धिसाधनं वारिदश्च काले वर्षिष्यति । तदानीं च द्रम्मेण कुम्भलाभेऽपि जनः सस्यं न क्रेष्टाते । एवं **कल्किनि** शासति पञ्चाशदब्दीं सुभिक्षं भविष्यति ।

पुनरपि **कल्कि**नृप आसन्नमृत्युः सर्वान् पाखण्डिनो मुनींश्च लिङ्गानि त्याजयेत्युपद्रोष्यति । तथा स ससङ्घं **प्रातिपद**माचार्यं गोवाटके क्षिप्त्वा भिक्षायाः षष्ठं भागं याचिष्यते । ततः सङ्घः शक्राराधनार्थं कायोत्सर्गं करिष्यति । शासनदेव्यश्च **कल्किनं** न कल्याणायेदमिति बोधयिष्यन्ति । शक्रश्च सङ्घस्य कायोत्सर्गप्रभावेण कम्पितासनो वृद्धब्राह्मणरूपेणाऽऽगत्य सभायां सिंहासनासीनं **कल्कि**नृपं कथयिष्यति-''कथं नु त्वयैते मुनयो रुद्धाः ?''

ततः **कल्की** कथयिष्यति-''मन्नगरवास्तव्या इमे भिक्षाषष्ठांशमपि करं न यच्छन्ति । पाखण्डा हि सर्वे मम करदाः, अमी नैव । दुष्टा गौरिव बलाद् दोग्धुं वाटके निरुद्धाः'' । ततः शक्रस्तं वदिष्यति-''एषां न किमप्यस्ति, एते भिक्षांशमपि न कदाऽपि कस्याऽपि दास्यन्ति । भिक्षुभ्यो भिक्षांशं याचमानस्त्वं किं न लज्जसे ? तदमून् मुञ्च । अन्यथा तव महाननर्थो भावी'' । तद्वचसा कुपितश्च **कल्की** भटान् द्विजं गलहस्तेन निर्वासयितुमादेक्ष्यति ।

ततश्च शक्रः पापं **कल्किनं** चपेटाप्रहारात् सद्यो भस्मसात्करिष्यति । एवं वर्षाणां षडशीतिमायुः पूरयित्वा **कल्कि**नृपो दुष्परिणामायां नरकभूमौ नारको भविष्यति । शक्रश्च **कल्कि**पुत्रं **दत्तं** जैनं धर्मं बोधयित्वा राज्ये स्थापयित्वा सङ्घं वन्दित्वा च स्वस्थानं गमिष्यति । **दत्त**श्च पितुर्घोरं पापफलं शक्रशिक्षां च स्मरन् महीं



जिनचैत्यविभूषितां करिष्यति । ततः परं पञ्चमारकपर्यन्तं जिनधर्मस्य निरवच्छिन्ना प्रवृत्तिर्भाविनी ।

इदं **भरत**क्षेत्रमर्हत्काले ग्राम-नगरादिशोभितं धन-धान्यसमृद्धं स्वर्गतुल्यमभूत् । तस्मिन् काले ग्रामा नगरतुल्या, नगराणि स्वर्गसमानि, गृहमेधिनो नृपतुल्या, नृपाः कुबेरोपमा, आचार्याश्चन्द्रतुल्याः, पितरो देवतोपमाः, श्वश्र्वो मातृसदृश्यः, श्वशुराः पितृनिभा, जनाः सत्यशौचपरा, धर्मा-ऽधर्मविवेकसम्पन्ना, विनयिनो, गुरुदेवपूजका, स्वदारसन्तुष्टाश्चाऽभवन् । विज्ञानं विद्याकुलं च पूजितमासीत् । परचक्रेतिदस्युप्रभृतिभ्यो भयं नवः करश्च नाऽभूत् । नृपा जिनभक्ताः कुतीर्थिका निन्दिता उपसर्गादीनि दशाऽप्याश्चर्याणि च बभूवुः ।

ततः परं **दुःषमा**यां कषायैर्लुप्तधर्माशयोऽपमर्यादश्च जनो भावी । क्रमशो गच्छति काले चोर्ध्वमूर्ध्वं लोकः कुतीर्थिकप्रतारितमतिरहिंसादिवर्जितो भावी । तदानीं च ग्रामाः श्मशानतुल्या, नगराणि प्रेतलोकतुल्यानि, कुटुम्बिनो दासोपमा, नृपा यमदण्डसदृशा भविष्यन्ति । नृपा हि लुब्धा निजभृत्यानां भृत्याश्च जनानां धनं ग्रहीष्यन्ति । एवं मात्स्यो न्यायः प्रवर्त्स्यति । येऽनृपास्ते मध्ये मध्याश्चाऽन्तिमा भाविनः । देशाश्च सदा दोलायिताः स्युः ।

तदानीं हि चौराश्चौर्याद् नृपाश्च करेण प्रजाः पीडयिष्यन्ति । व्यापारिणो भूतग्रहप्राया अधिकारिणो लञ्चालुब्धाश्च भविष्यन्ति । स्वार्थमात्रपरायणो जनः स्वजनविरोधी परार्थपराङ्मुखः सत्य-लज्जा-दाक्षिण्यवर्जितश्च भावी । शिष्या गुरून् नाऽऽराधयिष्यन्ति । गुरुश्च शिष्येषु श्रुतज्ञानोपदेशं न करिष्यन्ति । एवं गुरुकुलवासः क्रमाद् विलुप्तः स्यात् । मही बहुसत्त्वव्याप्ता लोकश्च धर्मे

मन्दमतिर्भावी । देवाः प्रत्यक्षा न स्युः । सुताः पितॄन् न मानयिष्यन्ति । स्नुषाः सर्पीभूताः स्युः, श्वश्र्वश्च कालरात्रितुल्या भविष्यन्ति । कुलवध्वश्च लुप्तलज्जा नेत्रविकारैर्हासैर्जल्पैरपरैर्विलासैश्च वेश्यामधः करिष्यन्ति ।

तदानीं च श्रावक-श्राविकाहानिश्चतुर्धा धर्मलोपश्च स्यात् । साधूनां साध्वीनां च पर्वदिनेष्वपि निमन्त्रणं न भवेत् । धर्मकार्येऽपि कूटतुली कूटमानं शाठ्यं च भावि । सज्जना दुःस्थाः स्युः, दुर्जनाः सुस्थाः स्थास्यन्ति । तदानीं च मणि-मन्त्रौषधि-तन्त्रविज्ञानानां धनानामायुषां फल-पुष्परसानां रूपस्य शरीरोन्नतेर्धर्माणां शुभभावनानामन्येषां च पञ्चमारके ह्रासो भविष्यति ।

षष्ठेऽरे च ततोऽप्यधिकतया तद्भावि । एवं काले गच्छति पुण्ये क्षीयमाणे यस्य मतिर्धर्मे भाविनी तस्य जीवितं सफलम् । **दुःषमायां भारते दुःप्रसहा**ख्य आचार्यः, साध्वी **फल्गुश्रीर्नागिलः** श्रावकः, **सत्यश्रीः** श्राविका, **विमलवाहनो** नृपः, **सुमुख्या**ख्यो मन्त्री चैते मुख्या भाविनः । ते च रत्निद्वयप्रमाणदेहा विंशतिवर्षायुषश्च स्युः । **दुष्प्रसहा**दीनां चतुर्णां षष्ठं सुख्यं तपः स्यात् ।

तदानीं च **दशवैकालिक**ज्ञ एव चतुर्दश पूर्वभृत् स्यात् । **सदुष्प्रसहं** यावत् सङ्घं तीर्थं च प्रबोधयिष्यति । ततोऽग्रे यो धर्मो नास्ति स एव धर्मः प्रवर्त्तेत । यश्चैष धर्मो नास्तीति वदिष्यति सङ्घेन सङ्घबहिष्कृतो भविष्यति । **दुष्प्रसह**श्च गृहे द्वादशाब्दीं व्रते चाऽष्टाब्दीमतीत्य पर्यन्तेऽष्टमभक्तेन विपद्य **सौधर्मं** कल्पं गमिष्यति । तथा पूर्वाह्णे चारित्रस्य मध्याह्ने राजधर्मस्याऽपराह्णेऽग्नेश्च समुच्छेदो भविष्यति । एवमेकविंशतिवर्षसहस्राणि **दुःषमा**कालः ।



**एकान्तदुःषमाकालो**ऽप्येतावान् भविष्यति । तत्र धर्मतत्त्वे समुच्छिन्ने जगति हाहाकारः प्रवर्त्तेत । लोकश्च पशुवद् माता-पुत्रादिव्यवस्थावर्जितः स्यात् । अनिलाश्च तीक्ष्णा रजोबहुला अप्रियाश्च वास्यन्ति । दिशश्च रात्रिन्दिवं भयङ्करा धूमायिताश्च स्युः । चन्द्रोऽतिशीतलान् किरणान् सूर्यश्चाऽत्युष्णान् प्रसारयिष्यति । लोकश्चाऽतिशीतोष्णबाधितः क्लेशमेष्यति । तदानीं च मेघा विरसाः क्षारमेघा अम्लमेघा विषमेघा अग्निमेघा वज्रमेघाश्च स्वस्वानुरूपं वर्षिष्यन्ति । येन लोकानां कास-श्वास-शूल-कुष्ठ-जलोदर-ज्वरशिरःपीडादयो महारोगा भविष्यन्ति । जल-स्थला-ऽऽकाशचारिणस्तिर्यञ्चो दुःखेन स्थास्यन्ति । क्षेत्र-वन-वाटिका-तरु-तृण-लतादीनां संक्षयो भवेत्। **वैताढ्यमृषभकूटं गङ्गां सिन्धुं** च विहाय सर्वं पर्वत-गर्त्त-नद्यादिकं समीभविष्यति । भूमिश्च कदाचिद् रजोबहुला कदाचित् कर्दमबहुला कदाचिदङ्गारमर्मरसन्निभा भस्मरूपा च भविष्यति ।

पुरुषाः स्त्रियश्च रत्निप्रमाणा दुर्वर्णाः परुषोक्तिपरा रोगपीडिताः क्रोधिनस्तारस्वराश्चिपिटनासिका निर्लज्जा वस्त्रपरिधानहीनाः स्युः । तत्र पुरुषाणामायुर्विंशतिः वर्षाणि, स्त्रीणां च षोडशवर्षाणि स्युः । स्त्री षड्वर्षैव गर्भं धारयिष्यति दुःखप्रसवा च भविष्यति । षोडशाब्दिकाश्च पुत्र-पौत्रादिपरिवृताः स्थविराः स्युः । **वैताढ्य**पर्वते च बिलवासा भविष्यन्ति । तत्र बीजमात्रप्रमाणास्तिर्यञ्चो भविष्यन्ति । तदानीं च सर्वे मनुष्याद्या मांसभक्षणपरायणाः क्रूरा विवेकवर्जिता भविष्यन्ति।

तदानीं **गङ्गा-सिन्धु**नद्योर्जलं रथमार्गमात्रं स्यात् । तच्च स्यन्दन्मत्स्यकच्छपव्याप्तं स्यात् । तत्र मनुष्या रात्रावागत्य

मत्स्यादीन् गृहीत्वा स्थले स्थापयिष्यन्ति । दिवसे च सूर्यतापपक्वांस्तानन्यरात्रिमध्ये भक्षयिष्यन्ति । एवमेव ते सदाऽपि भोक्ष्यन्ति । तदानीं दध्यादिकं पुष्पं फलमन्नं शय्या-ऽऽसनादिकं वा न स्यात् । **भरतैरवतै**षु दशस्वप्येवं **दुःषमा** स्यात् । **अतिदुःषमा**ऽप्येकविंशत्यब्दसहस्रिका स्यात् ।

अवसर्पिण्यां हि यावन्त्योपान्त्यावरौ तावुत्सर्पिण्यां स्वप्रभावात् प्रथम-द्वितीयौ भवतः । उत्सर्पिण्यां **दुःषमदुःषमा**न्त्यसमये पृथक् पृथक् सप्ताहवर्षिणः पञ्चमेघा भाविनः । तत्र प्रथमः **पुष्करो** मेघो भूमिं निर्वापयिष्यति । द्वितीयः **क्षीरधीरा**ख्यो मेघो धान्यान्युत्पादयिष्यति, तृतीयो **घृतमेघ**नामा मेघः स्नेहमुत्पादयिष्यति । चतुर्थोऽ**मृतमेघा**ख्यो मेघ औषध्यादिकं जनयिष्यति । पञ्चमो **रसमेघा**ख्यो मेघश्च पृथिव्यादीनां रसं जनयिष्यति । एवं पञ्चत्रिंशतं दिनानि यावत् सौम्यदुर्दिना वृष्टिर्भविष्यति ।

बिलवासिनश्च वृक्ष-लतौषधि-हरितादिकं दृष्ट्वा मुदिता बिलेभ्यो निःसरिष्यन्ति । ते च वक्ष्यन्ति-**भरत**भूमिः पुष्प-फलादिसम्पन्ना जाता । अतः परं मांसं न भक्षणीयम् । यश्च मांसभोजी स परिहर्त्तव्यः" । यथा यथा च काल आगमिष्यति तथा तथा **भरते** रूप-संहनना-ऽऽयूंषि वृद्धिमेष्यन्ति । वाता ऋतवो जलानि च सुखकराणि भविष्यन्ति । क्रमेण च तिर्यञ्चो मनुष्याश्च निरामया भविष्यन्ति ।

**दुःषमा**न्ते **प्राग्भरत**भूमिमध्ये सप्त कुलकरा भविष्यन्ति । ते च नाम्ना क्रमाद् **विमलवाहनः सुदामा सङ्गमः सुपार्श्वो दत्तः सुमुखः संमुचिश्च** । तत्र प्रथमो **विमलवाहनो** जातिस्मरो राज्यार्थं ग्राम-पुरादीन् निवेशयिष्यति । गजा-ऽश्व-गवादीन् सङ्ग्रहीष्यति, शिल्पानि प्रकटयिष्यति, व्यवहारं लिपीर्गणितादिकं च प्रकटयिष्यति । दुग्ध-दध्यादौ धान्येषु वह्नौ चोत्पन्नेषु स हितकृत् कुलकरो लोकानां रन्धनादिकमुपदेक्ष्यति । दुःषमायां व्यतीतायां **शतद्वारे** महानगरे **भद्रा**ख्यायां भार्यायां **संमुचे**र्नृपस्य पुत्रः **श्रेणिक**जीवः **पद्मनाभो** जन्म-मानादिना मम तुल्यस्तीर्थकरो भविष्यति । ततः परं च पूर्ववज्जिनेश्वरा भविष्यन्ति । ते च प्रातिलोम्येन पूर्वजिन-समाः स्युः ।



तत्र **श्रेणिक**जीवः **पद्मनाभो** जिनः प्रथमः, **सुपार्श्व**जीवो द्वितीयः **शूरदेवो** जिनः, **पोट्टिल**जीवस्तृतीयः **सुपार्श्वो** जिनः, **दृढायुषो** जीवश्चतुर्थः **स्वयंप्रभु**जिनः, **कार्तिक**जीवः पञ्चमः **सर्वानुभूति**र्जिनः, **शङ्ख**जीवः षष्ठो **देवश्रुतो** जिनः । **नन्द**जीवः सप्तम **उदया**ख्यो जिनः, **सुनन्द**जीवोऽष्टमः **पेढालो** जिनः, **केकसी**जीवः नवमः **पोट्टिलो** जिनः, **रेयली**जीवः दशमः **शतकीर्त्या**ख्यो जिनः, **सत्यकि**जीव एकादशः **सुव्रतो** जिनः, **कृष्णा**स्य वासुदेवस्य जीवो द्वादशोऽ**ममो** जिनः ।

बलदेवस्य **बलभद्र**स्य जीवस्त्रयोदशो **निष्कषायो** जिनः, **रोहिणी**जीवश्चतुर्दशो **निष्पुलाको** जिनः, **सुलसा**जीवः पञ्चदशो **निर्ममो** जिनः, **रेवती**जीवः षोडशश्**चित्रगुप्तो** जिनः, **गवालि**जीवः सप्तदशः **समाधि**र्जिनः, **गार्गलि**जीवोऽष्टादशः **संवरो** जिनः । **द्वीपायन**जीव एकोनविंशो **यशोधरो** जिनः, **कर्ण**जीवो विंशतितमो **विजयो** जिनः, **नारद**जीव एकविंशो **मल्लो** जिनः, **अम्बड**जीवो द्वाविंशो **देवो** जिनः, **द्वारमद**जीवस्त्रयोविंशोऽ**नन्तवीर्यो** जिनः, **स्वाति**जीवश्चतुर्विंशो **भद्रकृदा**ख्यो जिनः, इत्येते जिना भाविनः ।

तथा **दीर्घदन्त-गूढदन्त-शुद्धदन्त-श्रीचन्द्र-श्रीभूति-श्रीसोम-पद्म-महापद्म-दशम-विमल-विमलवाहना**-ऽ**रिष्टा**ख्याश्चक्रिणश्च क्रमाद् भाविनः । तथा **नन्दि-नन्दिमित्र-सुन्दरबाहु-महाबाहु-अतिबल - महाबल - बल-द्विपृष्ठ - त्रिपृष्ठा**ख्या नवाऽर्धचक्रिणो भविष्यन्ति । तथा बलरामा अपि क्रमशो वर्धमानप्रकर्षा **जयन्ता**-ऽ**जित-धर्म-सुप्रभ-सुदर्शना**-ऽऽ**नन्द-नन्दन-पद्म-सङ्कर्षणा**ख्या भविष्यन्ति । प्रत्यर्धचक्रिणश्च **तिलक-लोहजङ्घ-वज्रजङ्घ-केसरि-बलि-प्रह्लादा**-ऽ**पराजित-भीम-सुग्रीवा**ख्या भाविनः । एवमेते उत्सर्पिण्यां त्रिषष्टिः शलाकापुरुषाः" ।

एवमुक्तवन्तं श्री**वीर**जिनं **सुधर्मा** गणधरो नत्वा केवलादिभ्यः किं कुत्रोच्छेदं प्राप्स्यतीति पप्रच्छ । ततः श्री**वीर**जिन उवाच-मम निर्वाणात् कियत्यपि काले गते **जम्बू**नाम्नस्तव शिष्यादूर्ध्वं केवलं न भविष्यति । केवले उच्छिन्ने च मनःपर्यायः, पुलाकलब्धिः, परमावधिश्च, क्षपकोपशमश्रेण्यावाहारकं शरीरं, जिनकल्पः, संयमत्रयं चोच्छेदमेष्यन्ति । तव शिष्यो **जम्बू**श्चतुर्दश पूर्वभृत् सिद्धिमेष्यति । **जम्बू**शिष्यः **प्रभव**श्च सर्वपूर्वभृद् भविष्यति । तच्छिष्यः **शय्यम्भवो** द्वादशाङ्गभृद् भविष्यति । स श्रुताब्धेरुद्धृत्य **दशवैकालिकं** ग्रन्थं करिष्यति । तच्छिष्यो **यशोभद्रः** सर्वपूर्वभृद् भावी । तच्छिष्यौ **सम्भूत-भद्रबाहू** अपि सर्वपूर्वभृतौ भविष्यतः । **सम्भूत**शिष्यः **स्थूलभद्रः** सर्वपूर्वभृद् भविष्यति । ततः परमन्तिमा चतुःपूर्वी व्युच्छेदं यास्यति । ततः परं **महागिरि-सुहस्त्याद्या वज्रा**न्ता दशपूर्विणस्तीर्थस्याऽस्य प्रवर्त्तका भविष्यन्ति" ।

एवमुक्त्वा प्रभुः समवसरणाद् निर्गत्य **हस्तिपाल**नृपस्य शुल्कशालां गत्वा रात्रावात्मनो मोक्षं ज्ञात्वा दध्यौ-"अहो ! **गौतम**स्य मयि निरपायो महान् स्नेहः । स च तस्य केवलज्ञान-



विघ्नभूतः समुच्छेद्यः" । एवं विचार्य **वीर**प्रभु**गौतम**मुवाच-"परस्मिन् ग्रामे **देवशर्मा** द्विजोऽस्ति, स त्वया बोधं प्राप्स्यति, तदर्थं त्वं तत्र गच्छ" । **गौतम**श्च प्रभोरादेशः प्रमाणमित्युक्त्वा प्रणम्य च गत्वा प्रभुवचनं पालयामास ।

❁ ❁ ❁

अथ प्रभुस्तदानीं कार्तिकामावास्या रात्रेश्चरमे क्षणे स्वाति-नक्षत्रे प्रवर्त्तमाने कृतषष्ठो भविष्यत्कल्याणप्रदानि पञ्चपञ्चाश-मध्ययनानि सद्यः फलप्रदानि च तानि तावन्ति जगौ । **प्रश्न-व्याकरण**वर्जं षट्त्रिंशतमध्ययनान्युक्त्वा त्रिभुवनगुरु**र्वीर**जिनः **प्रधानं** नामाऽध्ययनं भावयामास । सुरेन्द्रादयश्च प्रभो**र्वीर**जिनस्य निर्वाणसमयमासनकम्पतो ज्ञात्वा सपरिच्छदास्तत्राऽऽजग्मुः ।

तत्र शक्रोऽश्रुपूर्णनेत्रो **वीर**जिनं प्रणम्य कृताञ्जलिरुवाच-"प्रभो ! तव गर्भे जन्मनि दीक्षायां केवले च हस्तोत्तरनक्षत्रमभूत् । अधुना तु **भस्मक**ग्रह उदेष्यति । तव विपद्यमानस्य जन्मनक्षत्रं क्रामन् सोऽशुभग्रहो वर्षाणां सहस्रद्वयं यावत् तव सन्तानं बाधिष्यते । ततस्त्रिजगदीश ! तस्य दुर्ग्रहस्य सङ्क्रमणक्षणं प्रतीक्षस्व । यथा स त्वत्प्रभावेन विफलो भविष्यति । ये हि त्वां हृदि धारयन्ति तेषां दुःस्वप्ना अपशकुनानि दुर्ग्रहाश्च शुभतां यान्ति । यत्र तु त्वं साक्षात् स्थितो भवसि तस्य किं वक्तव्यम् ? ततः प्रसीद, क्षणं तिष्ठ, यथा दुर्ग्रहोपशमोऽस्तु" ।

ततो **वीर**प्रभुरुवाच-"शक्र ! कोऽप्यायुः सन्धातुं नेश्वरः, तदेतज्जानन्नपि तीर्थप्रेममोहितः किमेवं वदसि ? **दुःषमायाः** प्रवर्त्तनात् तीर्थबाधा भाविन्येव । तद्भवितव्यतानुसारेण **भस्मक**ग्रहोदयोऽभूत् । एवं शक्रं बोधयित्वा प्रभुः सार्धषण्मासोनां त्रिंशद्वर्षीं केवलित्वे

परिपाल्य पर्यङ्कासनस्थः कायस्य बादरे योगे स्थितो बादरौ वाङ्-मनोयोगौ रुद्ध्वा वपुषः सूक्ष्मं योगमाश्रित्य बादरं काययोगं रुद्ध्वा सूक्ष्मौ वाङ्-मनोयोगावपि रुद्ध्वा तृतीयं सूक्ष्मक्रियं शुक्लध्यानं चक्रे । ततः प्रभुः सूक्ष्मं काययोगं निरुध्य चतुर्थं समुच्छिन्नक्रियं शुक्लध्यानं प्रपन्नवान् । तेन ध्यानेन च पञ्चह्रस्वाक्षरोच्चारणकाल-प्रमाणेन चतुर्थपुरुषार्थसहचारिणैरण्डबीजवद् बन्धाभावादूर्ध्वं गच्छन् स्वभावर्जुना मार्गेणाऽद्वितीयं मोक्षं जगाम । तदानीं च नारकाणामपि क्षणं सुखमभूत् । ये नारकाः कदाऽपि सुखलवमपि न भजन्ति ।

तदानीं च **चन्द्र**नामा वत्सरः, **प्रीतिवर्धना**ख्यो मासो, **नन्दिवर्धना**ह्वयः पक्षोऽ**ग्निवेश**नामा वासरश्चाऽभूत् । स वासर **उपशम** इत्यपराभिधानः, सा रात्रिश्च **देवानन्दा**ख्याः **नैर्ऋती**त्य-पराख्या, लवश्च सोऽ**र्च्य** इत्याख्यः, **शुक्ला**ख्यः प्राणः, **शुद्ध**नामा स्तोकः, **सर्वार्थसिद्धा**ख्यो मुहूर्त्तो, **नाग**नाम करणं चाऽभवन्। तदानीं चाऽप्रतिविधेयः **कुन्थु**नामजन्तुरस्पन्दो दृग्गोचरः स्पन्दमानश्च दृग्गोचर उदपद्यत । तां दृष्ट्वा च साधवः साध्व्यश्च बहवः 'संयमोऽतः परं दुष्पालो भावी'ति चिन्तयाऽनशनं चक्रुः । राजानश्च सर्वे तदानीं प्रभौ ज्ञानदीपके निर्वाणे द्रव्यदीपकान् रचयामासुः । तत्प्रभृति च लोके **दीपोत्सवा**भिधं तत्पर्व सर्वतो दीपमालाकरणात् तस्यां रात्रौ प्रवर्त्तते । देवाश्चाऽश्रुपूर्णनेत्रा जगद्गुरोर्वपुर्नत्वा स्वमनाथं शोचन्तोऽदूर एवाऽस्थुः ।

अथ शक्रो धैर्यमालम्ब्य **नन्दन**वनादिभ्य आहृतैर्गोशीर्ष-चन्दनकाष्ठैरेकान्ते रचयामास । तथा शक्रः स्वयमेव क्षीरोद-सागरजलैः प्रभोर्वपुः स्नपयित्वा दिव्येनाऽङ्गरागेण विलिप्य दिव्ये वाससी च परिधाप्य नेत्रजलैः पुनः स्नपयन्निवोद्दध्रे । विमान-



वरतुल्यायां शिबिकायां प्रभोर्वपुः शक्रो देवासुरैः दृश्यमानो न्यधात्। प्रभोराज्ञामिव च शक्रस्तां शिबिकां कथञ्चिद् निरुद्धशोकावेगः समुद्दधार । तत्र देवाश्च बन्दिवृन्दानीव जयजयारावं कुर्वन्तो दिव्यानि पुष्पाणि ववृषुः । तथा गन्धाम्बुजलेन पृथिवीं परितः सिषिचुः । गन्धर्वा देवाश्च स्वामिगुणान् स्मारं स्मारं मुहुर्मुहुः स्तुवन्तस्तारस्वरेण जगुः । तथा देवाः शोकेन निजवक्षःस्थलमिव मृदङ्ग-पणवाद्यानि शतशो वाद्यानि दृढं ताडयामासुः ।

सुरस्त्रियश्चाऽभिनवा नर्त्तक्य इव शोकेन स्खलद्गतयः प्रभोः शिबिकाग्रे ननृतुः। देवाश्च चतुर्विधा अपि दिव्यैर्दुकूलैर्हारादिभिर-लङ्कारैः पुष्पमाल्यैश्च शिबिकामानर्चुः। भक्तिशोकसमाकुलाः श्राविकाः श्रावकाश्चाऽपि रुदितेन सहैव रासकगीतं चक्रुः । सूर्येऽस्तमिते कमलेषु महती निद्रेव साधुषु साध्वीषु च शोकोऽत्यन्तं पदं चकार । ततः शक्रः प्रभोः शरीरं शोकशङ्कुना गृहीत इव विदीर्यमाणहृदयश्चितायां निदधौ । **अग्निकुमारा**श्च चितामग्निं विचक्रुः **वायुकुमारा**श्चा-ऽग्निदीपनं वायु विचक्रुः । अन्ये देवाश्च ज्वलन्त्यां तस्यां चितायां गन्धधूपान् शतशो घृत-मधुकुम्भाश्च चिक्षिपुः । ततो **मेघकुमारा** मांसादिषु प्रदग्धेषु **क्षीरोद**सागरादाहृतैर्जलैश्चितां द्राग् विध्यापया-मासुः ।

ततः शक्रेशानेन्द्रौ प्रभोर्दक्षिणा-ऽदक्षिणे ऊर्ध्वदंष्ट्रे चमर-बलीन्द्रौ चाऽधोदंष्ट्रे जगृहतुः । अन्ये इन्द्रा देवाश्चाऽन्यदन्तानस्थीनि च जगृहुः । नराश्च कल्याणकाङ्क्षया तच्चिताभस्म जगृहुः । ततो देवास्तस्याश्चितायाः स्थाने कल्याणसम्पदां भूमिं परं रत्नमयं स्तूपं रचयामासुः । एवं देवाः प्रभोर्निर्वाणमहोत्सवं कृत्वा **नन्दीश्वरे** गत्वा शाश्वतार्हतामष्टाह्निकामहोत्सवं चक्रुः । तथा ते देवाः स्वस्वस्थानं

गत्वा स्वविमानान्तर्वर्त्तिमाणवस्तम्भशिखरेषु वृत्तेषु वज्रसमुद्गेषु स्वामिदंष्ट्राः स्थापयामासुः ।

एवं श्री**वीर**जिनस्य गार्हस्थ्ये त्रिंशदब्दी, व्रते च द्विचत्वारिंशदब्दीति द्वासप्ततिवर्षाण्यायुरभूत् । श्री**पार्श्वनाथ**स्वामिनिर्वाणात् सार्धे वर्षशतद्वये गते च श्री**वीर**जिनस्य निर्वाणमभूत् ।

इतश्च **देवशर्म**द्विजं बोधयित्वा निवृत्तो **गौतमो** देववार्त्तया स्वामिनिर्वाणं श्रुत्वा हृदये दूयमानो दध्यौ-"प्रभुणाऽहमेकस्य दिनस्य कृते किं प्रेषितोऽस्मि, इयत्कालं प्रभुं सेवित्वाऽन्तकाले नाऽदर्शम् । तदहमधन्यः, तत्र ये स्थितास्ते धन्याः । अरे ! **गौतम** ! त्वं वज्रमयो वज्रादधिको वाऽसि यत् प्रभुनिर्वाणं श्रुत्वाऽपि शतधा न दीर्यसे । यद्वाऽहमादित एव भ्रान्तोऽस्मि यद् रागवर्जिते रागं निर्ममे ममत्वं च कृतवान् ।

किं चाऽमी राग-द्वेषादयो भवहेतवः । तेन कारणेनैव तेन परमेष्ठिना ते त्यक्ताः । ईदृशे निर्ममे प्रभौ च ममाऽपि ममत्वेनाऽलम् । मुनीनां तु सममत्वेऽपि ममत्वं न युज्यते । एवं शुक्लध्यानपरायणः क्षपकश्रेणिगतो **गौतमः** क्षणाद् घातिकर्मक्षयात् केवलं प्राप्तः । ततः सः **गौतमो** द्वादशवर्षाणि यावत् केवलर्द्धिसम्पन्नो देवैः सेवितो भव्यान् प्रबोधयन् **राजगृहे** नगरे गत्वा क्षीणभवोपग्राहिकर्मा मासमुपोषितोऽनन्तकल्याणास्पदं पदमगात् ।

अथ तस्मिन् **गौतमे** गणधरे मुक्ते **सुधर्मा** गणधरः केवलं प्राप्य पृथिव्यां भव्यान् चिरकालं धर्ममन्वशात् । अन्यदा **राजगृह**नगरं प्राप्तः स निजमशेषं सङ्घं **जम्बू**स्वामिमुनेरधीनं चकार । तस्मिन्नेव नगरे च स **सुधर्मा** गणधरः क्षीणाष्टकर्मा चतुर्थध्यानमग्नोऽनन्तसुखास्पदं शाश्वतं पदमगात् ।



**जम्बू**प्रभुश्चाऽन्तिमकेवली महीतले श्री**वीरो**क्तमार्गाग्रेसरश्चिरकालं भव्यान् धर्मं प्रबोध्य शाश्वतमनन्तसुखं पदं जगाम । त्रैलोक्येऽपि सात्त्विकेषु सर्वमूर्धन्यस्य श्रीम**द्वीर**जिनस्य प्राग्जन्ममोक्षावधि सर्वं चरितं को नाम वक्तुं क्षमः ? तथाऽपि प्रवचनाम्भोधेरगाधस्य किञ्चिल्लवं गृहीत्वा मया स्वान्योपकारेच्छयेदृशं कीर्तितम् ॥१३॥

*इति दशमे पर्वणि श्रीमहावीरनिर्वाणगमनवर्णनात्मकः*
*त्रयोदशः सर्गः ॥१३॥*

इति कलिकालसर्वज्ञश्री**हेमचन्द्राचार्य**विरचित**त्रिषष्टिशलाकापुरुषचरित**स्य
तपोगच्छाधिपति-शासनसम्राट्-बालब्रह्मचारि-श्रीकदम्बगिरि-
तालध्वज-राणकपुर-कापरडाद्यनेकतीर्थोद्धारकाचार्यवर्य-
श्रीमद्विजय**नेमिसूरीश्वर**पट्टालङ्कार-
समयज्ञ-शान्तमूर्त्याचार्यवर्यश्रीविजय**विज्ञानसूरीश्वर**पट्टधर-
सिद्धान्तमहोदधि-प्राकृतविशारदाचार्यवर्यश्रीविजय**कस्तूरसूरीश्वर**शिष्यरत्न-
प्रख्यातव्याख्यातृ-कविरत्न-श्रीविजय**यशोभद्रसूरीश्वर**शिष्यरत्न-
श्रीविजय**शुभङ्करसूरीश्वर**कृते
**गद्यात्मकसारोद्धारे** दशमे पर्वणि
**समाप्तं श्रीमहावीरचरितप्रतिबद्धं दशमं पर्व ॥१०॥**

**इति श्रीत्रिषष्टिशलाकापुरुषचरितगद्यात्मकसारोद्धारः समाप्तः ॥**
**श्रीरस्तु ॥ शुभमस्तु ॥**

# कठिनशब्दार्थः

## दशमं पर्व

### प्रथमः सर्गः

| | |
|---|---|
| पाथेयम् | ભાથું |
| रसवती | રસોઈ |
| शिखा | ચોટલી |
| उपानद् | મોજડી |
| अन्तिकम् | પાસે |
| श्रीखण्डतिलकम् | ચંદનનું તિલક |
| आस्फोटयन् | પછાડતો |
| कपित्थम् | કોઠાનું ફળ |
| श्रृङ्गः | શીંગડું |
| भूयिष्ठबलः | મહાબલવાળો |
| उत्तुङ्गः | ઊંચો |
| कलापः | સમૂહ |
| शालिः | ડાંગર |
| काकनाशं नष्टाः | કાગડાની જેમ નાઠા |
| जृम्भा | બગાસું |
| व्यात्ताननः | ખોલેલા મુખવાળો |
| कुञ्जरः | હાથી |
| ओष्ठः | હોઠ |
| विदारितः | ફાડી નાખેલ |
| युयुत्सुः | યુદ્ધની ઈચ્છાવાળો |
| चक्रतुम्बम् | ચક્રનો આગળનો ભાગ |
| उपहारः | ભેટણું |
| उपायनम् | ભેટણું |
| पद्या | કેડી |

### द्वितीयः सर्गः

| | |
|---|---|
| महीमहेलातिलकभूतम् | પૃથ્વીરુપી સ્ત્રીના તિલક સમાન |
| निष्परिस्पन्दः | ચેતનારહિત |
| विश्लथकेशा | છૂટા વાળવાળી |
| आरात्रिकम् | આરતી |
| क्षौमं वासः | પટ્ટવસ્ત્ર |
| सधवा | સૌભાગ્યવતી સ્ત્રી |
| पणः | પ્રતિજ્ઞા |
| उद्वाहः | વિવાહ |
| दारा | સ્ત્રી |
| दिष्टिः | ભાગ્ય |



| | |
|---|---|
| और्ध्वदेहिकम् | મરેલાની મરણ તિથિએ ખવાતું પિંડાદિ |
| शिबिका | પાલખી |
| व्यजनम् | વીંઝણો, પંખો |
| उह्यमाना | ઉંચકાયેલી |

### तृतीयः सर्गः

| | |
|---|---|
| स्कन्धः | ખભો |
| दशाबन्धनम् | ઓટવું |
| तुन्नवायः | દરજી |
| रोमन्थायमाना | વાગોળવું |
| पारिपार्श्वकः | સેવક |
| पार्श्ववर्ती | પાસે રહેનાર |
| प्राजनम् | પરોણી |
| स्मरः | મૈથુનની ઈચ્છા |
| तृणोटजः | ઘાસની ઝૂપડી |
| मत्सरः | ઈર્ષ્યા |
| उपालम्भः | ઠપકો |
| नीडः | માળો |
| प्रावृट् | વર્ષાઋતુ |
| पङ्किलः | કાદવ |
| महोक्षः | મોટો બળદ |
| चत्वरः | ચોરો |
| राशीकृत्य | ઢગલો કરીને |
| निकेतनम् | ઘર |
| कार्पटिकः | ફેરી ફરનાર કાપડિયો |
| पथिकः | મુસાફર |
| मुमूर्षुः | મરવાની ઈચ્છાવાળો |
| भोगः | ફણા |
| निदेशः | આદેશ |
| अन्त्रम् | આતરડું |
| सौवीरम् | બોરડીનું ફળ |
| कङ्गुः | એક જાતનું ખડ ધાન્ય |
| परिवेष्टितः | વીંટળાયેલ |
| शिग्रुवृक्षः | સરગવો |
| बदरी | બોરડીનું ઝાડ |
| भेकी | દેડકી |
| स्तम्भः | થાંભલો |
| परशुः | કુહાડી |
| श्येनः | બાજપક્ષી |
| बिलम् | દર |
| गृहमेधी | ગૃહસ્થ |
| नौः | હોડી |
| कूपकः | નૌકા વચ્ચેનો થાંભલો |
| जायापती | દંપતી |
| आभीरी | ભરવાડણ |
| वाहकेली | બળદ દોડાવવાની રમત |

| | |
|---|---|
| सैकतम् | રેતીવાળો નદી કિનારાનો ભાગ |
| अविस्रम् | દુર્ગન્ધરહિત |
| कोद्रवः | કોદરા, એક જાતનું ધાન્ય |
| सारमेयः | કૂતરો |
| मृगयमाणः | શોધતો |
| कर्परः | ઠીકરું |
| उषितम् | વાસી |
| रिरंसुः | રમવાની ઈચ્છાવાળો |
| छद्म | કપટ, છલ |
| तित्तिरिः | તેતર તક્ષી |
| उपोषितः | ઉપવાસી |
| कुलालः | કુંભાર |
| न्यञ्चनोदञ्चने | કાઢવું-ડૂબાવવું |
| धूलिधूसरितपादः | ધૂળથી ખરડાયેલ પગ |
| अविध्यापितः | નહી બૂઝવાયેલ |
| लगुडः | લાકડી |
| दस्युः | ચોર |
| तुन्दः | પેટ |
| अयोघनः | હથોડો |
| जिघांसा | હણવાની ઈચ્છા |
| कर्मारशाला | લુહારની કોંઢ |

## चतुर्थः सर्गः

| | |
|---|---|
| वंशगह्वरम् | વાંશની જાળમાં |

| | |
|---|---|
| अध्वन्यः | મુસાફર |
| स्तम्बः | છોડ |
| शिम्बी | ફળી |
| पुरीषः | વિષ્ઠા |
| अनाकर्णितकम् | અણસાંભળ્યું |
| यूका | જૂ |
| सतुषकुल्माषः | ફોતરા સહિતના અડદના બાકુળા |
| चुलुकम् | ખોબો |
| समया | પાસે |
| पर्युषितम् | વાસી |
| पांशुवृष्टिः | ધૂળની વૃષ્ટિ |
| पिपीलिका | કીડી |
| घृतेलिका | ઘીમેલ |
| वृश्चिकः | વીંછી |
| स्कन्धावारम् | છાવણી |
| वातः | વાવાઝોડું |
| पिष्टः | ભૂકો |
| जानुदघ्नम् | ઢીંચણ ડૂબે એટલું પાણી |
| पुत्तलिका | પૂતળી |
| दारुदर्वीकरा | લાકડાનો ડોયો પકડેલી સ્ત્રી |
| परिघः | ગદા, હથોડો |
| प्रजिहीर्षुः | હરણ કરવાની ઈચ્છાવાળો |



| | |
|---|---|
| प्रतिपत्तिथिः | પડવો, એકમ |
| देहली | ઊંબરો |
| शूर्पः | સૂપડું |
| वेत्रिणी | દ્વારપાલ |
| औष्ट्रिकः | ઊંટવાળો |
| घर्मार्त्तः | ગરમીથી વ્યાકુળ |
| कपाटः | કમાડ |
| नूपुराणि | પગના ઝાંઝર |
| कञ्चुकी | અન્તઃપુરનો રક્ષક |
| निर्वासिता | કાઢી મૂકાયેલ |
| काशशलाका | લોખંડની ખીલી |
| श्लथम् | ઢીલું |
| सन्दंशः | સાણસી |

## पञ्चमः सर्गः

| | |
|---|---|
| शालतरुः | રાળનું ઝાડ |
| बीजपुरः | બીજોરું |
| मातुलिङ्गः | બીજોરું |
| पारदृश्वा | પારગામી |
| करीरम् | છાણ |
| उपढौकितः | સામે મૂકેલો |
| शरः | બાણ |
| जिघृक्षुः | ગ્રહણ કરવાની ઈચ્છાવાળો |

## षष्ठः सर्गः

| | |
|---|---|
| वदान्यः | ઉદાર |

| | |
|---|---|
| चिपिटघ्राणः | ચપટા નાકવાળો |
| उष्ट्रिका | ઊંટડી |
| कौसुम्भवस्त्रम् | પીતાંબર |
| करण्डः | કરંડિયો |
| परिखा | ખાઈ |
| क्रायकः | ઘરાક, ખરીદનાર |
| पुटकम् | પડીકું |
| दित्सा | આપવાની ઈચ્છા |
| शम्बलम् | ભાથું |
| अङ्गुलीयकः | વીંટી |
| ऊर्मिका | વીંટી |
| गरीयसी | વધારે મોટી |
| फलकम् | પાટીયું, ઢાલ |
| सुरङ्गा | સુરંગ, ભોયરું |
| उदन्तः | વૃત્તાન્ત |
| पुरन्दरः | ઈન્દ્ર |
| शची | ઈન્દ્રાણી |
| व्रणः | જખમ |
| महः | મહોત્સવ |
| करिणी | હાથણી |
| कलभः | હાથીનું બચ્ચું |
| खञ्जा | લંગડી |
| आलानम् | હાથી બાંધવાનો થાંભલો |
| कण्डूयनम् | ખંજવાળ |
| सोपहासम् | મશ્કરીપૂર્વક |

## सप्तमः सर्गः

| | |
|---|---|
| वर्धकिः | સુથાર |
| मातङ्गः | ચંડાલ |
| माकन्दः | આંબો |
| दिदृक्षा | જોવાની ઈચ્છા |
| चूतफलम् | આંબાનું ફળ |
| व्याजः | બહાનું |
| तालकम् | તાળું |
| लक्ष्म | ચિહ્ન |
| तूलपूर्णिकतर्कुः | રૂની પૂણી માટેનો ચરખો |

## अष्टमः सर्गः

| | |
|---|---|
| प्राज्यम् | ઘણું |
| कूर्चिका | રંગ કરવાની પીંછી |
| इष्टका | ઈંટ |
| प्राकारः | કોટ, વાડ |
| सौविदल्लः | અંતઃપુરનો રક્ષક |
| उद्वर्तनम् | માલિશ કરવું |
| घृतपूरः | ઘેબર |
| कलायः | વટાણા |
| कलमः | ડાંગર |
| स्वस्तिकमण्डूकी | વિશેષ શાકનું નામ |
| तेमनम् | વ્યંજન, શાક-કઢી |
| ताम्बूलम् | મુખવાસ |
| प्रतिश्रयः | ઉપાશ્રય |
| साधिक्षेपम् | આક્રોશ પૂર્વક |
| वल्मीकः | રાફડો |
| नाकुशिखरम् | રાફડાનો અગ્રભાગ |
| गुर्विणी | ગર્ભવતી |
| पर्षद् | સભા |
| खगः | પક્ષી |
| कुष्ठरोगः | કોઢનો રોગ |

## नवमः सर्गः

| | |
|---|---|
| हालिकः | ખેડૂત |
| पूयरसः | પરુ |
| क्षुतः | છીંક |
| वियत् | આકાશ |
| द्राघीयान् | દીર્ઘ, લાંબો સમય |
| सर्वाभिसारः | ચતુરંગ સેનાનું યુદ્ધ માટે પ્રયાણ |
| कान्दिशीकः | પલાયન માટે ઉત્સુક, ડરપોક |
| न्यग्रोधः | વડ |
| लाक्षा | લાખ |
| पिप्पलः | પીપળાનું વૃક્ષ |
| कुटीरः | ઝૂંપડી |
| क्वथितम् | બગડેલું, કુત્સિત |



| | |
|---|---|
| वापी | વાવ |
| भेकः | દેડકો |
| धीवरः | માછીમાર |
| भागिनेयः | ભાણેજ |
| विषूचिका | ઊલટી, કોલેરા |
| तृणसंस्तरः | ઘાસનો સંથારો |
| गोपुरम् | નગરનો દરવાજો |

## दशमः सर्गः

| | |
|---|---|
| वितानम् | ચંદરવો |
| पादप्रोञ्छनम् | પગલૂછણીયું |
| तूलिका | પથારી |

## एकादशः सर्गः

| | |
|---|---|
| दण्डपाशिकः | કોટવાળ |
| लोप्त्रम् | ધન |
| जविः | ઝડપી |
| हयः | ઘોડો |
| पोट्टलिका | પોટલી |
| भस्त्रा | થેલી |
| न्यासीभूतः | થાપણસ્વરૂપ |
| जवनिका | પડદો |
| इभी | હાથણી |
| निषादी | મહાવત |
| अनुनीयमाना | મનામણા કરાવાતી |
| पर्यङ्कः | પલંગ |
| उलूकः | ઘુવડ |
| सांयात्रिकाः | દરિયાઈ વેપારીઓ |
| आयसः | લોઢાથી બનાવેલ |
| कबन्धः | ધડ, માથા વિનાનું શરીર |
| ऊषरभूमिः | ઊખરભૂમિ |
| क्रीडनकम् | રમકડું |

## द्वादशः सर्गः

| | |
|---|---|
| मृगया | શિકાર |
| यूका | જૂ |
| मशकः | મચ્છર |
| कवचहरः | બખ્તર ધારી શકે તેવી ઉંમરવાળો પુત્ર |
| कशा | ચાબૂક |
| सारणिः | નીક, નહેર |
| आलवालम् | ક્યારો |
| कुन्तः | ભાલો, બરછી |
| मुशलः | સાંબેલું |
| खातिका | ખાડો |
| अवस्कन्दम् | હુમલો કરવો |
| निगडितः | બેડીથી બંધાયેલ |
| अस्ताघः | અતિ ગંભીર, ઘણું જ ઊંડું |
| घूकः | ઘુવડ |

## त्रयोदशः सर्गः

| | |
|---|---|
| गृध्नुः | લોલુપી |
| सारमेयः | કૂતરો |
| दीर्घिका | નાની વાવ |
| श्वापदः | જંગલી પશુ |
| लञ्चा | લાંચ |
| अनिलः | પવન |
| कासः | ખાંસીનો રોગ |
| शूलम् | ભાલો |
| मृदङ्गः | મૃદંગ, નગારું |
| जलोदरः | પેટનો રોગ |
| रासकगीतम् | ગરબા |
| दंष्ट्रा | દાઢા |
| समुद्गः | ડાબડો |

•••